He states that those passages of the scripture that speak Śiva to be immutable [and hence cannot be the material cause of the world in the strict sense] are more numerous and more powerful than those that speak of non-difference (*abheda*) between the cause, Śiva and the effect, the world. Naturally the latter passages have to be interpreted on the strength of those passages that clearly demarcate the difference between the material cause and the instrumental cause as speaking the pervasion of Śiva in the material cause as well as in its effects (*upādānopādeyavyāpta*). The view of illusory manifestation of consciousness (*cidvivarta*) held by the Advaita Vedānta is also totally rejected as untenable. For, as the Pauṣkarāgama says, in that case the manifested world would be unreal (*asatya*) which is totally against all logic.[2]

Umāpati concludes that this amounts to saying that Śiva is all-pervasive and is the inner controller (*antaryāmī*) of everything.

Jñānaprakāśa is forthright in saying that there is no question of Śiva, the conscious supreme Being, evolving into the inert material world. Only mahāmāyā and māyā are the material causes respectively for the pure and impure worlds. He refutes the opponent's view by saying that they do not know the difference between māyā and mahāmāyā which is clearly spoken of in the Śaivāgama-s.

Bindu

It is defined as the source of the activities such as the *laya, bhoga,* etc. and from which the [the tattva-s] of the pure path (*śuddhādhvā*) originate. Bindu is always under the control of Śiva which He uses

---

1. सा तु कुण्डलिनी शम्भोर्नित्याधिष्ठेयरूपिणी।
   भोग्यभोक्तृत्वसम्पत्त्यै सा शरीरेन्द्रियादिकम्।।
   उत्पादयति सा माया खचिता कर्मभिर्नृणाम्। 1: 11-12ab
2. सर्वप्रमाणसम्सिद्धं चिद्विवर्तं कथं जगत्। –Pauṣkarāgama, 2:6cd

as His power (*parigrahaśakti* and hence different from His inseparable power, Śakti) in order to create the pure realm. It is also known as Kuṇḍalinī. In the *dīkṣā* and eventually in the state of liberation (*mukti*) only the three tattva-s—*śivatattva, sādākhya* (= sadāśiva) and *īśvaratattva*—are to be purified and attained by the liberation seekers (*mumukṣu*) and not the various states of Bindu such as Bhoga, or Adhikāra, etc.[1]

The existence of Bindu is logically proved by arguing as follows:

The impure Māyā cannot be the material cause of the pure domain. For, Māyā, by its very nature, creates confusion [in the selves] whereby the deluded selves think the matter, etc. as the self (*anātmanyātmābhimāna*). The purified selves [in the pure domain] whose innate consciousness has been awakened by the grace of Śiva do possess bodies, and sense organs. But since they have been awakened by Śiva's grace and inhabiting the pure domains their bodies and sense organs can not be made of impure Māyā. As a logical consequence Bindu, also called Mahāmāyā should be accepted as the material cause for those domains and bodies.[2] Moreover, the awakened selves in the pure domain are all fully free from Karma and its effects. In this situation, Māyā, which ripens according to the Karma, can never be the material cause in anyway for the bodies of those selves in the pure worlds.

In passing Umāpati also states that since there is no Karma left behind for these awakened selves they are free from any type of misery. For the bound selves, it is the omnipotent Śiva who grants the fruits of their Karma and who creates the body, etc. for the individual selves based on their Karma. It is like the all powerful king or nobleman who either favours or punishes a person according to his mistakes which in no way diminishes the king's power. It can also be compared to a potter who with the aid of the wheel, etc. but with complete independence makes a pot. Even at the beginning of creation though intellect, (*buddhi*) etc. are absent the Karma of all the selves rest in Māyā during deluge and Śiva accordingly creates

1. Vide Pauṣkarāgama,1: 48-50 and the commentaries. While the liberated selves that have attained the *layatattva* are completely liberated those attaining the bhoga and adhikāra get their power power of consciousness fully manifest. Vide ibid.
2. Pauṣkarāgama, 2: 7-8.

afresh the world, body, etc. for the selves. One need not have the apprehension that since all the Karma are present contrary effects may take place. At a given time only one Karma which is ripe starts giving its fruit. Umāpati says that even in the pure worlds there is Karma which is pure on which basis Śiva grants corresponding experiences to those awakened selves. There are Śaivāgama passages which state clearly that all selves, even those inhabiting the pure worlds, obtain their respective fruits and attain higher worlds as a consequence of their Karma performed there, special upāsanā-s based on various mantra-s of Vidyeśvara-s, Sadāśiva, etc.

Bindu (= Kuṇḍalinī) is pure but inert; therefore it does not exist in the relation of identity (*tādātmya*) with Śiva. But it exists in relation of the adopted (= taken possession of) (*parigraha*) and the adoptor, who is Śiva. As the clay, the material cause for the pot exists with the potter, so does the Bindu with Śiva. Another argument to arrive at a separate and pure Bindu is that it serves as the material cause for the physical body and the sense organs of Ananteśa who activates the impure Māyā in order to create the bodies and sense organs for the bound selves in the impure worlds.[1]

Bindu as the Source of Sound

The existence of Bindu as the prime source of sound is argued in the Pauṣkarāgama. It says as all human knowledge occurs as associated with sound, and since sound can not be without a cause the Bindu is the cause of all sounds.[2] For the objection since the ether (ākāśa) is generally considered to be the source of sound, how Bindu can be its source, it is answered that actually the ākāśa is the gross from of *śabdatanmātra* which only manifests the sound (*vyañjaka*). But it is never the manifested (*vyaṅgya*). Further apart from syllabic sounds we hear of many different types of sounds such as the sound of the ocean. As the difference between the general sounds and that of the syllables (*varṇa*), so also their cause or the source should be different. In this way also one can prove a separate existence of Bindu. Further, the *śabdatanmātra* exists in the lowest rung in the scheme of tattva-s and the intellect (*buddhi*) as the faculty of determination (*adhyavasāya*) which are accepted by all the

1. Pauṣkarāgama, 2: 13cd-14.
2. Pauṣkarāgama, 2: 15-16ab

traditions including the Sāṃkhya-s. Therefore, Bindu as the only source of sounds that are associated with every knowledge of the beings should be accepted.

Four Levels (= stages) of Sound

Vaikharī, Madhyamā, Paśyantī and Sūkṣmā are the four stages of sound each succeeding one subtler than the previous one. Of them, the Vaikharī is the external audible sound that is produced when the prāṇavāyu at the respective places such as the chest, etc. is restrained. Moreover, the Vaikharī mode helps the speaker convey his intention through the external audible sound. Madhyamā is the mental speech clearly articulating the syllables. It is performed not by the prāṇa but by the udāna. The Paśyantī speech is unarticulated one which is mentally uttered without the sysllables. It is undifferentiated like the juice inside a pacock egg (*māyūrāṇḍarasa*).

The Sukṣmā type of speech is knowable only through one's conscious power (*cicchakti*) and it is undifferentiated (*nirvikalpa*). Of these, madhyamā is the cause of vaikharī, paśyantī that of madhyamā while sūkṣmā is the cause of paśyantī. The first three states—sūkṣmā, paśyantī and madhyamā—reside inside the body and only vaikharī is uttered and becomes audible. Umāpati adds that these levels of speech are not inert like a pot but brilliant like lightning (*vidyudādivat*). To show that these types of speech is not something unknown the Pauṣkarāgama states that every being in the universe including the low born, women (*āgopālāṅganāḥ*), children (*bālāḥ*), those who speak unrefined vernaculars (*prākṛtabhāṣiṇaḥ*) and even the aquatic creatures (*antarjalagatāḥ sattvāḥ*) speak those speech always. What is more, these speeches are the thickest bondages (paramo bandhaḥ) and liberation from them does not constitute the highest one.

In the pure domain these speech types are extremely subtle and in the impure worlds they are gross.

Just as Bindu is the material cause of these four types of speech (*śabda*) it is also the material cause for the five kalā-s: nivṛtti, pratiṣṭhā, vidyā, śānti and śāntyatītā, which are in fact the source of object (*artha*). Thus Bindu is the source of both the world of sound (*śabdaprapañca*) as well as the world of objects (*arthaprapañca*).[1] In

1. Umāpati in his vyākhyā on Pauṣkarāgama, 2: 33.

fact Bindu is of both the forms—sound and object (*śabda* and *artha*) and therefore it serves as the source of both.[1]

These five kalā-s exist as different worlds in the pure domain while they exist as the foundations of all tattva-s, bhuvana-s, etc. in the mixed (*miśrādhvā*) and in the impure domain (*aśuddhādhvā*).[2]

The four states of Bindu in the tattva sphere (one among the different states of Bindu in the level of world of objects—*arthaprapañca*) are: Śivatattva, Sadāśiva (=Sadeśa), Īśvara and Śuddhavidyā. These tattva-s are characterized by unalloyed bliss, and various divine enjoyments. While those selves whose power of enjoyment (*bhoga*) has been manifested by *dīkṣā* experience various types of supreme enjoyments in the *Sadāśivatattva* and the *Śivatattva*, those selves whose power of lordship (*adhikāra*) has been manifested by *dīkṣā* experience their power in the Īśvara and the Vidyā tattva-s. These worlds of pure tattva-s are absolutely beyond the reach of bound selves. These superior experiences in the pure worlds by these selves are not bondage as they are completely free from Karma; they can have these enjoyments as they desire.[3] Actually karma is not the reason for the variety of enjoyments in the pure worlds; only the ripening of *mala* which is inscrutable is the reason for that.[4] According to the intensity of the ripening of *mala* the selves get their enjoyments either in the *Sadāśivatattva* (also technically known as *bhogatattva*) or the Īśvara or *Vidyātattva-s*.[5] For the objection that ripening of mala can be effected only by experiencing the fruits of karma which leads to the fallacy of mutual dependency (*anyonyāśraya*), it is answered that karma is exhausted either by intense knowledge related to Śiva or by practice of Yoga culminating in deep meditation or by intense renunciation (*saṃnyāsat*) or even by destruction of accumulated karma (*saṃcitakarma*) leading to the destruction of the fruits of those karma that have started giving their fruits (*prārabdhakarma*) finally culminating in the bondages

---

1. Pauṣkarāgama, 2: 34ab.
2. वस्तुरूपा: कला ज्ञेया: शब्दरूपा: पुरोदिता:।
   Cited by Umāpati in his vyākhyā on ibid.
3. Pauṣkarāgama, 2: 42
4. Ibid. 2: 47cd-48ab
5. Ibid. 2: 48cd-49ab

effected by Kalā, etc. Through all these the mala ripens.[1] Śiva according to His will grants various enjoyments to those higher selves in the pure worlds. For this Śiva cannot be faulted to be partial. For, only when He grants them misery He may be blamed. But Śiva grants those selves only happiness and supreme bliss[2] and the pure worlds are characterized by supreme unalloyed bliss. It is also to be noted that Śiva's command or will cannot be transgressed by anybody.[3] For, without depending on the karma,etc. Śiva bestows His grace on those higher selves such as the vijñānākala, etc. There are such tattva-s as kāla, etc. which are pure in these worlds through which these higher selves experience their unalloyed bliss.[4] The main difference between the bound selves [in the impure worlds] and these higher selves such as the vijñānākala, etc. is that while the former are bound by these tattva-s such as kalā, kāla, etc. and therefore dependent, the vijñānākala-s are though endowed with kāla, etc. which are pure and are not binding.[5]

- **Māyā**

The material that creates the psycho-physical body for the embodied beings such that the relation of experiencer and the experienced (*bhogyabhokṛtva*) between the selves and the various objects of enjoyment becomes established and into which all the karma-s of all the selves are embedded [during the great deluge (*mahāpralaya*)], is Māyā.

- **Individual Self (*Paśu*)**

The individual self is bound by the bondage of *paśutva* which restricts its power of knowledge and action forever. It is of three types: sakala, pralayākala and vijñānākala.

- **Bondage (*Pāśa*)**

The entire range of tattva-s from Kalā to the earth (*kṣiti*) makes up the category of bondage for the self.

---

1. Pauṣkarāgama, 2: 51-52
2. Pauṣkarāgama, 2: 54
3. Ibid. 2:55
4. Ibid. 2: 57-58.
5. Ibid. 2: 59-60.

• **Kāraka**

The rite of initiation (*dīkṣā*) which brings forth higher enjoyments (*bhukti*) [in this as well as other worlds] and liberation from bondage (*mukti*) is called the sixth category, kāraka.

The Commentary of Umāpati

Umāpati's commentary is lucid and direct. It explains all the points discussed in the text and adds more informations that are relevant. Umāpati appears to be a highly skilled logician arguing to the hilt of every important point. His argumentative skill is very much evident in commenting on the validity of the Śaivāgama-s, the important question of understanding the meaning of a word, in establishing that Śiva is the sole Agent (*kartā*) though without possessing any physical body and such other related topics. His singular devotion to Śiva and strong conviction becomes evident in his detailed refutation of the vaiṣṇava arguments to show Viṣṇu as the supreme cause. Umāpati seems to be well informed about the Vaiṣṇava arguments such as those found in the *Vedārthasaṃgraha* of Rāmānuja and probably its commentary that try to establish Viṣṇu as the fundamental import of those Upaniṣad-s such as the Atharvaśira, Atharvaśikhā, etc. By ably controverting the opponent's interpretations and refuting their arguments Umāpati firmly establishes the view that Śiva is the supreme cause and the inner controller of all beings as the correct import of the entire scriptural corpus including the Veda-s, Purāṇa- and the Āgama-s. Generally we find Umāpati citing from various Purāṇa-s and more from the Sūtasaṃhitā but less from the Śaivāgama-s.

Jñānaprakāśa's Commentary Vṛtti

Jñānaprakāśa presents some contrast from Umāpati. His commentary is at some places too brief and at other places very elaborate. Further he seems to be fond of employing long compounds which makes the comprehension of the meaning slightly difficult. Jñānaprakāśa is also a great logician and it is evident in his commentary at many places. He mainly cites from the Śaivāgama corpus. He seems to be a staunch critic of Advaita Vedānta especially its view of illusoriness of all phenomena (māyāvāda). It is interesting to note that both Umāpatia and Jjānaprakāśa cite large

chunks of passages from the *Ratnatraya* of Śrīkaṇṭha (circa 9th century) which is one of the early Śaivasiddhānta philosophical manuals mainly dealing with the three important concepts, Śiva, Śakti and Bindu.[1] Jñānaprakāśa's commentary is very detailed at some places explaining the intricacies of the pure tattva-s such as the Sadāśiva, Īśvara, etc.

---

1. बिन्दुशक्तिशिवाख्यानि त्रीणि सिद्धान्तसागरात्।
समुद्धृत्य सतां धर्तुं हृत्कण्ठश्रवणे सदा।। –Ratnatraya, 2.
See T. Ganesan & R. Satyanarayanan, (forthcoming): Ratnatraya of Śrīkaṇṭha along with the commentary Ullekhinī of Aghoraśiva, critical edition with English translation and notes.

पौष्करागमः

ज्ञानपादः

उमापतिशिवज्ञानप्रकाशाचार्यकृताभ्यां व्याख्यावृत्तिभ्यां संवलितः

उमापतिशिवव्याख्या

वन्दे विश्वेश्वरं देवं भवानीं भवनाशिनीम्।
विघ्नराजं महासेनमपि वागीश्वरीं गुरून्।।
वन्दे शिवं शक्तियुतं सत्यज्ञानसुखात्मकम्[१]।
यत्कृपामृतवर्षेण भवन्ति पशवः शिवाः।।

यः शक्त्या क्षोभ्य मायायुगलपरिणतिं भोग्यजालं तदीयैः
देहाद्यैर्भोजयित्वा त्रिविधमणुगणं[२] कर्मवाञ्छानुरूपम्।
शक्तिं पक्वाणवेऽस्मिन् तदनु करुणया पातयन् बन्धमोक्षं[३]
कुर्वन् दीक्षाख्यशक्त्या स्फुटयति शिवतां पातु सोऽयं शिवो नः।।

विश्वेश्वरं प्रणम्यादौ विश्वमूर्तिमुमापतिम्।
पौष्करे ज्ञानपादांशं व्याख्यास्येऽहमुमापतिः।।

अथ जगति मलत्रयपिहितदृक्क्रियतया दुस्तरतरभवजलधिमध्यनिमग्नानां तदुत्तरणोपायम्[४] अजानतामखिलानां प्राणिनां अनुग्रहाय परमकारुणिको भगवान् परमशिवः कामिकादिवातुलान्तान् दिव्यागमान् नादाद्यात्मतया[५] प्रणिनाय। तदनु भगवान् सदाशिवोऽपि नादाद्यात्मतया[६] आगतं तदेव तन्त्रम्[७] अनेकछन्दोरूपेण विभज्य कामिकादिसंहिताक्रमेण प्रणवादिभ्यो दशभ्यः शिवेभ्यः अष्टादशभ्यः[८] रुद्रेभ्यश्च उपदिष्टवान्। इदं च तन्त्रावतारे

---

१. सत्यज्ञानसुखात्मकम्] क१, मु, क३; सर्वज्ञानसुखात्मकम्-क२
२. त्रिविधमणुगणं] मु, क२, क३; त्रिविधमणुगुणं- क१;
३. बन्धमोक्षं] क१, मु, क३; यः समोक्षः- क२
४. तदुत्तरणोपायम्] मु, क३; तदुत्तरेणोपायम्- क१, क२;
५. कामिकादिवातुलान्तान् दिव्यागमान् नादाद्यात्मतया] क१, मु, क३; कामिकादिवातुलान्तागमानाम् अनाद्यात्मकतया- क२
६. नादाद्यात्मतया] क१, मु, क३; नादाद्यात्मकतया- क२
७. तन्त्रम्] मु, क२, क३; मन्त्रम्- क१;
८. अष्टादशभ्यः] क१, क२, क३; अनन्तादिभ्योऽष्टादशभ्यः-मु

श्रीज्ञानप्रकाशवृत्तिः

गणेशं सानुजं साम्बं शिवं वागीश्वरीं गुरून्।
प्रणम्य[१] पौष्करीं व्याख्यां विद्यांशां तु करोम्यहम्।।

अथ स शिवः स्वतः शिवंकरः स्वशिवत्वतिरस्कर्तृमलरुङ्मतां मुक्तये ततस्सूपायमविन्दतां पुंसाम् परिणतिमतिमले[२]ऽनुग्रहार्थं पञ्चमन्त्रतनुः श्रीमान् परमेशः पारमेश्वरं नाम गीतं[३] तन्त्रम् अनुष्टुप्छन्दसा कोटिसंख्यया निबद्ध्वा [४]विद्याराजाधिराजस्य अनन्तस्योपदिष्टवान्। तदनु हि तेन[५] तदिदं लक्षसंख्यया संगृह्य श्रीमत्[६] श्रीकण्ठायोपदिष्टम्। तेन संक्षिप्य पुनः पौष्करनाम्नापि गीतम्। तदुपदिशतः श्रीकण्ठपरमेश्वरात् सनकादयो ऋषयः क्रियाचर्याख्यपादद्वयमुपश्रुत्य सुनिर्वर्तनीयमधुनास्ति हि ज्ञानपादेनेति पत्यादिषट्पदार्थस्वरूपनिरूपणात्मकं[७] ज्ञानपादमुपश्रोतुकामा गुरोरामन्त्रणं स्तुतिरूपमेव मङ्गलकरमिति मन्यमानास्तदाभिमुख्यं[८] सम्पादयन्तस्तथा तम् आमन्त्रयन्ति[९]--

ऋषय ऊचुः-

भगवन् देवदेवेश ब्रह्मविष्णिवन्द्रनायक।
आपिङ्गलजटाजूटारोपितार्धेन्दुशेखर ।।१।।
व्याघ्रचर्मपरीधान तदूर्ध्वं व्यालबन्धन[१०]।
नित्यशत्रुमृगानीकसेव्यमानदयानिधे ।।२।।

---

१. गणेशं ... प्रणम्य पर्यन्तं ज२ मातृकायां लुप्तम्।
२. परिणतिमतिमले] ज२,ज३,ज४,ज५; अपरिणतिमतिमले-ज१
३. पारमेश्वरं नाम गीतं] ज१, ज२; परमेश्वरनामगीतं-ज३,ज४;पारमेश्वरनामगीतं-ज५
४. विद्याराजाधिराजस्य ... तदुपदिशतः पर्यन्तं ज४ कोशे नास्ति।
५. तेन] ज१, ज२, ज५; ते-ज३
६. अनन्तस्योपदिष्टवान्। तदनु हि तेन तदिदं लक्षसंख्यया संगृह्य श्रीमत्-ज२ मातृकायामयं भागो लुप्तः।
७. पत्यादिषट्पदार्थस्वरूपनिरूणात्मकं ज्ञानपादं-] ज५; पत्यादिषट्पदार्थस्वरूपणात्मकं ज्ञानपादं- ज१; पत्यादिषट्पदार्थस्वरूपनिरूणात्मकज्ञानपादं- ज२; षट्पदार्थस्वरूपनिरूपणात्मकं-ज३,ज४
८. आमन्त्रणं स्तुतिरूपमेव मङ्गलकरमिति मन्यमानास्तदाभिमुख्यं- ज१,ज३,ज४,ज५; अयं भागः ज२मातृकायां नास्ति।
९. आमन्त्रयन्ति] ज१, ज२,ज४,ज५; आश्रयन्ति-ज३
१०. तदूर्ध्वं व्यालबन्धन] क१; तदूर्ध्वव्यालबन्धन- मु, क२, क३

ललाटनेत्रसप्तार्चिर्दग्धत्रिपुरमन्मथ ।
अम्भोधिमथनोद्भूतविषनीलितकन्धर ।। ३ ।।
क्रियाचर्ये प्रसादेन तवास्माभिः श्रुते पुरा।
अधुना ज्ञानपादं तु श्रोतुमिच्छा गरीयसी।। ४।।
वर्तते तामपाकर्तुमर्हस्यस्माकमीश्वर।

(व्याख्या) ऋषय ऊचुरित्यत्र प्रणतिरस्ति[१]। तत्र भगवान्[२] भगः षाड्गुण्यं[३] तदुक्तं विष्णुपुराणे–

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा।। इति।

तेन नित्ययुक्तः। मतुब् नित्ययोगे[४]। ऐश्वर्यादीनां च ईश्वरैकनिष्ठत्वं श्रुतिसिद्धम्। तदुक्तं सुदर्शनाचार्यैः–

ऐश्वर्यमर्ग्यमनुपाधिमती च लक्ष्मीर्ज्ञानं तु[५] वीर्ययशसी च विरागता च
एते गुणाः षडपि ते भगसंज्ञयोक्ताः सन्तीत्यनेन भगवन् भगवानसि त्वम्।
ऐश्वर्यमीश्वरपदश्रुतिरुग्रशब्दो वीर्यं यशः शिवपदं तु[६] तवाभिधत्ते
सर्वज्ञकामरिपुशब्दसमुत्थितौ च सार्वज्ञ्यरागविरहौ भवतः पुरारे।।
अर्थश्रिया शिव न कोऽपि विरज्यतस्ते श्रेष्ठस्तया त्वमसि दाशतयीभिरुक्तः। इति।

यद्यपि शिवादन्यत्रापि भगवच्छब्दः तत्र तत्र प्रयुज्यते तथापि तत्र भगवच्छब्दो न षाड्गुण्यवत्परः। किन्तु

उत्पत्तिं च विनाशं च भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्यां च स वाच्यो भगवान्।

इति वचनात् ईश्वरप्रसादप्राप्तज्ञानोत्कर्षादिमत्परः। अन्यथा ईश्वरानीश्वरविभागानुपपत्तेः। देवाश्च देवाश्च आजानदेवाः[७] कर्मदेवाः तेषामीश नियामक। ब्रह्मा च विष्णुश्च इन्द्रश्च ब्रह्मविष्णिवन्द्राः चतुर्मुखनारायणपुरन्दराः तेषां नायको नेता तस्य सम्बुद्धिः। अथवा देवेति भिन्नं पदम्[८]। दीव्यतीति

---

१. प्रणतिरस्ति] क१, क३; वाक्यमिदं मु कोशे नास्ति। प्रणतिः– क२
२. भगवन्] क३; भगवान्– क१, क२
३. भगः षाड्गुण्यं] क१, मु; भगवद्षाड्गुण्यं– क२
४. नित्ययुक्तः मतुब् नित्ययोगे] क१, मु; नित्ययुक्त मतुब यन्नित्ययोगे– क२
५. च] क२, क३; तु– क१, मु;
६. तु] क१, मु; च– क२, क३
७. आजानदेवाः] सम्पादकीयः पाठः; अजानदेव– क१; आजानदेवः– क२;आजानदेव–मु, क३;
८. भिन्नं पदम्] क१, क३, मु; भिन्नपदम्– क२

देवः स्वानन्दपरिपूर्णः नित्यतृप्त इत्यर्थः। देवेशा देवानां[१] वासवादीनां[२] ईशा अधिपतयो ये ब्रह्मादयः तेषां नायकेत्यर्थः। ऐश्वर्यादिकं विभूतिं चोक्त्वा मूर्तिवैराग्यादिकं[३] चाह–

आपिङ्गलेत्यादिविषनीलितकन्धरेत्यन्तेन। आ समन्तात् पिङ्गलो जटानां जूटो बन्धः कपर्द इति यावत्। तत्रारोपितः इन्दोरर्धः अर्धेन्दुः अर्धश्चासाविन्दुश्च अर्धेन्दुः स एव शेखरः शिरोभूषणं यस्य सः तथोक्तः। व्याघ्राकारस्य दैत्यस्य चर्म त्वगेव परिधानमन्तरीयं यस्य तथोक्तः। तस्योर्ध्वं तस्य परिधानस्योर्ध्वम् उपरि व्यालः सर्पः एव बन्धनं बन्धनसूत्रं यस्य तथोक्तः। अत्र वृत्तिनिमग्नस्यापि परीधानशब्दस्य[४] "अथ शब्दानुशासनम् केषां शब्दानाम्" इत्यादिवत् बुद्ध्या प्रविभज्य परामर्श इति द्रष्टव्यम्। नित्यशत्रवः जातिशत्रवः गजसिंहादयः ते च ते[५] मृगाश्च परमानन्दाभिव्यञ्जकस्वरूप–सान्निध्यातिशयमहिम्ना विगलितवैराणां तेषां मृगाणां यः समूहः तेन सेव्यमान। अथवा नित्यं शत्रुभिः प्रेरितेन मृगेण तादृशैः भूतानीकैश्च सेव्यमान। अत्र[६] हेतुः दयानिधिरिति[७]। दयाया निधिः[८] अनेन सर्वशरण्यत्वमुक्तम्। ललाटे यन्नेत्रं तस्मादुद्भूतेन सप्तार्चिषा दहनेन दग्धौ त्रिपुरमन्मथौ येन स तथोक्तः। अनेन सर्वदुरितनिवर्तकत्वं सूच्यते। अम्भोधिः क्षीरसमुद्रः तस्य मथनेन उद्भूतम्[९] उत्पन्नं कालकूटाख्यं विषं तेन[१०] नीलीकृता कन्धरा[११] यस्य तथोक्तः। अनेन सर्वानुग्राहकत्वमुक्तम्। अत्र एतैर्विशेषणैः यथाक्रमम् ऐश्वर्यज्ञानवीर्यश्रीवैराग्ययशसां प्रतिपादनमुखेन भगवच्छब्दवाच्यत्वं परमेश्वरस्यैवेति प्रतिपादित इत्यपि द्रष्टव्यम्। एवं स्तुत्वा भगवन्तं गुरुमभिमुखीकृत्य वृत्तानुवादपुरःसरं वर्तिष्यमाणविषयमभिलाषम्[१२] आवेदयन्ति क्रियाचर्ये इत्यादिना। हे ईश्वर तव प्रसादेन श्रवणादिप्रयोजकदीक्षारूपानुग्रहेण अस्माभिः[१३] पुरा क्रियाचर्यापादौ श्रुतौ एतच्चोपलक्षणं योगपादश्रवणस्यापि। अत्र क्रियापादो नाम मुद्रामण्डलादीनां लक्षणनिरूपणरूपशास्त्रभागः[१४]। चर्यापादस्तु समयाचारादिलक्षणनिरूपणात्मा। तदुक्तं श्रीमन्मतङ्गे–

---

१. देवानां] क१, क३,मु; देवादीनां– क२
२. वासवादीनां] क१, क३ मु; वस्वादीनां– क२
३. मूर्तिवैराग्यादिकं] मु, क३;मूर्तिं वैराग्यतां वैराग्यादिकं– क१, क२;
४. परीधानशब्दस्य] मु; परीधानस्य– क१, क२, क३;
५. ते] क१, क३, मु; क२ कोशे नास्ति।
६. अत्र] मु; तदुक्तमत्र– क१, क२, क३
७. दयानिधे इति] क२; दयानिधिरिति– क१,मु;
८. दयाया निधिः, क१; दयाया निधिःदयानिधिः– मु; दयानिधिः– क२
९. मथनेन उद्भूतम्] क१, क३, मु; मथनोद्भूतम्– क२
१०. तेन] क१, क२, क३; तेन नीलितः– मु
११. नीलीकृता कन्धरा] क१, क२, क३; नीलीकृतः कन्धरो– मु
१२. वर्तिष्यमाणविषयमभिलाषम्] क२, क३;वर्तिष्यमाणविषयाभिलाषम्– क१, मु
१३. अस्माभिः] क१, क२, क३; अत्रार्थे श्रुतिरस्ति। अस्माभिः– मु
१४. लक्षणनिरूपणरूपशास्त्रभागः] क१, क३, मु; लक्षणनिरूपणशास्त्रभागः–क२

मुद्रामण्डलमन्त्राणां लक्षणं साधकात्मनाम्।
आचार्याणां च विधिवत् सर्वानुग्रहलक्षणम्।

क्रियापादः स विज्ञेयः। इति।

समयाचारसद्वादस्थितिस्त्वाम्नायलक्षणः ।

चर्यापादः समुद्दिष्टः। इति च।

अधुना ज्ञानपादं श्रोतुं गरीयसी उत्कटा इच्छा अस्माकं वर्तते। तामिच्छां ज्ञानपादोपदेशेनापाकर्तुं निवर्तयितुं विषयलाभेन पूरयितुमिति यावत्। अर्हसीत्यनेन ज्ञानपादमुपदिशेति[१] प्रार्थना गम्यते।

(वृत्तिः) भगवन्निति। भगः अभिव्यक्तशुद्धविद्यालक्षणसर्वज्ञानालयान्तस्समुज्वलतनुत्वात्[२] सर्वज्ञत्वब्रह्माण्डान्तरितसर्वकर्तृत्वात्मकमैश्वर्यं तदस्यास्तीति तथेति। तथाभूतस्यामन्त्रणम्[३]। निरतिशयाचिन्त्याणिमादिकमस्ति यद्यपि शिवत्वव्यक्तिमति श्रीकण्ठनाथेन श्लाघनीयं तदित्युपेक्षितम्। यद्यपि पुनः

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा[४]।।

भग शब्दस्य षडर्थवाचकत्वेन वर्तमानत्वात् अस्मदादीनाम्[५] इदमन्यतमस्य वैराग्यज्ञान-सम्पन्नस्यामन्त्रणं स्यात्। अतस्तदिदं देवदेवेति। शिवत्वलक्षणतेजसा देवनशीलत्वाद्देवः। तथाभूतं तस्यामन्त्रणम्। यद्यपि पुनर्देवशब्दस्यानियमवृत्तित्वात् स्वर्लोकनिवासिनामिदमन्यतमस्यामन्त्रणं स्यात्। अतस्तदिदं देवदेवेशेति। देवानामीश आज्ञापकः स तथोक्तः तथाभूतस्यामन्त्रणम्। यद्यपि पुनस्तत्त्वमस्तीति स्वयम्भ्वादीनामिदम् अन्यतमस्यामन्त्रणं स्यात्[६]। अतस्तदिदं ब्रह्मेत्यादि। ब्रह्मविष्णिवन्द्राणां नायको नेता स[७] तथोदितस्तथाभूतस्यामन्त्रणम्। यद्यपि पुनरविभागेन[८] देवदेवाः कुबेरादयः सप्त ईशो महेश्वरो ब्रह्मविष्णिवन्द्राश्च श्रीमन्मृगेन्द्राद्युक्तवत् स्वस्वशिखरेषु नायकत्वेन यत्र विद्यन्ते तथोदितः स महामेरुः। तत्र भगवच्छब्दप्रवृत्तेरपि सम्भवात्। देवतात्वेन तदर्हत्वात्

---

१. ज्ञानपादमुपदिशेति] क१, क२; अस्माकं ज्ञानपादमुपदिशेति- मु, क३
२. भगवन्निति। भगः अभिव्यक्तशुद्धविद्यालक्षणसर्वज्ञानालयान्तस्समुज्वलतनुत्वात्] ज१,ज३,ज४,ज५; ज्वलतनुत्वात्- ज२
३. तथा भूतस्यामन्त्रणं] ज१; तथाभूतं तस्यामन्त्रणं- ज२,ज३,ज४,ज५
४. ईरणा] ज२; श्रुतिः- ज१, ज३, ज४, ज५ पश्यत विष्णुपुराणम् ६रू५रू७४
५. भग शब्दस्य षडर्थवाचकत्वेन वर्तमानत्वात् अस्मदादीनाम्- ज१,ज३,ज४, ज५; .... - ज२
६. यद्यपि पुनस्तत्त्वमस्तीति स्वयम्भ्वादीनामिदमन्यतमस्यामन्त्रणं स्यात्-ज१,ज३,ज४,ज५; वाक्यमिदं ज२ कोशे नास्ति।
७. नेता सः] ज२,ज३;नेता- ज१,ज४,ज५;
८. पुनरविभागेन] ज१,ज२,ज४,ज५; पुनरस्ति विभगेन-ज३

तथाभूतस्य[१] आमन्त्रणद्वयं स्यात्। अतस्तदिदमापिङ्गलेत्यादि[२]। आपिङ्गला आसमन्तात् पीतीभूता जटानां चूडा बन्धः कपर्द इति यावत्। तत्रारोपितम् अर्धमिन्दोरर्धेन्दु[३] तदेव शेखरः[४] शिरोभूषणम् तथोक्तः तथाभूतं तस्यामन्त्रणम्[५]। [६]अथ च पुनरापिङ्गलजटचूडा इव चूडास्तदुपलक्षितानि शिखराणि यस्य स तथेति तथा भूतं तस्यामन्त्रणमिति च अभिनवकविभिरौन्नत्यसूचनार्थमारोपितो[७] मेरोरर्धो यस्य सः आरोपितार्धः[८] इन्दोः शेखरः शिरोभूषणं यस्य मेरोः स तथेति तथा भूतस्यामन्त्रणमिति च। पुरोक्तस्यैव मेरोः विभज्यामन्त्रणद्वयं[९] स्यात्। अतस्तदिदं व्याघ्रेत्यादि। व्याघ्रस्य चर्म यद्[१०] अजिनं तदेव परीधानं वस्त्रं यस्य स तथोक्तः तथा भूतं तस्यामन्त्रणम्। अपि च पुनर्मत्वथह्नयोऽच्प्रत्यय[११] इति कृत्वा व्याघ्राः पुण्डरीकाश्च चर्मपरीधाना[१२] यतीश्वराश्चात्र विद्यन्त इति स तथेति तथाभूतं[१३] पुरोक्तस्यैव मेरोरामन्त्रणं स्यात्। अतस्तदिदं तदूर्ध्वं व्यालबन्धनेति। तस्माद् अजिनाम्बरादूर्ध्वम्[१४] उपरि तदूर्ध्वं व्यालस्य सर्पस्य बन्धनं निबन्धनं यस्य स तथोक्तस्तथा भूतं तस्यामन्त्रणम्। तथापि पुनस्तस्मात् प्रागुक्तयतिनिवासस्थानादूर्ध्वं[१५] तदूर्ध्वं[१६] त्रिपुरदहनार्थं धनुर्भूतीकर्तुं ज्यारूपीकृतस्य व्यालस्य बन्धनं निबन्धनं यस्य स तथोक्तस्तथा भूतं पुरोक्तस्यैव मेरोरामन्त्रणं स्यात्। अतस्तदिदं नित्यमित्यादि। नित्यं सदा शत्रुभिः अरिभिः[१७] प्रेरितेन मृगेण कुरङ्गेण[१८] तादृशैर्मृगभूतानामनीकैश्च सेव्यमानः स चासौ दयानिधिः करुणाकरश्च स

---

१. भगवच्छब्दप्रवृत्तेरपि सम्भवात्। देवतात्वेन तदर्हत्वात् तथाभूतस्य] ज१; भगवच्छब्द- ज२;भगवच्छब्दप्रवृत्तेरपि सम्भवात्। देवतात्वेन तदर्हत्वात् तथाभूतं-ज३,ज४,ज५

२. अतस्तदिदमापिङ्गलेत्यादि] ज१,ज३,ज४,ज५; आपिङ्गलेत्यादि-ज२

३. अर्धमिन्दोरर्धेन्दु] ज३;अर्धमिन्दोरर्धेन्दुः- ज१,ज२,ज४; अर्धमिन्द्रेन तर्धेन्द्र-ज५

४. शेखरः] ज२,ज३,ज४,ज५; शेखरं- ज१;

५. शिरोभूषणम् यस्य तथोक्तः। तथाभूतं तस्यामन्त्रणम्।] ज२,ज३,ज४;शिरोभूषणम्-ज१; शिरोभूषणम् यस्य तथोदितस्तथाभूतं तस्यामन्त्रणम्- ज५

६. अथ च पुनरापिङ्गलजटचूडा इव चूडास्तदुपलक्षितानि-ज४ कोशे नास्ति।

७. तथा भूतं तस्यामन्त्रणमिति च अभिनवकविभिरौन्नत्यसूचनार्थमारोपितो- ज१,ज३,ज४,ज५; अयं भागः ज२ कोशे लुप्तः।

८. यस्य सः आरोपितार्धः- ज१,ज३,ज४,ज५; ज२ कोशे लुप्तः।

९. विभज्यामन्त्रणद्वयं] ज१,ज३,ज४,ज५; . . . . द्वयं- ज२

१०. चर्म यद्] ज१,ज३,ज४,ज५; चर्ममयम्- ज२

११. तथा भूतं तस्यामन्त्रणम। अपि च पुनर्मत्वथह्नयोऽच्प्रत्ययः- ज१,ज३,ज४,ज५; ज२ कोशे नास्ति।

१२. चर्म परीधाना] ज३,ज४;चर्ममपरिधाना-ज१,ज२,ज५;

१३. तथाभूतं] ज१,ज२,ज४,ज५; तथास्त्रमयस्य स तथोक्तस्तथाभूतं-ज३

१४. अजिनाम्बरादूर्ध्वम्] ज१,ज३,ज४,ज५; अजिनादूर्ध्वम्- ज२

१५. उपरि तदूर्ध्वं व्यालस्य . . . यतिनिवासस्थानादूर्ध्वं पर्यन्तं ज३ काशे नास्ति।

१६. तथापि पुनस्तस्मात् प्रागुक्तयतिनिवासस्थानादूर्ध्वं तदूर्ध्वं] ज१,ज४; ज२ कोशे नास्ति।; तथापि पुनस्तस्मात् प्रागुक्तयतिनिवासस्थानादूर्ध्वं-ज५

१७. अरिभिः- ज२,ज३,ज४,ज५;करिभिः- ज१;

१८. कुरङ्गेण- ज१,ज३,ज४,ज५; ज२ कोशे नास्ति।

तथोक्तस्तथाभूतं तस्यामन्त्रणम्[१]। यदि च पुनः नित्यं शत्रुतया वर्तमानगजसिंहादिमृगाणाम् महद्दर्शनमहिम्ना[२] विगतमत्सराणामनीकः समूहः तेन सेव्यमानदयानिधयो[३] महर्षयो यत्र[४] विद्यन्ते स तथोक्तस्तथाभूतं पुरोक्तस्यैव मेरोरामन्त्रणं स्यात्। अतस्तदिदं ललाटेत्यादि। ललाटे यन्नेत्रं तस्मादुद्भूतेन सप्तार्चिषा दहनेन दग्धौ त्रिपुरमन्मथौ[५] येन स तथोक्तः। तथाभूतं तस्यामन्त्रणम्। त्रिपुरविषये ललाटेत्युपलक्षणम्। अथ च पुनः ललाटनेत्रसप्तार्चिर्दग्धोऽनङ्ग इति यावत्। त्रीणि स्ववशीकृतानि पुराणि भुवनानि यस्य स त्रिपुरः स चासौ मन्मथ पञ्चशरो रम्यप्रदेशत्वात् सुरतनिमित्तं यत्र स तथोक्तस्तथाभूतं पुरोक्तस्यैव मेरोरामन्त्रणं स्यात्। अतस्तदिमम्भोधीत्यादि।[६] अम्भांसि अम्बूनि धीयन्तेऽस्मिन्नित्यम्भोधिः। जात्युपलक्षणतया क्षीरसमुद्र उच्यते। ततो मथनेन मन्दरभ्रमणेन[७] उद्भूतेन उत्पन्नेन विषेण गरलेन नीलितोऽसितीकृतः कन्धरः शिरोधरो यस्य स तथा भूतम् तस्यामन्त्रणम्[८]। ईदृशभगवन्नित्यनुषङ्गः। न चात्रापि विकल्प्यताम् इति वाच्यम्। न निबन्धनम्[९] इति विफलत्वात्। तदुक्तम् – नर्ते प्रयोजनादिष्टं मुख्यशब्दार्थलङ्घनम्[१०]।

एवं स्मरपुरदहनादिविशेषणेन विद्येश्वरयोगीश्वरमध्यपठितश्रीकण्ठद्वयात् विशिष्टं ब्रह्माण्डान्तरितब्रह्मविष्णुपुरोपरिवर्तिशिवलोकनिवासिनं शिवं शिवत्वदातारं श्रीकण्ठनामानं गुरुमामन्त्र्य किमर्थमहम् आमन्त्रितस्तद्वक्तव्यमिति[११] सर्ववित्तमत्वेऽपि तदनुपलब्धिमदुक्त्या व्यवहाररीतिं दर्शयता भगवताऽनुज्ञाताः पुनरामन्त्र्य स्वाभिप्रायमतिमुदाऽऽविष्कुर्वन्ति[१२]।

हे ईश्वर! त्वमर्हसि किं कर्तुमित्याकाङ्क्षायामाहुः। अस्माकमिच्छा अभिलाषापरनाम्नी मनोवृत्तिर्वर्तते प्रवृत्ता भवति[१३]। तामपाकर्तुं[१४] निवर्तयितुं विषयलाभेन पूरयितुमिति यावत्। नन्वत्र

---

१. स चासौ दयानिधिः करुणाकरश्च स तथोक्तस्तथाभूतं तस्यामन्त्रणम्] ज१,ज३,ज४,ज५; स चामन्त्रणम्-ज२
२. महद्दर्शनमहिम्ना] ज१,ज२,ज३,ज४; महर्दर्शनमहिम्ना-ज५
३. सेव्यमानदयानिधयो] ज१,ज३,ज४; सेव्यमाना दयानिधयो- ज२
४. यत्र] ज१,ज२,ज३,ज४; अत्र-ज५
५. तस्मादुद्भूतेन सप्तार्चिषा दहनेन दग्धौ त्रिपुरमन्मथौ- ज१,ज३,ज४,ज५; ज२ कोशे नास्ति।
६. पुरोक्तस्यैव मेरोरामन्त्रणं स्यात्। अतस्तदिमम्भोधीत्यादि- ज१,ज३,ज४; ज२ कोशे नास्ति।
७. मन्दरभ्रमणेन] ज१,ज३,ज४,ज५; मन्थरभ्रमणेन- ज२
८. तथा भूतं तस्यामन्त्रणम्] ज२,ज३,ज५;तथा भूतम् ज१; तथोक्तः तथाभूतं तस्यामन्त्रणम्-ज४
९. निबन्धनम्] ज१, ज२,ज४, ज५; निर्बन्धनम्-ज३
१०. निबन्धनमिति विफलत्वात्। तदुक्तम् – नर्ते प्रयोजनादिष्टं मुख्यशब्दार्थलङ्घनम्] ज१,ज३,ज४,ज५; निर्बन्धलङ्घनम्- ज२
११. आमन्त्रितस्तद्वक्तव्यमिति] ज५;आमन्त्र्यतस्तद्वक्तव्यमिति-ज१, ज२,ज४; आमन्त्र्य तद्वक्तव्यमिति-ज३;
१२. दर्शयता भगवतानुज्ञाताः पुनरामन्त्र्य स्वाभिप्रायमतिमुदा ऽ ऽ विष्कुर्वन्ति] ज१,ज३,ज४,ज५; दर्शयति-ज२
१३. प्रवृत्ता भवति] ज३,ज४,ज५;भवति-ज१,ज२;
१४. तामपाकर्तुं] ज२,ज३,ज४,ज५; प्रवृत्तां तामपाकर्तुं निवर्तते- ज२

दर्शनीयनयेन शुद्धविषयत्वादियमिच्छा शिवरागोपबृंहितशिवशक्ति-वृत्तिव्यक्तचिच्छक्तिवृत्तिरेव किमिति न सोऽर्थस्तथा[१]ऽऽविष्क्रियते। सत्यम्। विविक्ततया प्रायेण विद्यापादैक-वेद्यत्वाद्दर्शनान्तरदृशां तदनवाप्तिमतां[२] महषह्णणां केवलं मनोवृत्तिरिव भासत इति नह्यनुक्तदोषः। विषयलाभेन पूरयितुमिति ज्ञापनार्थम्। सा तु न निर्विषया न निगर्हितविषया वेति निगदन्ति ज्ञानपादं श्रोतुमाकर्णयितुम्। तादृशश्रुतिलक्षणविषया सती तदिन्द्रियद्वारा धिया सपदपदार्थं परिच्छेत्तुं समुद्यमं कुर्वती भवतीति[३] यावत्।

नन्वत्र शिवदर्शनेन सह शिवत्वव्यक्तिदशिवत्वपशुत्वविवेकस्य[४] अपि कर्तव्यात्वादिच्छेयं श्रुतपदवाक्यार्थं शुद्धविद्योपबृंहितप्रध्वस्तरजस्तमोगुणबुद्धिसमधिष्ठातृशिवशक्तिवृत्ति-व्यक्तचिच्छक्तिवृत्त्या[५] विविच्य समुपलब्धुं समुत्सहत इति श्रीमन्मतङ्गाद्युक्तवत् प्रदर्शनीयम्। तदित्थं[६] किमिति न प्रदर्शितम्[७]। सत्यम्। ऋषयः शिवप्रयुक्ततच्छुद्धविद्यालिङ्गित-चिद्दृशोऽप्यविदितविद्यापादार्थाः ते वयं तच्छुद्धविद्यालिङ्गितचिद्दृश इति न जानन्तीति न ह्यनुक्तदोषः। अनिन्दितविषयाऽपि यद्यल्पीयसी न तद्वतामुपदेष्टुं युक्तमिति भगवदुक्तिनिर्गमनात् पूर्वं[८] त्वरन्तस्तद्गुरुतरत्वं[९] प्रदर्शयन्ति-गरीयसीति। यद्यपि गुरुतरा[१०] न ह्यदीक्षितानामुपदेष्टुं युक्तमिति। भगवदुक्तिनिर्गमनोपशान्तये पुरेति स्मारयन्तः तदस्तित्वं निवेदयन्ति। पुरा पूर्वं तव ते प्रसादेन श्रवणादिप्रयोजकदीक्षारूपानुग्रहेण अस्माभिः क्रियाचर्ये क्रियाचर्यापादौ श्रुते श्रुतौ। तु[११] शब्दोऽवधारणे। अधुना इदानीम् अवशिष्टश्रुतिविषयेति[१२] नात्र विकल्पः क्रियतामित्यर्थः। ततस्ते

---

१. सोऽर्थस्तथा] ज३,ज४; सोऽन्तस्तथा-ज१,ज२; सोऽर्थिपरनाम्नी मनोवृत्ति ते प्रवृत्ता भवति तथाविष्क्रियते -ज५

२. निवर्तयितुं विषयलाभेन ... विद्यापादैकवेद्यत्वाद्दर्शनान्तरदृशां तदनवाप्तिमतां-ज१,ज३,ज४,ज५; ज२ कोशे अयं भागः नास्ति।

३. सा तु न निर्विषया न निगर्हितविषया वेति निगदन्ति ज्ञानपादं श्रोतुमाकर्णयितुम्। तादृशश्रुतिलक्षणविषया सती तदिन्द्रियद्वारा धिया सपदपदार्थं परिच्छेत्तुं समुद्यमं कुर्वती भवतीति] ज३,ज४;सा तु निर्विषया न निगर्हितविषया वेति निगदन्ति ज्ञानपादं श्रोतुमाकर्णयितुम्। तादृशश्रुतिलक्षणविषया सती तदिन्द्रियद्वारा धिया सपदपदार्थं परिच्छेत्तुं समुद्यमं कुर्वन्ति भवतीति- ज१,ज५; सा तु न निर्विषया न निगर्हितविषयवतीति यावत् - ज२;

४. शिवत्वव्यक्तिदशिवत्वपशुत्वविवेकस्य] ज१,ज३,ज४; शिवत्वव्यक्तिदर्शवत्वपशुत्वविवेकस्य-ज२,ज५

५. शुद्धविद्योपबृंहितप्रध्वस्तरजस्तमोगुणबुद्धिसमधिष्ठातृशिवशक्तिवृत्तिव्यक्तचिच्छक्तिवृत्त्या] ज१, ज३, ज४, ज५; शुद्धविद्योपबृंहितपृथ्वव्यक्तिवृत्त्या- ज२

६. तदित्थं] ज१,ज३,ज४,ज५; तदित्यर्धं- ज२

७. न प्रदर्शितम्] ज१,ज३,ज४,ज५; प्रदर्शितम्-ज२

८. न तद्वतामुपदेष्टुं युक्तमिति भगवदुक्तिनिर्गमनात् पूर्वं- ज२ कोशे लुप्तम्।

९. त्वरन्तस्तद्गुरुतरत्वं] ज१,ज२,ज४,ज५; त्वनन्तस्तद्गुरुतत्त्वं-ज३

१०. गुरुतरा] ज१,ज४,ज५; गुरुतरं- ज२;गुरुता-ज३

११. अस्माभिः क्रियाचर्ये क्रियाचर्यापादौ श्रुते श्रुतौ तु- ज२ कोशे लुप्तम्।

१२. अवशिष्टश्रुतिविषयेति] ज३,ज५; अविशिष्टश्रुतिविषयेति- ज१; अवशिष्टविषयेति- ज२;प्रसादेन

भविष्यद्भवतेति पदेन नः किमिति न त्वं तदुपदेष्टासीति सूचयन्तः साधनविषया सती साध्यविषयेच्छेति[१] च विनिवेदयन्ति।

—•—

(व्याख्या) एवं प्रार्थनापूर्वकं ज्ञानपादश्रवणस्य स्वाधिकारपरिपालनं परिपालनद्वारा[२] परानुग्रहः स्वेषां मुक्त्यभिव्यक्ती च प्रयोजनानीत्याह[३]–

अधिकारे वयं देव नियुक्ता भवता यतः।।५।।
ज्ञानसाध्योऽधिकारो हि मुक्तिश्च व्यक्तिरीश्वर।

(व्याख्या) हे देव भवता वयं यतः यस्मात् कारणात् अधिकारे आचार्यके नियुक्ताः तदर्थं ज्ञानपादस्यापि श्रवणमावश्यकमित्यर्थः। तदेवोपपादयति ज्ञानेति। अधिकारः आचार्यकं हि यस्मात् कारणात् ज्ञानसाध्यः ज्ञायतेऽनेनेति ज्ञानं शास्त्रं चतुष्पादात्मकशास्त्रश्रवणसाध्य इत्यर्थः। अत्रार्थे श्रुतिरस्ति। अध्वादीनामपरिज्ञाने तच्छोधनात्मकदीक्षायाः कर्तुमशक्यत्वादिति भावः। तदुक्तं द्विशतिकालोत्तरे आचार्यलक्षणे–

क्रियापादेषु कुशलः चर्यापादे कृतश्रमः।
योगपादे कृताभ्यासो ज्ञानपादानुरञ्जकः। इति।

यस्मात् कारणात् मुक्तिः मलत्रयबन्धनिवृत्तिः व्यक्तिः[४] शिवत्वाभिव्यक्तिः द्वे च शास्त्रसाध्ये तदभावे तदभावादिति भावः। अस्मिन्नर्थे[५] श्रुतिः प्रमाणं द्रष्टव्यम्। तदुक्तं श्रीमन्मतङ्गे–

अथाणोर्बन्धसोपानपदपङ्क्तिविमुक्तये ।
व्यक्तये च शिवत्वस्य शिवात् ज्ञानं प्रवर्तते। इति।

मृगेन्द्रे च–

सृष्टिकाले महेशानः पुरुषार्थप्रसिद्धये।
विधत्ते विमलं ज्ञानं पञ्चस्रोतोऽभिलक्षितम्। इति।
अतस्तदभिलषतामस्माकं ज्ञानपादं वदेति भावः।

ननु कथमागमानां मुक्त्याद्यलौकिकश्रेयस्साधनत्वे प्रामाण्यम्। तेषां वेदवत् प्रामाण्यनिश्चायक-महाजनपरिग्रहस्य तन्निर्वाहकस्यापौरुषेयत्वप्रयुक्तनित्यनिर्दुष्टत्वस्य चाभावात्। धर्मस्य शब्दमूलत्वात् अशब्दमनपेक्षं स्यात् शास्त्रयोनित्वात् इत्याद्यधिकरणैः[६] धर्मब्रह्मणोरलौकिकश्रेयःसाधनयोः

श्रवणादिप्रयोजकदीक्षारूपानुग्रहेण अस्माभिः क्रियाचये ... इदानीमविशिष्टश्रुतिविषयेति पर्यन्तं भागः ज४ कोशे नास्ति।

१. साध्यविषयेच्छेति] ज२,ज३,ज४, ज५; साध्यविषयश्चेति- ज१
२. स्वाधिकारपरिपालनं परिपालनद्वारा] मु, क३;स्वाधिकारपरिपालनद्वारा- क१, क२;
३. प्रयोजनानीत्याहुः] मु; प्रयोजनानीत्याह- क१, क२, क३;
४. व्यक्तिः] मु, क२, क३;शक्तिः- क१;
५. अस्मिन्नर्थे] क१, क२, क३; अत्रार्थे- मु
६. इत्याद्यधिकरणैः] मु, क३; इत्याद्यधिकरणे- क१, क२;

वैदिकप्रमेयत्वप्रतिपाद्यमानाच्च[१]। न च तथापि स्मृत्यादिवत् वेदमूलकत्वेन[२] प्रामाण्यमागमानाम्। तेषां त्वया वेदमूलकत्वानङ्गीकारात् मन्वादिवत् वेदादर्थं बुद्ध्वा आगमप्रणयने तद्वदेव प्रणेतुरसर्वज्ञत्वाद्यापत्तेश्च। न च लौकिकवाक्यवत् विशिष्टपुरुषकर्तृकत्वेनैव प्रामाण्यम्। अत्र च विशिष्टपुरुषः स्वतः सर्वज्ञ ईश्वर इति वाच्यम्। तथात्वे अन्योन्याश्रयात्। तथाहि–आगमेन सर्वज्ञेश्वरसिद्धौ सत्यां तत्प्रणीतत्वेनागमानां[३] प्रामाण्यसिद्धिः। सिद्धे चागमप्रामाण्ये तेनेश्वरसिद्धिरिति। प्रत्युतागमार्थानुष्ठातघ्नां मूढत्वनरकपातयोः[४] श्रवणात् तदनुष्ठानस्य शापफलत्वश्रवणात् आगमप्रणयनस्य च वृत्त्यर्थत्वश्रवणात् आगमानां मोहकत्वश्रवणाच्चाप्रामाण्यमवसीयते।

तथाहि वासिष्ठलैङ्गे– पाञ्चरात्रं प्रशंसन्तीत्यादिना तान्त्रिकार्थानुष्ठातघ्न् प्रस्तुत्य आचरन्ति महामूढा युगान्ते समुपस्थिते इति मूढत्वेन निन्दा श्रूयते। पाद्मपुराणे वसिष्ठदिलीपसंवादे–

आसीद्राजा चित्रसेनो द्राविडे विषये पुरा।

इत्यारभ्य चित्रसेननाम्नो राज्ञः पाषण्डसंवादेन वैदिकानुष्ठानं परित्यज्य पाशुपतानुष्ठानप्रवृत्तस्य अविन्दन्नरके घोरे सन्तापं यातनात्मकम्।

इत्यन्तेन नरकपातः श्रूयते।

एवं वासिष्ठलैङ्गे–

पुरा शाण्डिल्यसंज्ञस्तु साहसी बुद्धिपूर्वकम्।
परदारान् समागम्य कृत्वा पापानि सन्ततम्।
वासुदेवं कुमार्गेण पूजयामास सुव्रत। इत्यादिना।
इति संचोदिता ब्रह्मन् यमदूता यमेन तु।

चक्रुस्तथैव पापिष्ठमब्दानामयुतं सदा। इत्यन्तेन पाञ्चरात्रानुष्ठानप्रवृत्तस्य शाण्डिल्यस्य नरकपातः श्रूयते[५]।

सूतसंहितायाम् –

पाञ्चरात्रे च कापाले तथा कालामुखेऽपि वा।
शाक्ते दीक्षिता यूयं भवत ब्राह्मणाधमाः।
बौद्धे चाप्यार्हते चैव तथा पाशुपतेऽपि च।
शाम्भवे[६] दीक्षिता यूयं भवत ब्राह्मणाधमाः।

---

१. वेदैकप्रमेयत्वप्रतिपादनाच्च] मु, क२, क३;वैदिकप्रमेयकप्रतिपाद्यमानाच्च-क१;
२. वेदमूलकत्वेन] क२, क३;वेदमूलकत्वेनैव- क१, मु;
३. तत्प्रणीतत्वेनागमानां] क१, क३, मु; तत्प्रणीतत्वेन- क२
४. मूढत्वनरकपातयोः] क१; निर्मूढत्वनरकपातयोः- मु, क३; मूढत्वेन नरकपातयोः- क२
५. श्रूयते] क२; कीर्त्यते- क१, क३, मु;
६. शाम्भवे] क१, क३; शाक्ते च- क२, मु

इत्यादिना तन्त्रार्थानुष्ठानस्य[१] मिथ्याभिशापक्रुद्धगौतमशापफलत्वं श्रूयते।

कौर्मे–

"सर्वे सम्प्राप्य देवेशं शङ्करं विष्णुमेव च" इत्यादिना "वेदमार्गपरिभ्रंशं करिष्यन्ति कलौ युगे" इत्यन्तेन षण्मुनिकृतशापवशात् यजनाद्यनधिकारेण[२] वृत्तिरहितानां वृत्त्यर्थत्वं श्रूयते।

"मोहनानि च शास्त्राणि करिष्यावो वृषध्वज!" इति कौर्मवचनेन आगमानां मोहकत्वं श्रूयते। तस्मादलौकिकश्रेयःसाधनतायां नागमानां प्रामाण्यमिति।

अत्रोच्यते – यदुक्तं वेदवत् अपौरुषेयतया नित्यनिर्दुष्टत्वस्य प्रामाण्यनिर्वाहकस्याभावादिति तत्तावदयुक्तम्। वेदस्यापि नित्यत्वे प्रमाणाभावात्। प्रत्युत उत्पत्तिविनाशादिप्रतीतेश्च अनित्यत्वमेवावगम्यते। एवं च स एवायं गकार इत्यादिप्रत्यभिज्ञायाः तज्जातीयविषयत्वेनापि उपपत्तिः। अन्यथा तारोऽयं गकारः मन्दोऽयं गकारः तारान्मन्दोऽन्य[३] इत्यादिविरुद्धधर्मप्रतिभासो न स्यात्। न च उक्तप्रत्यभिज्ञाबलेन तारत्वादिप्रतीतीनामेव व्यञ्जकध्वनिविषयत्वं कल्प्यते। तस्यास्तु तज्जातीयविषयत्वकल्पने चौक्योच्छेदापत्तेरिति वाच्यम्। तारत्वादिप्रतीतीनाम्[४] अनेकासामान्यविषयकत्वकल्पनापेक्षया[५] लाघवात् एकस्या एवोक्तप्रत्यभिज्ञायाः सेयं दीपज्वालेतिवदत्र तज्जातीयविषयकत्वकल्पनौचित्यात्[६]। अपि च अस्तु वा प्रत्यभिज्ञया[७] वर्णानां नित्यत्वम्। तथापि वर्णा एव न वेदाः। अपि तु आनुपूर्वीविशेषविशिष्टाः। आनुपूर्वी च पूर्ववर्णोच्चारणानन्तरोच्चरितत्वं तज्ज्ञानानन्तरज्ञानविषयत्वं वेत्युभयथापि अनित्यैवेति तद्विशिष्टाश्च[८] वेदा अनित्या एवेति वेदानामनित्यत्वमेव। नापि प्रवाहरूपेण नित्यत्वं सर्गप्रलययोः साधयिष्यमाणत्वात्। तस्मात् परमाप्तशिवप्रणितत्वेनैव[९] वेदानां प्रामाण्यं स्वीकर्तव्यम्। तन्न्यायेन आगमानां सर्वेषामपि प्रामाण्यम्। उक्तं च सूतसंहितायाम्–

अथातः सम्प्रवक्ष्यामि मार्गप्रामाण्यमास्तिका इत्यारभ्य वेदादिलोकायतान्तानां सर्वेषां मार्गाणां शिवप्रणीतत्वेन प्रामाण्यम्। न चान्योन्याश्रयः विशिष्टमहाजनपरिगृहीतत्वेन वेदागमयोः प्रामाण्ये निश्चिते ताभ्यामेव[१०] शिवकर्तृकत्वनिश्चयात्। न चागमांशे विशिष्टमहाजनपरिगृहीतत्वमेवासिद्धमिति वाच्यम्। प्रत्यक्षवेदविहिततत्पूजादेः कामिकाद्यागमविहितेति–

---

१. तन्त्रार्थानुष्ठानस्य] क३, मु; तन्त्रानुष्ठानस्य– क१, क२
२. याजनाद्यनधिकारेण] क३;यजनाद्यनधिकारेण–मु, क१, क२
३. तारान्मन्दोऽन्य] मु, क२, क३;तारामन्त्रोऽन्य– क१;
४. तारत्वादिप्रतीतीनाम्] क१, क२,मु; तथापि तारत्वादिप्रतीतीनाम्– क३
५. अनेकासामान्यविषयकत्वकल्पनापेक्षया] मु, क३;अनेन सामान्यविषयकत्वकल्पनापेक्षया– क१, क२;
६. तज्जातीयविषयकत्वकल्पनौचित्यात्] मु, क३;तज्जातीयविषयत्वकल्पनौचित्यात्–क१, क२;
७. प्रत्यभिज्ञया] क१, क२, मु; प्रत्यभिज्ञाया– क३
८. तद्विशिष्टाश्च] मु, क२, क३;तद्विशिष्टाच्च– क१
९. परमाप्तशिवप्रणीतत्वेनैव] मु, क२,क३;शिवप्रणीतत्वेनैव– क१
१०. ताभ्यामेव] मु,क२,क३;त्वारयामेव– क१

कर्तव्यतासापेक्षत्वेन तत्प्रतिपादकशाखान्तरीयाङ्गवाक्यानामिव तादृशानां कल्पसूत्राणामिव[१] वा आदिमहाजनपरिगृहीतत्वात्। तदुक्तं हरदत्ताचार्यैः–

ध्यानं यथा भवति तद्विषयो यथा त्वं यादृग्विधश्च भगवान्नधिकारवर्गः।
सर्वाणि तानि भवदागमसंहिताभिः कल्पैरिवाध्वरविधेरुपपादितानि।

न च तथापि दीक्षायाः विशिष्टजनपरिगृहीतत्वमसिद्धमिति तदंशे कथं प्रामाण्यमिति वाच्यम्। तत्रापि श्वेतोपमन्व्यगस्त्यप्रभृतीनां कृष्णरामादीनामपि परिग्रहदर्शनात्। उपमन्व्यगस्त्यप्रभृतिभ्यः कृष्णरामादेः[२] दीक्षायाः परिग्रहस्य हरिवंशभारतपाद्मपुराणादौ प्रसिद्धत्वात्। तत्र विरलप्रवृत्तिस्तु सर्वेषां मलपरिपाकाभावेन अधिकारिणां[३] विरलत्वेन परमहंससंन्यासादाविवोपपद्यते। न च वामादीनामपि शिवोक्तत्वेन कामिकादितुल्यतया प्रामाण्यप्रसङ्ग इति वाच्यम्। तदीयाचाराणां सुराकुम्भस्थापनादीनां प्रत्यक्षवेदनिषिद्धत्वेन प्रत्यक्षवेदविहितस्यापि सौत्रामणिसुरग्रहादेः अन्यविषयत्वात् अत्रापि अन्यविषयत्वकल्पनात्। किंच कौर्मे शिवेनैव–

अन्यानि चैव शास्त्राणि लोकेऽस्मिन् मोहनानि वै।
वेदवादविरुद्धानि मयैव कथितानि तु।
वामं पाशुपतं चैव लागुडं चैव भैरवम्।
न सेव्यमेतत् कथितं वेदबाह्यं तथेतरत्।

इति वामादीनां वेदविरुद्धतया असेव्यत्वस्य प्रतिपादनात्। नन्वेवं लोकायतादीनां शिवप्रणीतत्वेन प्रामाण्यं किं न स्यादिति चेत्, न। तेषाम्[४] अपि तत्तदधिकारिभेदेन प्रामाण्यम्[५] उपपद्यते इति वाच्यम्[६]। कर्तव्ये विषये वेदमार्गप्रच्युताधिकारिविषयत्वेन व्यवस्थया विरोधपरिहारात्। तदुक्तं स्कान्दे–

अधिकारिविभेदेन नैकस्यैव तथा द्विजाः।
तर्कैरेते हि मार्गास्तु न हन्तव्या मनीषिभिः। इति।

वस्तुविरोधे तु प्रबलेन दुर्बलं बाध्यते। न च सर्वेषामपि मार्गाणाम् ईश्वरप्रणीतत्वाविशेषे[७] कस्यचित् प्राबल्यं कस्यचित् दौर्बल्यमिति इदमेव वैषम्यं कथमिति वाच्यम्। उपप्रणेतृतारतम्येन प्राबल्यदौर्बल्ययोरुपपत्तेः। उपप्रणेतारो हि तत्तन्मार्गकथितमर्थं तेषां वचनानां तात्पर्यभ्रान्त्या तदुक्तविरोधेन यत्र संग्रहेण[८] विस्तरेण वा प्रतिपादयन्ति तत्र तेषां दौर्बल्यम्। अविरुद्धांशे तु सर्वेषां

---

१. तत्प्रतिपादकशाखान्तरीयाङ्गवाक्यानामिव] क१; प्रधानविध्यपेक्षितेतिकर्तव्यता-प्रतिपादकशाखान्तरीयाङ्गवाक्यानामिव–मु,क२
२. कृष्णरामादेः] मु,क२, क३;रामकृष्णादेरेव– क१;
३. अधिकारिणां] मु, क३;प्रतिग्रहदर्शनाधिकारिणां– क१,क२;
४. तेषाम्] क१,मु; एतेषाम्–क२,क३
५. प्रामाण्यम्] क१; प्रामाण्याभ्युपगमात्– मु;प्रामाण्यस्याभ्युपगमात्–क२,क३
६. उपपद्यते इति वाच्यम्– क१; न च वेदविरुद्धार्थानां कथं प्रामाण्यमुपपद्यत इति वाच्यम्– क२,क३,मु
७. ईश्वरप्रणीतत्वाविशेषे] मु; ईश्वरप्रणीतत्वाविशेषात्– क१,क२;
८. यत्र संग्रहेण] क२;संग्रहेण–क१,मु;

प्रामाण्यमेव। वेदशैवागमयोस्तु न भ्रान्त्यादीनां सम्भवः[१]। इन्द्रादीनां वेदे व्यासादिवदागमे प्रणवादिवच्च सम्प्रदायप्रवर्तकत्वमात्रमेव। वेदशैवागमयोः यत्र विरोधप्रतिभासः तत्र विरुद्धार्थवेद-वाक्ययोरिव विषयभेदेन अविरोधनयनं कर्तव्यम्। न त्वेकेनापरस्य बाधः कल्पनीयः। यद्वा चार्वाकादिसमयानां शिवप्रणीततया प्रामाण्येऽपि तत्र प्रथमम् ईश्वर एव अतितामसान् मन्दमतीन् लौकिकसुखमेव परमपुरुषार्थं बहिर्भूतान् पुत्रादींश्च आत्मत्वेनाभिमन्यमानान् अधिकारिणः प्रति दुःखादिव्यामिश्रिततया[२] लौकिकसुखस्यापरमपुरुषार्थत्वं पुत्रादीनां च अनात्मत्वं[३] प्रतिपाद्य तेषां बुद्धिस्थैर्याय सूक्ष्मार्थग्रहणासमर्थत्वेन स्थूलदेहमेवात्मानं तन्नाशमेव च परमपुरुषार्थमुपदिशति। पुनः तदुक्तधर्मानुष्ठानप्रसादितानाम्[४] अणूनां किञ्चिद्विमलीकृतमनसां देहात्मादावुपजनितानुशयानां देहादावात्मत्वनिराकरणाय बुद्धागममुपदिशति। एवमुत्तरत्रापि सोपानक्रमेण उपदेश इति विरोधपरिहाराय कल्प्यते। विरोधपरिहाराय सोपानक्रमस्यावश्यकल्प्यत्वे चार्वाकादिसमयानां महाजनपरिग्रहतारतम्येन पूर्वपूर्वशास्त्रस्य उत्तरोत्तरशास्त्रबाध्यत्वमुखेन प्रवृत्तोत्तरसोपानक्रमस्यैव[५] आश्रयितुमुचितत्वात्। यथा तैत्तिरीयशाखायाम् अन्नमयादिकोशानां पूर्वपूर्वकोशस्याधिकारिभेदेन ब्रह्मत्वं प्रतिपाद्य तदपवादेन तदपेक्षया सूक्ष्मस्य उत्तरोत्तरकोशस्य ब्रह्मत्वोपदेशः[६]। यथा वा इन्द्रप्रतर्दनाख्यायिकायां कौषीतकोपनिषदि इन्द्रेण दैत्यं प्रति स्वात्मन एव ब्रह्मत्वोपदेशः अधिकारिभेदेन। एवं प्रकृतेऽपि। उक्तं च सूतसंहितायां यज्ञवैभवद्वाविंशे–

ईश्वरस्य स्वरूपे च बन्धहेतौ तथैव च।
जगतः कारणे मुक्तौ ज्ञानादौ च तथैव च।
मार्गाणां ये विरुद्धांशाः वेदान्तेन विचक्षणाः।
तेऽपि मन्दमतीनां च महामोहावृतात्मनाम्।
वाञ्छामात्रानुगुण्येन प्रवृत्ता न यथार्थतः।
दर्शयित्वा तृणं मर्त्यो यावन्तीं गां यथाग्रहीत्।
दर्शयित्वा तथा क्षुद्रमिष्टं पूर्वं महेश्वरः।
पश्चात् पाकानुगुण्येन ददाति ज्ञानमुत्तमम्। इति।
वेदविरुद्धानाम्[७] अप्रामाण्यमेवास्तु इत्याशङ्क्य तत्रैवोक्तम्।
तस्मादुक्तेन मार्गेण शिवेन कथिता अमी।
मार्गा मानं न चेन्मानं मृषावादी कथं शिवः।
महाकारुणिको देवः सर्वज्ञो निर्मलः खलु। इति।

---

१. वेदशैवागमयोस्तु न भ्रान्त्यादीनां सम्भवः] मु; वेदशैवागमयोस्तु- क१,क२;
२. दुःखादिव्यामिश्रिततया] क२,मु; दुःखादिव्यामिश्रतया- क१
३. अनात्मत्वं च] क२,मु;अनात्मत्वं- क१;
४. तदुक्तधर्मानुष्ठानप्रसादितानाम्] क२,मु; तदुक्तधर्मानुष्ठानप्रसादितैश्च- क१;
५. प्रवृत्तोत्तरसोपानक्रमस्यैव] क२,मु; प्रवृत्तेश्च उत्तरसोपानक्रमस्यैव- क१;
६. ब्रह्मत्वोपदेशः] क२; ब्रह्मत्वोपदेशः अधिकारिभेदेन-क१,मु
७. वेदविरुद्धानाम्] क१; ननु वेदविरुद्धानाम्- मु,क२

एवं च यद्भगवता व्यासेन रचनानुपपत्तेश्च नानुमानम् इत्याद्यारभ्य पत्युरसामञ्जस्यात् उत्पत्त्यसम्भवादित्यन्तेन सांख्याद्यागमानां प्रामाण्यनिराकरणं तदपि वेदविरुद्धे वस्त्वंश एव न तु क्रियांशेऽपि उक्तक्रमेण तत्र प्रामाण्योपपत्तेः। पत्युरसामञ्जस्यादित्येतत्तु निरूढपाशुपतस्यैव निराकरणपरं न तु सिद्धान्तशैवागमस्य वेदाविरुद्धस्य। अत एवोक्तं पत्युरसामञ्जस्यादित्यत्र भाष्ये नीलकण्ठाचार्यैः ष्वयं तु वेदशिवागमयोः विरोधं[१] न पश्याम इति। यदि सर्वात्मना सिद्धान्तशैवागमवेदयोः[२] अभेदः किमर्थं तदुभयोः निर्माणमिति चेन्न। अस्तीयान्[३] अनयोः भेदः–वेदस्त्रैवर्णिकाधिकारः आगमश्चातुर्वर्णिकाधिकार इति। एतदपि उक्तं श्रीकण्ठभाष्ये– वेदस्त्रैवर्णिकविषयः सर्ववर्णविषयश्चान्य इति। किन्तु[४] वेदस्त्वपक्वाधिकारिविषयः शैवगमस्तु पक्वाधिकारिविषय इति। तस्मात् वेदसिद्धान्तशैवागमौ सर्वोत्तमौ, तयोश्चागमः अन्येषां चार्वाकादिपाञ्चरात्रान्तानां एतदुभयविरोधे बाध्यत्वमेव। तेषामपि पूर्वपूर्वस्य उत्तरोत्तरबाध्यत्वम्[५] उपप्रणेतृज्ञानतारतम्यात्। उक्तं च शैवागमस्य सर्वोत्तमत्वम्–

आप्तोक्तिरत्र सिद्धान्तः शिव एवाप्तिमान् यतः।
न ताभ्यां सदृशः कश्चित् श्रेयसोऽस्ति विधायकः।
सिद्धान्त एव सिद्धान्तः पूर्वपक्षास्ततः परे।
आगमाः शिव एवैकः[६] शिवान्ये त्वशिवा मताः।
सांख्यादीन्यप्रमाणानि शास्त्राणि मतिभेदतः[७]।
असर्वज्ञप्रणीतानि बालोन्मत्तादिवाक्यवत्। इति।

यदुक्तं पूर्वपक्षिणा मूढत्वनरकपातादीनां श्रवणादप्रामाण्यमवसीयत इति, तन्न। मूढत्वेन निन्दाप्रतिपादकवचनानामपि पाञ्चरात्रं प्रशंसन्तीति प्रशंसावचनेन तान्येव श्रद्धया युक्ता[८] इत्येवकारेण वेदनिन्दककेवलतन्त्रानुष्ठातृविषयकत्वमेव। शैवेऽपि वैदिकधर्मपरित्यागस्य त्रैवर्णिकान् प्रति–

वैदिकीं तु पुरस्कृत्य पश्चात् शैवीं समाचरेत्।
इति वर्णाश्रमाचारान् मनसापि न लङ्घयेत्।
यस्मिन् वर्णे स्थितो देही प्राप्तो दीक्षां शिवात्मिकाम्।
तस्मिन्नेव स्थितो नित्यं शिवधर्मं तु पालयेत्।

---

१. विरोधं] सम्पादकीयः पाठः, मुद्रितपाठश्च। विशेषं–क१,क२,मु
२. सिद्धान्तशैवागमवेदयोः] क१,क२; वेदसिद्धान्तशैवागमयोः– मु
३. अस्तीयान्] क१,मु; अस्ति च–क२
४. किन्तु] क१,मु; किं च–क२
५. उत्तरोत्तरबाध्यत्वम्] मु,क२; उत्तरबाध्यत्वम्– क१;
६. एवैकः] क२; एवैकाः–क१,मु
७. मतिभेदतः] मु,क२; मतभेदतः– क१;
८. युक्ता] क१,क२; युक्त– मु

इत्यादिवचनैः निषिद्धत्वात्। चित्रनाम्नो राज्ञः शाण्डिल्यस्य च नरकपातः न तन्त्रानुष्ठानप्रयुक्तः किन्तु[१] वैदिकधर्मपरित्यागप्रयुक्त एव। श्रूयते हि तत्रैव–

किं दानैः किं व्रतैः अन्यैः किं वेदैश्च किमध्वरैः इत्याद्युपदेशेन

त्यक्त्वा च वैदिकं कर्म निन्दन् वेदान् श्रुतीः[२] द्विजान्।
अग्निहोत्रगृहे शान्ताश्चाग्नयः तस्य तत्क्षणात्।

इत्यादिना तस्य[३] वैदिककर्मपरित्यागस्य तन्निमित्तत्वम्। एवं शाण्डिल्यस्यापि। पुरा शाण्डिल्य-संज्ञस्तु ब्राह्मणः कश्चिदल्पवित् इत्यारभ्य,

धिक् धिक् शाण्डिल्य दुर्बुद्धे साहसी त्वमतो भृशम्।
को वा वर्णाश्रमाचारं श्रौतं त्यक्त्वा त्वया विना।
शक्तः पापबलात् त्यक्तः नास्ति ते निष्कृतिः श्रुतौ।

इत्येवमादिवचनैः वैदिकपरित्यागस्य तत् हेतुत्वं श्रूयते। तन्त्रानुष्ठानस्य गौतमशापफलकीर्तनमपि अश्रौतवामपाशुपतादिविषयम्। सिद्धान्तशैवागमस्य तु पूर्वोक्तवचनैः वेदतुल्यतया सर्वोत्तमत्वस्य प्रतिपादितत्वात्। यदप्युक्तमागमप्रणयनं जीवनार्थमिति तदपि न। वृत्तिशब्दस्य वृत्तिर्वर्तनजीवने इति निघण्ट्वनुसारेण उभयार्थकत्वेऽपि प्रकृते प्राह पुण्येषिणाम् इत्युपक्रम्य न वेदबाह्यपुरुषे पुण्यलेशोऽपि शङ्कर इति मध्ये परामर्शात्[४]।

ईश्वराराधनबलात् गमिष्यथ सतां गतिम्।

इत्युपसंहाराच्च वृत्तिशब्दस्य आचारार्थकत्वमेव। मोहकत्वमपि आगमानां मन्त्रौषधादिबहुलतया आश्चर्यजनकत्वमेव न तु भ्रमजनकत्वम्। यदुक्तं धर्मस्य वेदैकगम्यतया नालौकिकश्रेयस्साधनत्वे आगमानां प्रामाण्यमिति तदयुक्तम्। श्रौतलिङ्गप्रतिष्ठाविध्य-पेक्षितेतिकर्तव्यताप्रतिपादकानामागमानां कल्पसूत्रादीनामिव विध्यैकवाक्यतया मीमांसकेनापि तत्प्रामाण्यस्यावश्यमभ्युपगन्तव्यत्वात्। मन्त्रार्थवादयोरपि विध्यैकवाक्यतां विना प्रकारान्तरेण प्रामाण्यस्य त्वयापि साधयितुमशक्यत्वात्। अस्मन्मते तु कर्तृसामान्यात् वेदागमयोः शाखान्तरवत् धर्मब्रह्मणोरविशेषेण सिद्धमागमप्रामाण्यम्।

(वृत्तिः) हे देव अधिक्रियतेऽनुगृह्यते इत्यधिकारः। पाशनिग्रहद्वारा पश्वनुग्रहः। तत्राधिकारे वयं भवता नियुक्ताः प्रेरिताः। अत्र भवतु किमनेनेति भगवदुक्तिनिरुत्साहार्थं[५] पुनरामन्त्र्य हिशब्देन स्वोक्तिप्रसिद्धिं सूचयन्तः कथयन्ति। हे ईश्वर यतो यस्मात् कारणादधिकारो ज्ञानसाध्यः। तदधिकारलक्षणदीक्षाकरणोपदेशान्यथानुपपत्तितः[६] सिद्धज्ञानपादश्रवणजनितपत्यादि-

---

१. किन्तु] मु,क२; किञ्च- क१;
२. निन्दन् वेदान् श्रुतीः] क२; वेदान् वेदश्रुतीन्-क१,मु;
३. तस्य- क१,क२; पदमिदं मु पुस्तके न विद्यते।
४. मध्ये परामर्शात्] क१,क२; मध्यपरामर्शात्- मु
५. भगवदुक्तिनिरुत्साहार्थं] ज१,ज३,ज४,ज५; भगवदुक्ति. . . . हार्थं- ज२
६. स्वोक्तिप्रसिद्धिं सूचयन्तः ... तदधिकारलक्षणदीक्षाकरणोपदेशान्यथानुपपत्तितः] ज४,ज५; स्वोक्तिप्रसिद्धं

पदार्थस्वरूपपरिज्ञानेन साध्यः समुद्भवितव्यः। ततस्त्वं तदुपदेष्टुमर्हसीति एकक्रियान्वयावधेरेकसूत्रत्वादनुषङ्गः[१]। ज्ञानेन साध्यत्वं तस्य कुतः। स तु कीदृग्रूप इत्यत आहुः – मुक्तिश्च व्यक्तिश्च पाशत्रयविमोचनशिवत्वोद्दीपनलक्षण इति यावत्[२]। मतङ्गवृत्तौ – विद्येशं प्रति विद्यास्समाहुः। अधिकारोऽस्माभिः पाशछेदशिवत्वव्यक्त्यात्मकत्वेन पशूनामेवेश्वरादिष्टत्वात् कृत इति आचार्यमूर्तिस्थशिवस्य[३] मूर्तिव्यक्ती[४] मुमुक्षोर्मुक्तिव्यक्तीति च समुपपन्नत्वात्[५] देवदत्तस्य पाक ओदनस्य पाको वेतिवत्। केचित् स्वकीया मुक्तिश्च व्यक्तिश्चेति प्रब्रुवन्ति। तत्तदुक्त्या पुनरनुक्त्वा[६] सिद्धत्वादनुचितमेव। तत्रापि च रतिश्चेत् साध्य इत्यनेन समन्वयो न सम्भवतीति। अस्माकमिति च साध्येति चाध्याहारः कर्तव्यः।

—•—

(व्याख्या) एवम् ऋषिभिः प्रार्थितः परमेश्वरः ज्ञानपादं विवक्षुः तत्र प्रेक्षावत्प्रवृत्त्युपयोगित्वेन विषयप्रयोजने अधिकारिणं च[७] दर्शयन् पादभेदप्रयोजकं प्रतिपाद्यतावच्छेदकभेदगर्भं ज्ञानपाद-प्रवृत्तिनिमित्तं तावदाह–

(वृत्तिः) तदियदुक्तिरनवद्येत्याकलय्य भगवान् सुखमुखबोधनार्थं प्रथमं ज्ञानपादं पदविषयाज्ञानं निवर्त्योपदेष्टुमुपचक्रमे।

ज्ञायन्ते येन पत्याद्याः पदार्थाः षड् द्विजोत्तमाः।। ६।।
तत् ज्ञानपादमित्युक्तं साधकं देशिकात्मनाम्।

(व्याख्या) हे द्विजोत्तमाः द्विजश्रेष्ठाः अत्र द्विजोत्तमशब्देन ऋषीणां समयादिनिर्वाणदीक्षावत्वं प्रतिपाद्यते। न तूपनयनसंस्कृतत्वमात्रम्[८]। दीक्षया विना श्रवणे अनधिकारात्। तदुक्तम्–

सूचयन्तः ... तदधिकारकारकलक्षणदीक्षाकरणोपदेशान्यथानुपपत्तितः- ज१,ज३; स्वोक्त ... . लक्षणदीक्षाकरणोपदेशान्यथानुपपत्तितः- ज२;

१. एकक्रियान्वयावधेरेकसूत्रत्वादनुषङ्गः] ज१,ज२,ज४,ज५; एकक्रियान्वयवति धनेकसूत्रत्वादनुषङ्गः-ज३

२. इत्यत आहुः – मुक्तिश्च व्यक्तिश्च पाशत्रयविमोचनशिवत्वोद्दीपनलक्षण इति यावत्-ज१,ज३,ज४,ज५; ज२ कोशे लुप्तम्।

३. आचार्यमूर्तिस्थशिवस्य] ज१,ज२,ज४; आचार्यमूर्तिषु शिवस्य-ज३; ष्आचार्यमूर्तिस्थशिवस्य . . . सिद्धत्वात्ष पर्यन्तं ज५ कोशे नास्ति।

४. मूर्तिव्यक्ती] ज३,ज४;मुक्तिव्यक्ती-ज१,ज२

५. समुपपन्नत्वात्- ज२;सम्पन्नत्वात्- ज१,ज३,ज४

६. केचित् स्वकीया मुक्तिश्च व्यक्तिश्चेति प्रब्रुवन्ति। तत्तदुक्त्या पुनरनुक्त्वा] ज१,ज४; ज२ कोशे लुप्तम् ।केचित् स्वकीया मुक्तिश्च व्यक्तिश्चेति प्रब्रुवन्ति। तत्तदुक्त्या पुनरनुक्त्या – ज३

७. अधिकारिणं च] मु,क२; अधिकारिणां तु- क१;

८. समयादिनिर्वाणदीक्षावत्वं प्रतिपाद्यते। न तूपनयनसंस्कृतत्वमात्रम्] क२; समयादि ... नोपनयनसंस्कृतत्वमात्रम्- क१;उपनयनसंस्कृतत्वमात्रं न विवक्षितम्। किन्तु समयादिनिर्वाणान्तदीक्षावत्वमपि- मु

एवं समयदीक्षायां विशिष्टायां विशेषतः।
वह्निहोमागमज्ञाने योग्यः संजायते शिशुः। इति।

वीरागमे च–

शिवसंस्कारिणां चैव ज्ञानधर्मवतां सताम्।
अष्टाविंशतिभेदेन प्रोक्तं शैवमिति स्मृतम्। इति।

पत्यादयः वक्ष्यमाणाः षट्पदार्थाः येन ग्रन्थैकदेशेन ज्ञायन्ते तद्ग्रन्थैकदेशात्मकं शास्त्रं ज्ञान–पादमित्यभिहितम्। आगमेष्विति शेषः। देशिकाश्च ते आत्मानश्च देशिकात्मनः। आचार्यपुरुषाः तेषां साधकं[१] तत्कर्तव्यदीक्षाद्यनुष्ठानाङ्गभूतज्ञानसाधनमित्यर्थः। उक्तं श्रीमन्मतङ्गपारमेश्वरे–

आचार्यस्तत्त्वविद्धीमान् विशिष्टकुलसम्भवः।
सर्वलक्षणहीनोऽपि सर्वशास्त्रार्थविद्गुह।
अतत्त्वविदभक्तेषु दीक्षां कुर्याद्यदा गुरुः।
दीक्षिता न शिवं यान्ति गुरुर्निरयगो भवेत्। इति।

अस्य शास्त्रस्य विषयाः षट् पदार्थाः। तत्परिज्ञानं चाव्यवहितं प्रयोजनम्। परमप्रयोजनं च[२] मुक्तिः। दीक्षावन्तो देशिकाः साधकाश्चाधिकारिणः। शास्त्रस्य पत्यादिपदार्थानां च[३] प्रतिपाद्य–प्रतिपादकभावः सम्बन्धः। तद्ज्ञानस्य शास्त्रस्य च साध्यसाधनभावः[४]। ज्ञानस्य पदार्थानां च[५] विषयविषयिभावः। ज्ञानस्य मोक्षस्य च साध्यसाधनभाव इति प्रवृत्त्यङ्गमनुबन्धचतुष्टय–मनेनोक्तमित्यनुसन्धेयम्।

(वृत्तिः) हे द्विजोत्तमाः दीक्षितश्रेष्ठाः चतुर्वर्णानां विशेषदीक्षायां शुद्धद्विजत्वदर्शनात्[६] स्मार्तसंस्कारसंस्कृता इति न व्याख्येयम्। दीक्षां विना शिवागमश्रवणेऽनधिकारात्। येन चिच्छक्त्यभिव्यञ्जकशिवशक्त्युपबृंहिततन्त्रांशेन पतिराद्यो येषां ते पत्याद्याः शिवपुरोगमाः पदार्थाः वस्तूनि षट् ज्ञायन्ते बुध्यन्ते तद्देशिकस्योपदेष्टुरात्मा स्वभावो[७] येषां ते देशिकात्मानः तेषां देशिकात्मनां साधनं ज्ञानं च तत्पादं च ज्ञानपादं बोधनांशमित्युक्तमिति समुदितमागमेष्विति शेषः। छान्दसत्वात् क्लीबोक्तिः। दीक्षाव्याख्यानयोरारम्भकर्तुः शास्त्रं प्रधानं मुमुक्षोः दीक्षेति ज्ञापनार्थं देशिकात्मनामित्युक्तम्। साधकादीनामपि साधनमित्यर्थः।

—•—

१. साधकं] मु;साधनं– क१,क२;
२. परमप्रयोजनं च] मु; परप्रयोजनं तु– क१,क२;
३. च] मु,क२;तु– क१;
४. साध्यसाधनभावः] मु,क२;साध्यसाधकभावः– क१;
५. च] मु,क२; तु– क१;
६. शुद्धद्विजत्वदर्शनात्] ज१,ज४,ज५; शुद्धद्विजत्वदानात्– ज२,ज३ (... दर्शनात् इति शोधितः पाठः)
७. षट् ज्ञायन्ते बुध्यन्ते तद्देशिकस्योपदेष्टुरात्मा स्वभावो– ज१,ज४, ज५; ज२ कोशे न विद्यते। येषां ते पत्याद्याः शिवपुरोगमाः ... तद्देशिकस्योपदेष्टुरात्मा स्वभावो– ज३ कोशे न विद्यते।

(व्याख्या) ननु–

ज्ञानं द्विविधमाख्यातं परं चौवापरं तथा।
परं चौवावबोधाख्यमपरं शास्त्रम् उत्तमम्।

इति ज्ञानस्य द्वैविध्यश्रवणात् परज्ञानस्यैव मुक्तिहेतुत्वाच्च कथमस्यापरज्ञानात्मकस्य शास्त्रस्य मुक्तिहेतुत्वमुच्यत इत्यत आह–

(वृत्तिः) ननु चिच्छक्त्यभिव्यञ्जकशिवशक्तिरेव शिवादिवस्तुप्रकाशत्वात्[१] ज्ञानशब्दवाच्या भवति। कुतः शास्त्रं? प्रकाश्यत्वान्न स्वतः प्रकाशभूतशिवादिवस्तुप्रकाशकमित्याशंक्याह भगवान्–

शिवस्य समवेता या शक्तिर्ज्ञानात्मिकामला।।७।।
सैव ज्ञानमिति प्रोक्तं शाब्दं तदनुमापकम्।

(**व्याख्या**) अत्र शिवग्रहणमणोरपि उपलक्षणम्। यद्वा शिवसमवेतज्ञानस्य मलनिवृत्तौ प्राधान्यात्[२] अयं ग्रन्थः। शिवस्य समवेता तादात्म्यमापन्ना[३] ज्ञानात्मिका ज्ञानस्वरूपिणी अमला मलशक्तिविरोधिनी या शक्तिः चिच्छक्तिः सैव ज्ञप्तिः ज्ञानमिति प्रसिद्धया भावव्युत्पत्त्या साक्षात् मुक्तिसाधनतया च ज्ञानमिति प्रोक्तं शिवागमेष्विति शेषः। शाब्दं शब्दसम्बन्धि तत्सन्दर्भः[४] तस्येदमित्यण् शास्त्रमिति यावत् तद्रूपं[५] ज्ञानम्। अपरं तदनुमापकम् आकाङ्क्षादिमत् प्रामाण्यवाक्यस्य[६] वक्तृप्रमितिपूर्वकत्वेन तदनुमापकत्वादित्यर्थः। इदं च[७] शिवशक्त्यपेक्षया। पशुशक्त्यपेक्षया तु[८] तदभिव्यञ्जकत्वं गौणत्वबीजं बोद्धव्यम्। एवं च शास्त्रजन्यज्ञानस्यापि मुक्तावुपयोगात् शास्त्रस्यापि परम्परया मुक्तिसाधनत्वमिति भावः। यद्वा ननु शिवचिच्छक्तिरेव सर्वदा सर्ववस्त्ववभासरूपत्वेन ज्ञानं न तु शब्दात्मकं शास्त्रमपि। तदुक्तं मृगेन्द्रे–

नाध्यक्षं नापि तल्लैङ्गं न शाब्दमपि शाङ्करम्।
ज्ञानमाभाति विमलं सर्वदा सर्ववस्तुषु।।

इत्यत आह–शिवस्येति। सैव ज्ञानमित्यवधारणात्[९]। शिवस्यैव[१०] ज्ञानं परज्ञानम्[११] इत्यर्थः। शाब्दं शास्त्रं चानुमापकम् अनुप्रमाणमपरज्ञानम्[१२] इत्यर्थः।

---

१. साधनमित्यर्थः। ननु चिच्छक्त्यभिव्यञ्जकशिवशक्तिरेव शिवादिवस्तुप्रकाशत्वात्– ज१,ज३,ज४,ज५; ज२ कोशे नास्ति।
२. प्राधान्यात्] क१,क२; प्राथम्यात्– मु
३. तादात्म्यमापन्ना, क२; तादर्थ्यमापन्ना– क१; तादात्म्यापन्ना– मु;
४. शब्दसम्बन्धि तत्सन्दर्भः, क१; शब्दसम्बन्धी सन्दर्भः– मु,क२
५. तद्रूपं, मु,क२;रूपं– क१;
६. प्रामाण्यवाक्यस्य] क१,क२; प्रमाणवाक्यस्य– मु
७. च] मु,क२;तु– क१;
८. पशुशक्त्यपेक्षया तु] मु,क२;तु– क१;
९. सैव ज्ञानमित्यवधारणात्] मु;शिवस्यैव ज्ञानमित्यवधारणात्– क१,क२;
१०. शिवस्यैव] सम्पादकीयः पाठः; शिवस्यैव सैव– क१; सैव– मु,क२
११. परज्ञानम्] क१,क२; परं ज्ञानम्– मु
१२. अनुप्रमाणमपरज्ञानम्] क१,मु;अपरज्ञानम्–क२

(**वृत्तिः**) शिवस्य या समवेता समवायसम्बन्धिनी ज्ञानात्मिका ज्ञानं अवबोध आत्मा स्वरूपं यस्याः सा तथा अमला। न विद्यते मलोऽस्या इति तदुक्तिमती शक्तिर्बलं सैव ज्ञानम्[१] इति प्रोक्तं समुदितम्। विधेयाधीना[२] क्लीबोक्तिः। शाब्दं शास्त्ररूपं तदनुमापकं नाकरणा कृतिरिति[३] स्वनिरतिशयरचनान्यथानुपपत्त्या[४] स्वस्मिन् तदभिव्यक्त्या विना स्वस्य शिवादिवस्तु-प्रकाशकत्वान्यथानुपपत्त्या च। तत् शिवज्ञानगमकम्। वक्ष्यति च "शब्दास्तु पारम्पर्येण शिवज्ञानानुमापका" इति। शिवकर्तृशक्तिशिवज्ञानशक्त्यभिव्यक्तिभूमिभूततया ततः शिवादिप्रकाशकत्वस्यास्य[५] सुलभत्वाच्च शिवज्ञानशब्दशब्दितव्यमिति न प्रथितमिति[६] भावः। यद्वा शाब्दं शब्दारूढं सत् तच्छिवज्ञानम् अनुमापकं चिच्छक्तिलक्षणप्रमाणाभिव्यञ्जकं सत् अनुविधातृ प्रमाणम्। तथा हि शिवशक्तिः शब्दारूढा सती चिच्छक्तिं समर्थयन्ती स्वात्मानं शिवादिवस्तुना सह दीक्षितानां[७] दर्शयति। तदुक्तं मोक्षकारिकासु–

मन्त्रतन्त्रात्मके शब्दे शिवो व्यक्तः कलासु च।
समर्थयति चिच्चक्षुर्नातः किञ्चिद्विरुध्यते। इति।

—•—

(व्याख्या) तदुक्तं–

ज्ञानं द्विविधमाख्यातम् इति। एतत्तन्त्रप्रतिपाद्यान् पदार्थान् उद्दिशति–

(वृत्तिः) ननु शिवः समर्थयतीति श्रुतेः श्रुतिरियं सुसमर्थितशिवः ननु सुसमर्थितशिवः न सुसमर्थितशक्तिः[८] सत्यम्। नाकरणा कृतिरिति न कदाचिदपि निश्शक्तिः स शिव इति च श्रुतेः। श्रुतिरियं सुसमर्थितशक्तिरपि स्यात्। विधिनिषेधवाचकवाच्यत्वादीश्वराज्ञाशक्तिः शब्दश्च नित्यमनित्यं शास्त्रं स्यात्। कृतोद्देशलक्षणपरीक्षा तत् पदार्थानां स्वरूपज्ञानं[९] सुलभ्यमिति सूचयन्नाममात्रकीर्तनमुद्देश इति दर्शयन् तथा तान् कीर्तयन् पादादिमं सूत्रं पठति–

---

१. अमला न विद्यते मलोऽस्या इति तदुक्तिमतीशक्तिर्बलं सैव ज्ञानम्] ज१,ज४; ज२ कोशे लुप्तम्। अमला न विद्यते मलोऽस्या इति तदुक्तिमती सैव ज्ञानम्- ज३
२. विधेयाधीना] ज३,ज५;विधेयादिना-ज१,ज२
३. नाकरणा कृतिरिति] ज३; नाकरणा त्वतिरिति- ज१; नाकराणामपि- ज२; ज्ञानकारणकृतिरिति-ज४; अनाकरणं कृतिरिति-ज५
४. स्वनिरतिशयरचनान्यथानुपपत्त्या] ज२,ज४,ज५;स्वनिरतिशया। न चान्यथानुपपत्या- ज१,ज३
५. शिवकर्तृशक्तिशिवज्ञानशक्त्यभिव्यक्तिभूमिभूततया ततः शिवादिप्रकाशकत्वस्यास्य] ज३, ज४, ज५; शिवकर्तृशक्तिशिवज्ञानशक्त्यभिव्यक्तिभूमिभूतया तच्छिवादिप्रकाशकत्वस्यास्य- ज१; शिवकर्तृ .... - ज२;
६. न प्रथितमिति] ज३;किमिति न प्रथितमिति-ज१,ज२,ज४,ज५
७. दीक्षितानां] ज१,ज२,ज४,ज५; दीक्षितान्-ज३
८. सुसमर्थितशिवः न सुसमर्थितशक्तिः] ज२,ज५; सुसमर्थितशिवः ननु सुसमर्थितशक्तिः -ज१;सुसमर्थितशक्तिः-ज३;सुसमर्थिता शिवा न सुसमर्थितशक्तिः-ज४
९. शास्त्रं स्यात्। कृतोद्देशलक्षणपरीक्षा तत् पदार्थानां स्वरूपज्ञानं] ज१,ज५; च ज्ञानं- ज२; शास्त्रं स्यात्। कृतोद्देशलक्षणपरीक्षादिकपदार्थानां स्वरूपज्ञानं-ज३;कृतोद्देशलक्षणपरीक्षकपदार्थानां स्वरूपज्ञानं-ज४

पतिः कुण्डलिनी माया पशुः पाशश्च कारकः ।। ८ ।।
इति प्रोक्ताः पदार्थाः षट् शैवतन्त्रे समासतः ।

(व्याख्या) पतिः परमशिवः कुण्डलिनी शुद्धमाया माया अशुद्धमाया पशुः जीवः पाशः कलाद्यवनिपर्यन्तः[१] कारकः दीक्षा इत्यनेन प्रकारेण शैवतन्त्रे शैवशास्त्रे समासतः सङ्गृह्य षट् पदार्थाः प्रोक्ता इत्याशयः[२]। अत्र शैवतन्त्र इत्यनेन तन्त्रान्तरसिद्धन्यूनाधिकसङ्ख्याव्यवच्छेदो[३] द्रष्टव्यः। यद्यपि शैवतन्त्रेष्वेव पदार्थसङ्ख्यावैषम्यं दृश्यते। तथा च साम्प्रदायिकवचनम्–

पौष्करे च मतङ्गे षट् सप्त स्वायम्भुवे तथा।
पञ्चोक्ताः श्रीपराख्ये च मृगेन्द्रादौ त्रयः स्मृताः। इति।

न चात्राहेतुकः सङ्ख्याभेदोपन्यास उपपद्यते। शिवैककर्तृकेषु प्रमाणवाक्येषु बुद्धिवैषम्यासम्भवाच्च। तथापि श्रोतृबुद्धिवैचित्र्याभिज्ञेन सर्वज्ञेन परमेश्वरेण तत्तद्बुद्ध्यनुगुणमेव उपदिष्टमिति ध्येयम्। एवं चात्र षड्ग्रहणम्[४] उक्तसङ्ख्यानामपि उपलक्षणमित्यविरोधः। अत्र सर्वकर्तृत्वेन[५] प्रधानत्वात् पतिः प्रथमम् उद्दिष्टः[६]। तदनन्तरं पतिपदनिष्ठानामनन्तादीनां भुवनभोगहेतुत्वात् कुण्डलिनी उद्दिष्टा[७]। तनुकरणभुवनभोगोपादानत्वप्रत्यासत्त्या कुण्डलिन्यनन्तरं मायोद्दिष्टा। मायाकार्यवश्यत्वात् तद्भोक्तृत्वाच्च मायानन्तरं पशोरुद्देशः। पशोः बन्धनप्रयोजकत्वात् तद्भोग्यत्वाच्च तदनन्तरं पाशस्योद्देशः। तन्निवर्तनहेतुत्वात् तदनन्तरं कारकस्योद्देशः।

(वृत्तिः) पटलान्तरारम्भे पञ्चविधसम्बन्धः प्रोच्यते। तत्र तन्त्रवस्तुनः[८] षट् पदार्थात्मनः प्रतिज्ञातत्वात् तन्त्रवस्तुसम्बन्धः पतिपदार्थात्मकः[९]। प्राकरणिकस्तु पादगतो विद्यापादात्मकः[१०]। स तु विद्यापादं यावत् तावदेकरूप एव। *किं तस्यासकृद्वचनेन। सौत्रवाक्यपाटलिकास्तु अविदिततन्त्रादिमसूत्रानन्तरपटलत्वात् वक्तुं न शक्यते। श्लोकार्थस्तु लक्षणोक्त्या सुकरो भविष्यति। प्रथममुद्देशः सर्वाधिष्ठातृत्वात् पत्युः तदनु तत्परिग्रहशक्तित्वात् बिन्दुमाययोः। तत्रापि शुद्धत्वेन[११]

---

१. कलाद्यवनिपर्यन्तः] मु; कलाद्यवनिपर्यन्तं- क१,क२;
२. इत्यन्वयः] मु,क२; इत्याशयः- क१
३. तन्त्रान्तरसिद्धन्यूनाधिकसङ्ख्याव्यवच्छेदो] क१; तन्त्रान्तरसिद्धन्यूनाधिकसङ्ख्या-सङ्ख्येयान्तरव्यवच्छेदो- मु;तन्त्रान्तरसिद्धन्यूनाधिकसंख्यासंख्यया व्यवच्छेदो-क२
४. षड्ग्रहणम्] मु; षड्ग्रहणमपि- क१,क२; षड्ग्रहणम्- मु
५. सर्वकर्तृत्वेन] मु; सर्वकर्तृकत्वेन- क१,क२;
६. उद्दिष्टः] मु; उपदिष्टः- क१,क२;
७. उद्दिष्टा] मु,क२; उपदिष्टा- क१;
८. तन्त्रवस्तुनः] ज१,ज२,ज४,ज५; तत्र तत्र वस्तुनः-ज३
९. पदार्थात्मनः प्रतिज्ञातत्वात् तन्त्रवस्तुसम्बन्धः पतिपदार्थात्मकः] ज४;पदार्थात्मनः प्रतिज्ञातत्वात् तत्र वस्तुसम्बन्धः प्रतिपदार्थात्मकः-ज१; ज२ कोशे नास्ति। पदार्थात्मनः प्रतिज्ञातत्वात् तत्र वस्तुसम्बन्धः पतिपदार्थात्मकः-ज३,ज५.
१०. पादगतो विद्यापादात्मकः-ज१,ज३,ज४,ज५; ज२ कोशे न विद्यते।
११. तदनु तत्परिग्रहशक्तित्वात् बिन्दुमाययोः। तत्रापि शुद्धत्वेन] ज१,ज३,ज५; तदनु तत्परिग्रहोपाधिना - ज२

साक्षात्परिग्रहोपाधिना च बिन्दोः तदनु मायया[१] सह भोग्यभोक्तृत्वसम्बन्धिनः पशोः तदनु तादृक्सम्बन्धसमुत्थपाशस्य तदनु तत्सम्बन्धविच्छित्ति-चिच्छक्तिव्यक्तीकर्तुः कारकस्येति विवेकः।

—•—

(व्याख्या) तत्र लक्षणप्रमाणाभ्यां वस्तुसिद्धिरिति न्यायेन प्रथमोद्दिष्टं पतिपदार्थं तावल्लक्षयति–

(वृत्तिः) लक्षणं त्वसाधारणधर्म इति बोधयन् क्रमतस्तान् लक्षयन् प्रथमं लक्षयति–

लयभोगाधिकारात्मव्यापारत्रयलक्षितः ॥९॥
स्वभावादच्युतः शक्तः पदार्थः पतिसंज्ञितः।*

(व्याख्या) लयश्च भोगश्चाधिकारश्च लयभोगाधिकाराः। ते च बिन्दुगतावस्थाविशेषा इत्युपरिष्टात् वक्ष्यति। त एवात्मा स्वरूपं यस्य व्यापारत्रयस्य तत्तथोक्तम्। यद्वा लयभोगाधिकारात्मानश्च ते व्यापाराश्च लयभोगाधिकाराः तेषां त्रयं तेन लक्षितः व्यावर्तितः तत्कर्तेति यावत्। तदुपाधिकभेद[२] इति यावत्। एवं च[३] बिन्दौ नातिव्याप्तिः। इदं च[४] लयभोगाधिकाराणां पतिविशेषणानां यथाक्रमं तटस्थलक्षणत्वं व्यापारत्रयस्य[५] बिन्दुनिष्ठत्वात्। स्वरूपलक्षणमाहस्वभावादच्युत इति। स्वभावात् ज्ञानक्रियास्वरूपादच्युतः स्वतो[६] निर्मल इति यावत्। ननु मलस्य विभुत्वेन[७] कुतोऽस्य स्वतो निर्मलत्वमिति चेत्, स्वभावादेवेति न हेतुप्रश्नावकाशः। तदुक्तं किरणे–

विशुद्धः स्फटिकः कस्मात् कस्मात् ताम्रं सकालिकम् इति।

पतिसामान्यस्य तटस्थलक्षणमाह– शक्त इति। किन्तु[८] तस्य करणशून्यस्य[९] कथं कर्तृत्वमिति। अत आह[१०]– शक्त इति। एवं च शक्तेरेव करणत्वात् न कर्तृत्वानुपपत्तिरिति भावः। उक्तं च–

करणं च न शक्त्यन्यदिति। शक्तय इहास्य करणमिति च। आज्ञया समवेतयेति च। वक्ष्यति च

लयादिकोऽप्ययं भेदः शक्तितस्तु ततः स्थितः।
बिन्दुक्षोभो यतः शम्भोः शक्तेरेव प्रवर्तते।। इति च।

---

१. तदनु मायया– ज१,ज३,ज५; ज२ कोशे नास्ति।
* किं तस्यासकृद्वचनेन इत्यारभ्य पतिसंज्ञितः इत्ययं ' चिह्नमध्यस्थो भागः ज४ कोशे नास्ति।
२. तदुपाधिकभेदः] मु,क२;तदुपाधिका भेदः– क१;
३. च] मु,क२;तु– क१;
४. च] मु,क२; तु– क१;
५. तटस्थलक्षणत्वं व्यापारत्रयस्य] क१,मु;तटस्थलक्षणव्यापारत्रयस्य–क२
६. स्वभावात् ज्ञानक्रियास्वरूपादच्युतः स्वतो] मु,क२;स्वतो– क१;
७. विभुत्वेन] मु; विभुत्वेऽपि– क१,क२;
८. किन्तु] क१; किंच ननु– मु; किंच न–क२
९. तस्य करणशून्यस्यॐ] क१,मु; न स्वकारणशून्यस्य–क२
१०. अत आह] मु,क२; आह– क१;

लक्ष्यं निर्दिशति – पतिरिति। उक्तलक्षणलक्षितः पतिपदार्थ इत्यर्थः।

(वृत्तिः) यत् श्रीमन्मतङ्गादौ–

अथ पत्युरधिष्ठानं स्वशक्तिकिरणात्मकम्।
तस्यां दिवि सुदीप्तात्मा निष्कम्पोऽचलमूर्तिमान्।।

इत्यादिना समुदितविशिष्टलक्षणलक्षितः। तदनन्तरं लयभोगाधिकारात्मव्यापार–त्रयलक्षितः। लयः स्वकीयशक्तेः कर्तव्यतिरस्करणेन कार्ययोग्यतया स्वात्मन्यवस्थितिः भोगो बिन्दुपालनम्। अधिकारस्तत्कार्यस्वरूपप्रादुर्भावनम्। एतल्लक्षणव्यापृतित्रयेण लक्षितः अङ्कितः व्यावर्तितः[१]। ननु स्पन्दनात्मकास्ते व्यापाराः तैर्लक्षितो विकृतिमान् भवति। सत्यम्। योऽसौ स्वभावादस्पन्दरूपस्वधर्मादच्युतो न गलितः। ननु क्रियावेशो हि कर्तृत्वं स यदि स्यात्तस्य कथमच्युतत्वम्। सत्यम्। योऽसौ शक्तः समर्थः। अयमाशयः– स्पन्दनात्मकत्वात्। नात्र क्रियारूपं कर्तुः कर्तृत्वं कर्त्रन्तरकल्पनायामनवस्थाप्रसङ्गात्। किन्तु तज्जडस्पन्दक्रियोत्पादने शक्तत्वम्[२]। तदुक्तं–

जडस्पन्दक्रियायां या शक्तिः सा कर्तृता चितः।
व्याप्तेरस्पन्दरूपेण सिद्धाऽयस्कान्तवत् स्वतः।। इति।

एवम्भूतः स पदार्थः पतिसंज्ञितः पतिरिति संज्ञास्य संजातेति पतिसंज्ञितः[३]। पतिरिति कृतनामा। लयावस्थशिवसमशक्तित्वात् परमुक्तिभाजस्तेन सह संगृहीताः। भोगावस्थशिवसमशक्तित्वात् तेन सह शान्त्यतीतादिभुवनाधिपतयः संगृहीताः। अधिकारावस्थशिवसमशक्तित्वात्[४] तेन सह मन्त्रमन्त्रेश्वरमन्त्रमहेश्वराः संगृहिताः। तल्लक्षणलक्षिताश्च सजातित्वात् पतिरिति कृतनामानो भवन्ति। तथापि मन्त्रादयः। पदार्थान्तरपरीक्षासु च किञ्चिदुपाध्यन्तरं प्रत्युपवर्ण्यन्ते।

—•—

(व्याख्या) उद्देशक्रमप्राप्तां कुण्डलिनीं लक्षयति– लय इति।

(वृत्तिः) द्वितीयं लक्षयति[५]–

लयादिर्व्यावृत्तिर्यत्र शुद्धाध्वा वा यतोऽजनि।। १०।।
सा तु कुण्डलिनी शम्भोर्नित्याधिष्ठेयरूपिणी।

(व्याख्या) लय आदिर्यस्याः सा लयादिः व्यावृत्तिः[६] यत्र भवति सा कुण्डलिनीत्यर्थः।

---

१. एतल्लक्षणव्यापृतित्रयेण लक्षितः अङ्कितः व्यावर्तितः] ज१,ज३,ज४,ज५; एतदावर्तितः – ज२
२. कर्त्रन्तरकल्पनायामनवस्थाप्रसङ्गात्। किन्तु तज्जडस्पन्दक्रियोत्पादने शक्तत्वम्] ज१,ज३,ज४,ज५; कर्त्रन्तरकल्पनत्वम् – ज२
३. संजातेति पतिसंज्ञितः] ज२,ज३,ज४,ज५;संजातेव इति संज्ञितः–ज१;
४. अधिकारावस्थशिवसमशक्तित्वात्– ज१,ज३,ज४,ज५; ज२ कोशे नास्ति।
५. पदार्थान्तरपरीक्षासु च किञ्चिदुपाध्यन्तरं प्रत्युपवर्ण्यन्ते।द्वितीयं लक्षयति – ज१,ज३,ज४,ज५; पदार्थान्तरं .... – ज२
६. लयादिः व्यावृतिः] मु; लयादिव्यावृतिः– क१; लयादिव्यावृत्तिः–क२

लयादिव्यापारविशेषाश्रयत्वं बिन्दुत्वम्। विशेषपदेन वक्ष्यमाणाण्वाश्रितलयादि वैलक्षण्यस्य विवक्षितत्वात् नाणुष्वतिव्याप्तिः। सर्वव्याख्याविकल्पनादिति[१] न्यायेन विषयव्यक्त्यर्थं[२] लक्षणान्तरमाहशुद्धेति। यतः यस्याः कुण्डलिन्या उपादानभूतायाः वर्णपदमन्त्रकलाः शिवतत्त्वादीनि विद्यातत्त्वान्तानि तद्गतभुवनानि च शुद्धाध्वपदेनोच्यन्ते। शुद्धत्वं च दुःखासम्भिन्नसुखहेतुत्वेन। तेन शुद्धाध्वोपादानत्वं तल्लक्षणम्[३] इति द्रष्टव्यम्। अजनि जातः दीपजनेत्यादिना कर्तरि चिण्। शुद्धाध्वा यतोऽजनीत्यनेन तद्गतकुण्डलिन्यां प्रमाणमनुमानमुच्यते। तथा हि- शुद्धाध्वशब्देन[४] शुद्धमायाधिष्ठातृत्वेन सिद्धानन्तेश्वरदेहादिरुच्यते। स[५] कार्यत्वात् उपादानवान्[६] इति। यस्मादुपादानादजनि सैव कुण्डलिनी। उपादानोपादेययोः समानस्वभावत्वनियमेनाशुद्धमायातः शुद्धाध्वोत्पत्त्यसम्भवादिति। ननु कथमस्याः शुद्धाध्वोपादानत्वमित्यत आह - सात्विति। शम्भोः परमशिवस्याधिष्ठेयरूपिणी नत्वनन्तेशस्य। तुशब्देनास्याः परिग्रहरूपत्वेन चिच्छक्तिवैलक्षण्यं बोध्यम्। नित्यत्वं च धर्मिग्राहकप्रमाणसिद्धमिति भावः। बिन्दुसद्भावे ध्यानबिन्दूपनिषच्छ्रुतिरपि प्रमाणं द्रष्टव्यम्। यद्वक्ष्यति न तादात्म्यात् स्थिता किन्तु वर्तमाना परिग्रहा इति। नित्या आद्यन्तरहिता।

(वृत्तिः) शिवस्य क्रियाशक्तिर्लयादिव्यापृतिहेतुत्वाल्लयादिव्यवहारं भजन्तीति पर्यवसिता। ततो यत्र यस्यां लयादिव्यापृतिः लयः कार्योपसंहृतिः आदिर्यस्याः सा लयादिव्यापृतिः वस्तुतः[७] तद्धेतुतया सम्भवति। यतो यस्याः शुद्धाध्वा शुद्धमार्गो वा मन्त्रादिरजनि जातः। दीपजन्येत्यादिना[८] कर्तरि चिण्[९] या नित्या आद्यन्तरहिता शम्भोरधिष्ठेयरूपिणी शिवस्य परिग्रहवर्तिनी सा तु कुण्डलिनी कुण्डलिनीति कृतनाम्नी।

—•—

(व्याख्या) क्रमप्राप्तं मायालक्षणम्[१०] आह-

(वृत्तिः) तृतीयं लक्षयति -

भोग्यभोक्तृत्वसम्पत्त्यै या शरीरेन्द्रियादिकम्।। ११ ।।
उत्पादयति सा माया खचिता कर्मभिर्नृणाम्।

(व्याख्या) या नृणां[११] सकलप्रलयाणूनामेव भोग्यानां शब्दादिविषयाणां यत् भोक्तृत्वमस्य

---

१. सर्वव्याख्याविकल्पनादिति] मु,क२; सर्वव्याख्याविकल्पनामिति- क१
२. विषयव्यक्त्यर्थं] मु; विषयव्यावृत्त्यर्थं- क१; विषयव्याप्त्यर्थं-क२
३. तल्लक्षणम्] मु,क२; लक्षणम्- क१
४. शुद्धाध्वशब्देन] मु,क२; शुद्धाध्वा शुद्धेन- क१;
५. स] मु,क२;सा च- क१;
६. उपादानवान्] मु; उपादानत्वात्- क१,क२;
७. वस्तुतः] ज१,ज३,ज४,ज५; ज२ कोशे नास्ति।
८. दीपजन्येत्यादिना] ज१,ज३,ज४,ज५; दीयतेत्यादिना - ज२
९. चिण्] ज१,ज३,ज४,ज५; निर्णयान्- ज२
१०. क्रमप्राप्तं मायालक्षणम्] मु;क्रमप्राप्तमायालक्षणम्- क१,क२;
११. नृणां] क१; नृणां सकलप्रलयाणूनां कर्मभिः धर्माधर्मरूपैः खचिता आश्रिता सती- मु,क२

च भोगसामर्थ्यं तत् सम्पत्त्यै तत्सिद्ध्यै देहेन्द्रियादिकं देहादिशब्देन भुवनभोग्ये[१] उच्येते। उत्पादयति सा मायेत्यर्थः। मायालक्षणं तु कर्माश्रयत्वे सति शरीरेन्द्रियाद्युत्पादकत्वम्। तत्र शरीरेन्द्रियाद्युत्पादकत्वमित्युक्ते बिन्द्वादावतिव्याप्तिः अत उक्तं कर्माश्रयत्वे सतीति। तावन्मात्रोक्ते बुद्धावतिव्याप्तिः[२]। अत उक्तं शरीरेन्द्रियादीति। एतच्च लक्षणं शुद्धाध्वनि कर्म नास्तीत्यभिप्रायेण। यद्वक्ष्यति बिन्दुपटले–

न कर्मभोगवैचित्र्ये कारणं शुद्धवर्त्मनि।
मलस्य परिपाको यो विचित्रः सोऽत्र कारणम्।
किं कर्मणात्र विप्रेन्द्रा यत्रेच्छा भोग इष्यते। इति

तत्रापि शुद्धकर्माङ्गीकारे तु अशुद्धकर्माश्रयत्वं[३] लक्षणे विवक्षितम् अवशिष्टं स्वरूपकथनपरं द्रष्टव्यम्। यद्वा देहशब्देनाशुद्धस्थूलसूक्ष्मदेहद्वयमुच्यते। तदुपादानत्वं तल्लक्षणम्[४]। "भोग्यभोक्तृत्वसम्पत्त्यै खचिता कर्मभिर्नृणाम्" इत्यनेनोत्तरत्र वक्ष्यमाणम् अनुमानं[५] सङ्ग्रहेणोच्यते। तस्य चायमर्थः – नृणां भाविसर्गे भोग्यभोक्तृत्वसिद्ध्यर्थं[६] महार्थसंहारे तद्धेतुभूतस्य कर्मणोऽवस्थानं वाच्यम्। तस्य चाश्रयं विना अवस्थानासम्भवादाश्रयोऽवश्यं वाच्यः। स च नाणुः विकारित्वापत्तेः। यः कर्माश्रयः सैव च मायेति।

(वृत्तिः) भोग्यभोक्तृत्वसम्पत्त्यै कार्यद्वारं विना तदनुपपत्त्या स्वात्मनो सुखदुःख-मोहलक्षणवेद्यवेत्तृत्वसम्बन्धसंसिद्ध्यै[७] याऽनन्तेशशक्त्याक्रान्ता शरीरेन्द्रियादिकम्। शरीरेन्द्रिये आदिनी यस्य कलादितत्त्वजातस्य तत्तथोक्तम्। तदुत्पादयति जनयति या तस्मिन् शरीरेन्द्रियादिके स्वस्यां[८] लयं गते नृणां नराणां कर्मभिः[९] बुद्धेरुपसंहृतत्वात् पुरुषसंस्कारत्वे विकारित्वप्रसङ्गात्[१०] खचिता आश्रिता सा माया मायेतिकृतनाम्नी।

—•—

१. भुवनभोग्ये] क१,क२; भुवनभोगौ- मु
२. बिन्द्वादावतिव्याप्तिः अत उक्तं कर्माश्रयत्वे सतीति। तावन्मात्रोक्ते बुद्धावतिव्याप्तिः] मु; बिन्द्वादावतिव्याप्तिः-क१; बिन्द्वादावतिव्याप्तिः अत उक्तं कर्माश्रयत्वे सतीति। तावत्युक्ते बुद्धावतिव्याप्तिः।- क२
३. अशुद्धकर्माश्रयत्वं] क१,मु; शुद्धकर्माश्रयत्वं-क२
४. तल्लक्षणम्] क१,क२; तल्लक्षणं बोद्धव्यम्-मु
५. अनुमानं] क१,मु; अनुमानमत्र-क२
६. भाविसर्गे भोग्यभोक्तृत्वसिद्ध्यर्थं] मु; भाविभोग्यभोक्तृत्वसिद्ध्यर्थं- क१; भाविसर्गे भोगभोक्तृत्वसिद्ध्यर्थं-क२
७. सुखदुःखमोहलक्षणवेद्यवेत्तृत्वसम्बन्धसंसिद्ध्यै] ज१,ज३,ज४; सुखदुःखमोहलक्षणवेद्यसम्बन्धसंसिद्ध्यै - ज२
८. स्वस्यां] ज१,ज३,ज४; ज२ कोशे नास्ति।
९. कर्मभिः, ज१,ज३,ज४; ज२ कोशे नास्ति।
१०. विकारित्वप्रसङ्गात्] ज१,ज३,ज४; . . . . प्रसङ्गात् - ज२

(व्याख्या) क्रमप्राप्तं पशुलक्षणमाह–

(वृत्तिः) चतुर्थं लक्षयति –

पशुः पशुत्वसंरुद्धदृक्क्रियाप्रसरः सदा।। १२।।
सकलाकलभेदेन त्रिधा बन्धवशात् स्थितः।

(व्याख्या) पशुत्वमाणवमलः। तदुक्तम्– अथानादिमलः पुंसां पशुत्वं परिकीर्तितमिति। तेन तच्छक्त्येति यावत् संरुद्धः सङ्कुचितः दृक्क्रियाप्रसरः दृक्क्रिययोः ज्ञानक्रियाशक्त्योः प्रसरः विषयोन्मुख्यं यस्य स तथोक्तः। इदं तु इच्छशक्तेरपि उपलक्षणम्। सदेत्यनेन मलसम्बन्धस्यानादित्वं सूच्यते। अधिकारिणामपि अनन्तेशादीनां दृक्क्रियाशक्तेः अधिकारमलेन निरुद्धत्वात् नाव्याप्तिरिति द्रष्टव्यम्। एतन्मते अनन्तेशादीनां पशुकोटावेवान्तर्भावः। अत एव तेषामधिकारमलोपेतत्वं पश्चात् अनुग्राह्यत्वं च वक्ष्यति। यथा–

इच्छयैवानुगृह्यादौ शिवो विज्ञानकेवलान्।
मलपाकम् अवेक्ष्यैव[१] कांश्चित्[२] शुद्धाध्वगोचरे।
योजयत्यधिकारेषु कृत्वा दृक्क्रिययोत्कटान्। इत्यादिना
एतेषां यस्य वैराग्यमुपजातं महात्मनाम्।
किमेतेनाधिकारेण श्रेयसः[३] परिपन्थिना।
इति तं परमेशानो मलपाकम् अवेक्ष्य[४] सः।
स्वेच्छयैवानुगृह्णाति मुक्तिव्यक्त्यर्थया दृशा। इत्यादिना च।

अन्यत्र तेषां पतित्वव्यवहारस्तु पञ्चकृत्यकारित्वरूपपतिलक्षणमभिप्रेत्य। पूर्वोक्तानां त्रयाणां पदार्थानामन्तर्गणिकवास्तवभेदाभावात् विभागानुपन्यासः। इह तु तत्सम्भवात् विभज्य दर्शयति–

सकलाकलभेदेन त्रिधा बन्धवशात् स्थितः। इति।

अत्र अकलपदेन[५] प्रलयाकलविज्ञानाकलयोः ग्रहणं सकलश्चाकलौ च[६] तेषां भेदेनेत्यर्थः। बन्धवशात् बन्धवैचित्र्यात् त्रिमलद्विमलैकमलत्वलक्षणात् त्रिधा स्थितः सकलप्रलाया-कलविज्ञानाकलभेदेन[७] इत्यर्थः। तदुक्तं तत्त्वप्रकाशे–

मलयुक्तस्तत्राद्यो मलकर्मयुतो द्वितीयः स्यात्।
मलमायाकर्मयुतः सकल। इति।
वक्ष्यति च पशवस्त्रिविधा ज्ञेया इत्यादिना।

---

१. अवेक्ष्यैव] मु,क२;अपेक्ष्यैव- क१;
२. कांश्चित्] मु,क२; कंचित्- क१;
३. श्रेयसः] मु,क२;श्रेयसां- क१;
४. अवेक्ष्य] मु;अपेक्ष्य- क१,क२;
५. अकलपदेन] मु,क२; अकलभेदेन- क१
६. सकलश्चाकलौ च] मु,क२; सकलश्चासौ अकलश्च- क१
७. सकलप्रलायाकलविज्ञानाकलभेदेन] मु; ङ्गविज्ञानकलभेदेन- क१,क२

(वृत्तिः) यः सदा पशुत्वसंरुद्धदृक्क्रियाप्रसरः पशुत्वेन मलेन संरुद्धः सम्यक् तिरस्कृतो दृक्क्रिययोः प्रसरो विषयौन्मुख्यं यस्य स तथोक्तः। यः पुनः बन्धवशात् त्रिमलद्विमलैकमलोपाधिना सकलद्वयकलभेदेन त्रिधा स्थितः त्रिप्रकारेण प्रमाणैर्निश्चितः स पशुः पशुरिति कृतनामा। सदेत्यनेन दीक्षया निरुद्धस्वरुद्धत्वे[1] पतित्वात्[2] न पशुरिति पठनीय इति सूचितम्।

—•—

(व्याख्या) पाशलक्षणमाह–

(वृत्तिः) पञ्चमं लक्षयति –

कलादिक्षितिपर्यन्ता स्थिता तात्त्विकसंहतिः।। १३।।
पाशात्मकः पदार्थोऽयं पञ्चमः परिपठ्यते।

(व्याख्या) कला आदिः यस्याः सा कलादिः क्षितिः पर्यन्ता यस्याः सा क्षितिपर्यन्ता। कलादिश्च सा क्षितिपर्यन्ता च कलादिक्षितिपर्यन्ता। तत्त्वानां सम्बन्धिनी तात्त्विकी तात्त्विकी च संहतिश्च तात्त्विकसंहतिः विधेयापेक्षया अयमिति पुंल्लिङ्गनिर्देशः। न च मलकर्मशुद्धाध्वादिषु अव्याप्तिः। मलस्य पशौ कर्मणो मायायां शुद्धाध्वनः कुण्डलिन्यां निरूपितत्वाच्च। अवशिष्टकलाद्यवनिपर्यन्तमायेयपाशस्यैव[3] अत्र लक्षितत्वात्[4]। बहुवक्तव्यत्वात् पतिपशुपाशेषु प्रमाणान्यत्र नोक्तानि।

(वृत्तिः) या कला आदौ क्षितिः पर्यन्ते यस्याः सा कलादिक्षितिपर्यन्ता। तथा सती स्थिता पर्यवस्थिता तत्त्वेषु भवा तात्त्विकी तात्त्विकी चासौ संहतिश्च तात्त्विकसंहतिः। तात्त्विकसमूहः सोऽयं पदार्थः पाशात्मकः पाश इति कृतनामा पञ्चमः परिपठ्यते। विधेयोपाधिना अयमिति पुंल्लिङ्गोक्तिः।

—•—

(व्याख्या) कारकलक्षणमाह–

(वृत्तिः) षष्ठं लक्षयति –

भुक्तिमुक्तिव्यक्तिफला क्रिया दीक्षाह्वया परा।। १४।।
षष्ठोऽभिधीयते तन्त्रे पदार्थो मुनिपुङ्गवाः।

(व्याख्या) भुक्तिश्च मुक्तिश्च व्यक्तिश्च भुक्तिमुक्तिव्यक्तयः। ताः फलानि यस्याः सा तथोक्ता। भुक्तिः कालाग्निरुद्रभुवनादिषु अनाश्रितान्तेषु भुवनेषु कर्मेच्छानुसारेण भोगः। मुक्तिः मलत्रयमुक्तिः व्यक्तिः शिवत्वाभिव्यक्तिः एतासां मध्ये अभिव्यक्तिफलकत्वमेव तल्लक्षणम्।

---

१. दीक्षानिरुद्धस्वरुद्धत्वे] ज४;दीक्षया निरुद्धस्वविरुद्धत्वे-ज१,ज२; दीक्षया निरुद्धयते विरुद्धत्वे-ज३
२. पतित्वात्]ज१,ज३,ज४; पशुत्वात्- ज२
३. अवशिष्टकलाद्यवनिपर्यन्तमायेयपाशस्यैव] क१,क२; ङमायापाशस्यैव- मु
४. लक्षितत्वात्] मु,क२; लक्ष्यत्वात्- क१;

तत्तद्दीक्षानुरूपं[१] तारतम्यम् अभिव्यक्तौ समयदीक्षायामप्यस्त्येव। यद्वा साक्षात् परम्परासाधारण्येन[२] अभिव्यक्तिसाधनत्वं[३] तल्लक्षणम्[४]। परम्पराद्योतनार्थमेव भुक्त्युपादानम्। अत एव परा उत्कृष्टा क्रियान्तरेभ्यः दीक्षाभिधाना क्रिया शिवशक्तिः अस्मिन् तन्त्रे षष्ठः पदार्थोऽभिधीयते[५]। अथवा भुक्त्याद्यन्यतमफलकत्वं तल्लक्षणम् अतोऽपि न समयादावव्याप्तिः। इदं च भुक्तिसाधनत्वं सालोक्यादिसाधने[६] कर्मणि अतिव्याप्तमिति। परा इति। परा शिवव्यापारात्मिकेत्यर्थः[७]।

(वृत्तिः) हे मुनिपुङ्गवाः ऋषिसत्तमाः या भुक्तिमुक्तिव्यक्तिफला भुक्तिमुक्तिव्यक्तयः फलानि साध्यानि यस्याः सा तथोक्ता। निरतिशयपरमुक्तिसिद्धिसाधनत्वात्। क्रियान्तरेभ्यः परा उत्कृष्टदीक्षाह्वया दीक्षानाम्नी क्रिया शिवाग्नावाज्यक्षेपणादिरूपा। सोऽयं पदार्थः तन्त्रे शिवागमे षष्ठोऽभिधीयते। उद्देशक्रमतः षष्ठः कारकः कारक इति कृतनामोच्यत इत्यर्थः। भुक्तिस्तु मायान्तरितभुवनपतित्वभुवनवासित्वोपाधिना परापररूपा। मुक्तिरपि मुक्तशिवविषया अनन्तादिविषयोपाधिना परापररूपा। व्यक्तिः शिवत्वाभिव्यक्तिः। सा च सर्वात्मनाऽसर्वात्मना चेति परमुक्ताऽपरमुक्तविषया[८] द्विरूपा। स्वसुनयगलितपरनयपतितधियः शैवैकदेशिनः केचित् ज्ञानान्मुक्तिरिति वदन्तं वेदान्तवादिनमनुसृत्य ज्ञानादेव मुक्तिः नान्यथेति कथयन्ति। तदनुचितमेव। मलो ज्ञानाऽनिवर्त्यो भवति[९] आत्मकरणाच्छादकत्वात् तिमिरवदिति मलस्य साधितकर्म-निवर्तनीयत्वात् सद्यश्शरीरपतनसहकृतमुक्तिमद्दीक्षितैरतिमलपक्वतः केवलिषु निराधार-शिवकृतदीक्षया सद्यो मुक्तिं गतैरप्यनैकान्तिकत्वाच्च तेषां तदभ्यासानवकाशत्वात्। ननु केवलात्मसु शिवस्य क्रियाशक्तिरेव दानक्षपणयोगित्वाद्दीक्षेत्युच्यते। शक्तेरेकत्वात्। ज्ञानरूपतां च न निजहातीति पुनः सा ज्ञानशब्दशब्दिता च। तत्राज्यादिक्षेपणरूपा कथम्। सत्यम्। अत्राप्याज्यक्षेपणा-दिलक्षणक्रियोपबृंहिता सा क्रियाशक्तिरेव। संस्कारस्य पुरुषविषयत्वाद्दीक्षेति। दीक्षा च ज्ञानशब्दशब्दिता पर्यवसितेति सर्वं समञ्जसम्। अतः दीक्षाक्रिया बन्धहेतुः कर्मत्वादिति परप्रयुक्ते हेतौ प्रत्युत बन्धनिवर्तकत्वेन प्रायश्चित्तकर्मादिना व्यभिचारोद्धृतिप्रमुखदूषणोक्त्या निराकृतिर्न विस्तीर्यते। ज्ञानोपायस्याभ्यासलक्षणक्रियाव्यभिचारिणो सद्योनिर्वाणदीक्षामात्राङ्गभूतत्वात् व्याप्यत्वं विद्यत इति गौणत्वमवगम्यताम्।

—•—

---

१. तत्तद्दीक्षानुरूपं] मु,क२;तद्दीक्षानुरूपं- क१;
२. परम्परासाधारण्येन] मु,क२; परम्परासाधारणेन- क१;
३. अभिव्यक्तिसाधनत्वं] मु; व्यक्तिसाधनं- क१; वा भुक्त्यादिसाधनत्वं तल्लक्षणं द्रष्टव्यम्। कर्मण्यप्यतिव्याप्त . . . . परेति परशिवव्यापारात्मिकेत्यर्थः।-क२
४. तल्लक्षणम्] क१,क२; तल्लक्षणं द्रष्टव्यम्-मु
५. अभिधीयते] मु; विधीयते- क१,क२
६. सालोक्यादिसाधने] क१,मु; सालोक्यादिसाधनम् अत एव परा उत्कृष्टा क्रियान्तरेभ्य क्रिया शक्तिः अस्मिन् तन्त्रे षष्ठः पदार्थोऽभिधीयते -क२
७. परा शिवव्यापारात्मिकेत्यर्थः] मु,क२; परशिवव्यापारात्मिकेत्यर्थः- क१;
८. परमुक्ताऽपरमुक्तविषया- ज१,ज३,ज४; परमुक्तविषया- ज२
९. तदनुचितमेव। मलो ज्ञानाऽनिवर्त्यो भवति] ज१,ज३; ज२ कोशे नास्ति।; तदनुचितमेव। मलो ज्ञानान्निवर्त्यो भवति-ज४

(व्याख्या) ननु शुद्धाध्ववर्तिनां शिवादीनां तत्त्वादीनां पाशेष्वपरिगणनादन्यत्राप्यनन्तर्भावात् पदार्थान्तरता स्यादित्यत आह–

(वृत्तिः) मलकर्मशिवतत्त्वादीनाम् अनुद्दिष्टालक्षितत्वात् पदार्थान्तरपरिगणनास्ति किमित्याशंकोपशमनार्थमाह –

षट्स्वेतेषु पदार्थेषु शिवाद्यवनिपश्चिमम्।। १५।।
सर्वमन्तर्गतं यस्मात् परीक्ष्यन्तेऽत[1] एव ते।

(व्याख्या) प्रागुक्तेषु एतेषु पदार्थेषु षट्सु पत्यादिषु[2] शिवाद्यवनिपश्चिमं सर्वं तत्त्वजातं यस्मात् अन्तर्गतं अत एव हेतोः ते षट् पदार्थाः परीक्ष्यन्ते। यथान्तर्भावो[3] व्यक्तीभविष्यति तथा सयुक्तिकं तत्र तत्र वक्ष्यामः। यथा लक्षणप्रमाणानाम् अदुष्टता[4] तथा विचार्यन्त इत्यर्थः। अथ वा स्वायम्भुवादौ पदार्थानामधिकसङ्ख्याश्रवणात् कथं षडेवेत्यत आह– षट्सु एतेष्विति। ननु षट् पदार्थाः परीक्ष्यन्त इति प्रतिज्ञाय कुतः कारकपदार्थः पृथक् पटले न परीक्ष्यते। कुतो वानुद्दिष्टमलक्षितम् एतेष्वेवान्तर्गतं प्रमाणं पृथक् पटले परीक्ष्यते। अन्तर्गतस्यापि पृथङ्निरूपणे अतिप्रसङ्गात् अप्रतिज्ञातः तन्त्रावतारः कथं पृथङ्निरूप्यत इति चेत्, मैवम्। न तावत्[5] कारकपदार्थस्य पृथक् पटलेऽनिरूपणं दोषः[6]। भुक्तिमुक्तिव्यक्तिफलेत्यादिना उक्तस्य लक्षणस्य[7] दीक्षैव मोचयेत् पाशान् इत्यादिना परीक्षितप्रायत्वेन तदवान्तरभेदानां तत्तद्भुवननिष्ठभुक्तिमुक्ति-फलत्वस्य च क्रियापादे निरूपितत्वेन अवशिष्टस्य निरूपणीयस्य चाभावात्। इदं च कारकपटलस्यादृश्यत्वमभिप्रेत्य। यदि क्वचित् दृश्येत तदास्याः शङ्काया अनवकाश एव। प्रमाणस्य चान्यत्रान्तर्गतत्वेऽपि[8] उक्तषट्पदार्थसाधकत्वेन पृथक् जिज्ञासितत्वात् सर्वशेषत्वाच्च पश्चात् निरूपणम्। तन्त्रावतारस्य तु प्रमाणपटलोक्तागमप्रामाण्यनिर्वाहकसम्प्रदायाविच्छेदप्रतिपादकत्वेन प्रमाणशेषत्वेन पार्थक्यं पश्चात् भावश्चेति सर्वं समञ्जसम्।

(वृत्तिः) यस्मात् षट्सु एतेषु पदार्थेषु शिव आदिरवनिः पश्चिमा यस्य सदाशिवादितत्त्वजातस्य तच्छिवाद्यवनिपश्चिमं सर्वं समस्तमन्तर्गतमन्तर्भूतं तस्मात् न हि तदनुद्दिष्टालक्षितत्वदोष इति नयेनानुमानेन ते षडेव परीक्ष्यन्ते विचार्यन्ते। तेषु परीक्षितेषु सर्वमुद्दिष्टलक्षितपरीक्षितप्रायमेवेति भावः। प्राक् शुद्धाध्वा वा यतो ऽजनीत्यनेन शिवतत्त्वादीनि तत्कार्यत्वात् कुण्डलिन्यामन्तर्भूतानि खचिता कर्मभिरित्यनेन कर्म मायायामन्तर्भूतं पशुः पशुत्वसंरुद्ध

---

१. अत] मु,क२; अत्र- क१
२. षट्सु पत्यादिषु] क१,मु; श्क२श कोशे नास्ति।
३. यथान्तर्भावो] मु,क२;यत्रान्तर्भावो- क१;
४. अदुष्टता] मु,क२;उत्कृष्टता- क१;
५. मैवम्। न तावत्] क१; मैवम् तावत्- मु,क२
६. अनिरूपणं दोषः] क२; दोषः- क१; न दोषः-मु
७. उक्तस्य लक्षणस्य] क१,क२; उक्तलक्षणस्य- मु
८. चान्यत्रान्तर्गतत्वेऽपि] क१,क२; चान्यत्रान्तर्भूतत्वेऽपि- मु

इत्यनेन पशुत्वेन विना पशुशब्दप्रवृत्त्ययोगात् मलः पशुपदार्थे तदनुवर्तकरोधशक्त्या सहान्तर्भूतः। तदन्यदपि समस्तं तत्र तत्रान्तर्भूतमुत्तरत्र दृश्यते।

—•—

(व्याख्या) एवं षण्णां पदार्थानां परीक्षायां कर्तव्यायां प्रथमलक्षितः पतिपदार्थस्तावत् परीक्ष्यते।

यद्वा[१] ननु लयभोगाधिकाराणां त्रयाणां व्यापाराणाम् अन्योन्यविरुद्धत्वात् तदाश्रयः पतिरपि अनेकः स्यादिति अनेकेश्वरप्रसङ्गः[२]। यदाहुः- अयमेव हि भेदो भेदहेतुर्वा यत् विरुद्धधर्माधिकरणत्वम् इति लयादिमत्त्वे[३] विकारित्वापत्तिश्च इति आशङ्क्याह-

(वृत्तिः) घटनिर्मातायं कुलालस्तन्नाशकः स तु जलवाहक इतिवदयं विन्दुकार्योत्पत्ति-नाशयोः कर्तृभेदोऽस्ति किमित्याशंक्य उदकसर्जनोपसंहारादिषु भानोरेकरूपं कर्तृत्वं सिद्धमित्याकलय्य कुलालस्यापि तद्भेदकत्व-दर्शनात् असाधुदर्शनमिदमिति ज्ञापयन् क्रमतः पतिपादार्थपरीक्षां विधत्ते-

लयभोगाधिकाराणां न भेदो वास्तवः शिवे।। १६।।
किन्तु बिन्दोरणूनां च वास्तवा एव ते मताः।

(व्याख्या) लयभोगाधिकाराणां भेदः तत्प्रयुक्तोभेदः शिवे वास्तवो न, किन्तु औपाधिकः। कस्य तर्हि वास्तव इत्यत आह- किन्त्विति। ते लयभोगाधिकाराः बिन्दोः अणूनां जीवविशेषाणामेव च वास्तवाः स्वाभाविकाः मताः। न सोपाधिका इत्यर्थः। तत्र बिन्दुगतानां लयभोगाधिकाराणां भेदेन औपचारिकभेदस्वरूपं पत्यौ ग्रन्थकार[४] एव उपसंहृतेत्यादिना[५] स्वयमेवानुपदं वक्ष्यति। अणुगतलयभोगाधिकाराणां भेदेन औपचारिकशिवभेदाः[६] कथ्यन्ते। तत्रानवच्छिन्नचिदात्मनि परमशिवे एकलोलीभावरूपेण लयेन मुक्ता लयिनः बैन्दवभुवनवर्तिनः तद्गतसुख-भाजोऽणुसदाशिवा भोगिनः तद्वर्तिनो देहपरिस्पन्दादिद्वारेण पञ्चकृत्यकारिणोऽधि-कारिणस्तदधिष्ठातृतया शिवोऽपि लयी भोगी अधिकारीत्यौपाधिकभेदं भजते। तदुक्तं रत्नत्रये-

तथाहि विमलोदारगम्भीरे चिन्महोदधौ।
स्वात्मनि प्रविलीयन्ते तेनैते समधिष्ठिताः।
शिवेन निभृतात्मीयशक्तयोऽन्येऽपि शेरते।
समालिङ्ग्य महामायामपरां वृत्तिशालिनीम्।
तत्संस्पर्शसुखैकाग्र्यबुद्धयो[७] भोगलम्पटाः।

---

१. यद्वा ननु] मु,क२;यद्वा- क१;
२. अनेकेश्वरप्रसङ्गः] मु;अनेकेश्वरप्रसङ्गात्- क१; अनेकेश्वरत्वप्रसङ्गात्-क२
३. लयादिमत्त्वे] मु,क२;लयादिमत्त्वेऽपि- क१;
४. ग्रन्थकारः] क१,क२; प्रथमं ग्रन्थकारः- मु
५. उपसंहृतेत्यादिना] मु; एव संश्रुतेत्यादिना- क१;एव संहृतेत्यादिना-क२
६. औप[illegible]रिकशिवभेदाः] मु,क२;औपचारिकात् शिवभेदाः- क१;
७. त[illegible]स्पर्शसुखैकाग्रबुद्धयो] मु,क२;तत्संस्पर्शसुखैकाग्र्यबुद्धयो- क१

तथा परे परं व्योम समाश्रित्याध्वमूर्धनि।
पञ्चकृत्यानि कुर्वन्ति पत्युराज्ञानुवर्तिनः।
ततः स तेषामेकोऽपि लयभोगाधिकारिणाम्।
अधिष्ठातृतया भेदमौपचारिकमृच्छति। इति।

(वृत्तिः) प्राक् जडस्पन्दक्रियोत्पादने भगवतः शक्तिः कर्तृत्वमेकमेवानेक-व्यापृतिनिर्वर्तनक्षमत्वात् अनेकव्यवहारं भजतीति सूचितम्। ततः शिवे लयभोगाधिकाराणां भेदो न वास्तवः न स्वभाविकः। किन्तु तर्हि केषां[1] ते वास्तवाः? बिन्दोरुपसंहृतोद्युक्ता-विष्कृतकार्यस्वरूपभेदभुवनभेदाः अणूनामात्मनां वक्ष्यमाणनयेन लयिनो भोगिनोऽधिकारिण इति भेदाश्च वास्तवाः स्वाभाविका एव।

—•—

(व्याख्या) अन्यगतावस्थाभेदेनापरस्य व्यपदेशभेदं सदृष्टान्तमाह–

(वृत्तिः) विकृतित्वं नोपलभ्य जडस्पन्दक्रियोत्पादने[2] शक्तत्वं च सूचयन्नौपचारिक-भेदव्यपदेशभजनं सदृष्टान्तं दर्शयति –

यथार्कः पङ्कजं नित्यं बोधसंशोषणादिभिः।। १७।।
कर्मभिर्बोधकाद्याख्यां लभतेऽत्र तथा शिवः[3]।

(व्याख्या) सूर्यः पङ्कजं नित्यं बोधसंशोषणादिभिः[4] विकासग्लानिसुरभिलत्वादिभिः कर्मभिः घटयन् बोधकादिव्यपदेशं यथा लभते तथा शिवोऽपि बिन्दौ स्वसन्निधानमात्रेण लयभोगाधिकारान् कुर्वन् तत्तन्नाम्ना व्यवहारभेदं लभते। तथा च शिवे वास्तवभेदाभावेन नानेकेश्वरत्वं न वा विकारित्वम्। वस्तुतो लयादिमत्त्वानङ्गीकारात् तत्तत्कर्तृत्वस्यैव पतिविशेषणलक्षणत्वादिति भावः।

(वृत्तिः) यथा यद्वदर्कः सूर्यः स्वदाहप्रकाशस्वरूपादच्युतः सान्निध्यमात्रतया पङ्कजं कमलं नित्यं प्रत्यहं बोधसंशोषणादिभिः विकासम्लानसुरभ्युद्भावनादिभिः कर्मभिर्व्यापृतिभिः[5] घटयन् बोधकसंशोषकादिव्यपदेशं लभते। तथा तद्वदत्र प्रकृते शिवो[6] वस्तुतः क्रियात्वे चौतन्यव्यतिरिक्तत्वात् जडत्वप्रसङ्गतस्तद्धेतुत्वात् क्रियेति व्यपदेशं भजत्स्वस्वान्यप्रकाशस्वरूपादच्युतः[7] संकल्पलक्षणक्रियार्थक्रियाविशिष्टशक्तिसंबन्धलक्षणसान्निध्यमात्रतया लयादिव्यापृतिभिः बिन्दुं घटयन् लयादिव्यपदेशं लभते।

—•—

---

१. केषां] ज२,ज३,ज४;तेषां- ज१
२. जडस्पन्दक्रियोत्पादने] ज२,ज३,ज४;जडस्पन्दक्रियोत्पादेन- ज१
३. तथा शिवः, ज१,ज३,ज४; सदाशिवः-ज२
४. पङ्कजं नित्यं बोधसंशोषणादिभिः] क२;पङ्कजं- क१; पङ्कजं बोधसंशोषणादिभिः- मु
५. विकासम्लानसुरभ्युद्भावनादिभिः कर्मभिर्व्यापृतिभिः] ज१,ज३; ज२ कोशे नास्ति।
६. शिवो]ज१,ज२,ज४; शिवे-ज३
७. स्वस्वान्यप्रकाशस्वरूपादच्युतः] ज४;स्वस्वान्यस्वरूपादच्युतः-ज१,ज२,ज३

(व्याख्या) लयादिव्यपदेशाः[१] शिवे युगपत् किं न स्युरित्यत आह –

(वृत्तिः) लयादिव्यपदेशाः शिवे युगपत् किं न स्युरित्यत आह –

उपसंहृतकार्यात्मा यदा बिन्दुर्व्यवस्थितः।। १८।।
तदा लयाह्वयं तत्त्वं शिवतत्त्वं तदेव हि।

(व्याख्या) यदा यस्मिन् काले उपसंहृतानां कार्याणाम् आत्मा स्वरूपं यस्य स तथोक्तः बिन्दुः व्यवस्थितः अवतिष्ठते तदा तस्मिन् काले शिवः लयाह्वयं तत्त्वं लयनामात्मकं तत्त्वं भवति। किं तर्हि शिवतत्त्वम् इतो भिन्नं। नेत्याह –शिवतत्त्वमिति। हि प्रसिद्धौ।

(वृत्तिः) यदा यस्मिन् काले उपसंहृतमनभिव्यक्तमनर्थक्रियायुक्तं कार्यं करणीयमेवात्मा स्वरूपं यस्य स उपसंहृतकार्यात्मा शान्त्यतीतकलायां तदा विभक्तिबिधुरत-यान्तरितत्वाच्छान्त्यादिचतुष्टयस्य अविभक्तकलात्मा शिवतत्त्वसंज्ञितश्च बिन्दुर्व्यवस्थितः कुण्डलिनी स्थितवती तदा तस्मिन् काले यत्तदुपसंहृतिहेतुभूतं तत्त्वं तदुपसंहृतकार्यत्वात् कर्तव्यतिरस्कृतिमत् लयाह्वयं लय इत्याह्वयो अभिधानं[२] यस्य तत्तथोक्तं लयमिति नाम लभत इत्यर्थः। किं तर्हि शिवतत्त्वमितो भिन्नं नेत्यत आह –शिवतत्त्वं तदेव हीति। हि प्रसिद्धौ। अधिष्ठानलक्षणं यच्छिवतत्त्वमित्युच्यते। तदेव लयतत्त्वमेवेत्यर्थः।

—•—

(व्याख्या) ननु बिन्दुविकारभूतेषु शिवतत्त्वादिषु उत्कर्षापकर्षादिदर्शनात् अत्रापि किमुत्कर्षादयः सन्ति। नेत्याह–

(वृत्तिः) वक्ष्यमाणबैन्दवतत्त्वानामिव किमस्यापि परिणतत्वादिलक्षणं विद्यते नेत्याह[३]–

विद्यादितत्त्ववन्नेदं सन्नतत्वादिलक्षणम्।। १९।।

(व्याख्या) इदं शिवतत्त्वं[४] बिन्दुविकारविद्यातत्त्वेश्वरतत्त्वादिवत् सन्नतत्वादिलक्षणम् तारतम्यग्रस्तं न भवतीत्यर्थः।

(वृत्तिः) इदं यत्तदुपसंहृतकार्यत्वादतिक्रान्तानभिव्यक्तकार्यात्म शिवतत्त्वादिशब्द-शब्दितबिन्दुकं सृष्टं शिवतत्त्वम् अधिष्ठानलक्षणं[५] विद्यादितत्त्ववत् सन्नतत्वादिलक्षणं न। प्रतिलोमतो विद्या आदिर्येषामीश्वरसदाशिव–शिवतत्त्वानां तानि विद्यादितत्त्वानि विद्यादितत्त्वानामिव विद्यादि-तत्त्ववत् सृज्यशिवतत्त्वपञ्चकमिव सन्नतत्वं परिणतत्वं आदिर्यस्या नित्यत्वादेस्तत् सन्नतत्वादि सन्नतत्वाद्येव लक्षणं यस्य तत् सन्नतत्वादिलक्षणं न न भवति। उपलक्षणं चौतदनुपदमेव परीक्षितव्यतत्त्वद्वयमपि तद्वन्नेति।

—•—

१. लयादिव्यपदेशाः] क१,क२; बैन्दवलयादिव्यपदेशाः– मु
२. तदा तस्मिन् काले ... लय इत्याह्वयो अभिधानं]ज१,ज२,ज४; ज३ कोशे लुप्तम्।
३. शिवतत्त्वं तदेव हीति। हि प्रसिद्धौ ... परिणतत्वादिलक्षणं विद्यते नेत्याह] ज१,ज३,ज४; ज२ कोशे नास्ति।
४. शिवतत्त्वं] मु,क२;शिवं तु– क१;
५. शिवतत्त्वम् अधिष्ठानलक्षणं] ज१,ज३,ज४; शिवतत्त्वाधिष्ठानलक्षणं– ज२

(व्याख्या) कीदृशं तर्हि तत्स्वरूपमित्यत आह –

(वृत्तिः) किन्तु कीदृग्रूपं तच्छिवतत्त्वम्?

किन्तु[1] स्वदृक्क्रियाशक्तिकिरणात्मकमव्ययम्।
व्यापकं नित्यमचलं सर्वतोमुखमैश्वरम्।। २०।।

(व्याख्या) स्वस्य शिवस्य या दृक्क्रियाशक्तिः सैव किरणः प्रकाशः तदात्मकम्। एतेन एकस्यैव शक्त्यात्मकशिवतत्त्वस्य दृक्क्रियात्मकत्वोक्त्या तयोः भेदो निवारितः। उक्तं च एकस्या एव शक्तेः दृक्क्रियात्मकत्वं मालिनीविजये–

ज्ञापयन्ती जगत्तत्र ज्ञानशक्तिर्निगद्यते।
एवम्भूतमिदं वस्तु भवत्विति यदा पुनः।
जाता तदैव तद्वस्तु कुर्वत्यत्र क्रियोच्यते। इति।

एवमन्यत्रापि उक्तम्।

एकैवानेकतां याति शिवशक्तिरुपाधितः। इति।

सैषा शिवाश्रया शक्तिरमोघा बलशालिनी।
एकानेकविभागेव[2] कार्यभेदात् विभाव्यते[3]। इति।

अत्रार्थे श्वेताश्वतरश्रुतिरपि द्रष्टव्या। अव्ययम् अपक्षयरहितं ध्वंसाप्रतियोगीति वा[4]। व्यापकं विभुम् नित्यं कालानवच्छिन्नम् अचलं क्रियारहितं कूटस्थमिति यावत्। सर्वतोमुखं सर्वविषयकम् अनेन पशुज्ञानाद्वैलक्षण्यं दर्शितम्। ऐश्वरम् ईश्वरसम्बन्धि।

(वृत्तिः) स्वदृक्क्रियाशक्तिकिरणात्मकं स्वस्य शिवस्य या दृक्क्रियाशक्तिः सैव किरणं प्रकाशः तदात्मकम् एव अव्ययं क्षयरहितं मलातिरस्कृतत्वात्। व्यापकं देशानवच्छिन्नं नित्यं कालानवच्छिन्नमचलं जडस्पन्दक्रियारूप-रहितं सर्वतोमुखं सर्वविषयमैश्वरमीश्वरसंबन्धि तदीदृग्रूपम्।

—•—

(व्याख्या) ननु उपसंहृतकार्यात्मेत्यादिना पत्युरेव[5] लयतत्त्वव्यपदेशमुक्त्वा[6] इदानीं शक्तेः लयादिरूपत्वमुच्यत इति पूर्वोत्तरयोः वैयधिकरण्यम् इत्याशङ्क्याहतस्मिन्निति।

(वृत्तिः) ननु पत्युरेव लयशिवव्यपदेशबीजं दर्शयितुमुपक्रम्य शक्तेर्दर्शनं सागरं गन्तुकामस्य हिमवद्गमनोपममित्याशंक्याह –

---

१. किन्तु] मु;किञ्च- क१,क२;
२. एकानेकविभागेव] मु,क२;एकानेकविभागेन- क१;
३. विभाव्यते] मु,क२;विभाव्यताम्- क१;
४. ध्वंसाप्रतियोगीति वा] मु,क२;ध्वंसप्रतियोगीति-क१;
५. पत्युरेव] मु,क२;पत्युरेवं- क१;
६. लयतत्त्वव्यपदेशमुक्त्वा] क१,क२; लयतत्त्वशिवतत्त्वव्यपदेशभेदमुक्त्वा- मु

तस्मिन् विस्पष्टचिन्मात्रो व्यापकत्वादिधर्मवान्।
अनन्योन्यश्च तच्छक्तेः समवायात् स्थितः शिवः।। २१ ।।

(**व्याख्या**) तस्मिन् पूर्वोक्तस्वरूपे शक्त्यात्मके शिवतत्त्वे विस्पष्टचिन्मात्रः विशेषेण स्पष्टं प्रकाशमानं चिन्मात्रं चित्स्वरूपं यस्य सः तथोक्तः। व्यापकत्वादिधर्मवान् आदिपदेन पूर्वोक्ताव्ययत्वादयो गृह्यन्ते। ते धर्मा अस्य सन्तीति तद्वान्[१]। ननु तत्रस्थितत्वमात्रेण[२] तद्व्यपदेशभाक्त्वेऽतिप्रसङ्गः। पूर्वोक्तं वैयधिकरण्यं च तदवस्थमित्यत आह - अनन्य इति। तच्छक्तेः तस्याः शिवतत्त्वात्मकत्वेन उपवर्णितायाः शक्तेः सकाशात् अनन्यः अभिन्नः। एवं च नातिप्रसङ्गो न वा वैयधिकरण्यमिति भावः। नन्वेवं[३] सति तस्मिन्निति आधाराधेयभावनिर्देशः शक्तिशक्तिमत्त्वादिव्यवहारश्च न स्यात्। श्रूयते च वैधर्म्यकृतो भेदो रत्नत्रये -

तयोर्भेदोऽधुनोच्यते।

शुद्धेऽध्वनि[४] शिवः कर्ता करणं शक्तिराश्रिता।
समाश्रयः स विज्ञेयः स्वनिष्ठघनचिन्मयः।
सा तु संविदशेषार्थग्रहणे लम्पटोदया।
परमैश्वर्यरूपा[५] च महिमाव्याप्तिरूपिणी।

महेश्वरो महानेषः सर्वार्थव्यापकः तयोः। इत्यत आह-अन्य इति। ननु कथमनन्यस्यान्यत्वं भेदाभेदयोः एकत्र विरोधात् इत्यत आह- समवायादिति। तादात्म्यलक्षणसम्बन्धात् हेतोरित्यर्थः। न च भेदाभेदयोरेकत्र विरोधः संयोगतदत्यन्ताभाववत् प्रमाणसिद्धत्वेन विरोधाभावादिति भावः। तदुक्तं- "सम्बन्धः शक्तिमच्छक्त्योस्तादात्म्यं स्याद्" इति। अस्मिन्नर्थे श्वेताश्वतरश्रुतिरपि द्रष्टव्या। एतादृशसम्बन्धेन प्रभामण्डले भानुवत् शिवोऽपि शक्तिकिरणमध्ये तिष्ठति महिम्नि स्वे प्रतिष्ठित इति भावः। तदुक्तं श्रीमन्मतङ्गपारमेश्वरे -

अथ पत्युरधिष्ठानं स्वशक्तिः किरणात्मिका।
तस्यां दिवि सुदीप्तात्मा निष्कम्पोऽचलमूर्तिमान्। इति।

(**वृत्तिः**) शिवः शिव इति लब्धव्यपदेशः पतिः तस्मिन् पुरोक्तपरसंवित्स्वरूप-शक्त्यात्मकशिवतत्त्वे विस्पष्टचिन्मात्रः विशेषेण स्पष्टं स्वसंविद्भूत्वा प्रकाशमानं स्वमात्रवित्तमतया[६] यत् स्वसंवित्तिरित्युक्तं तच्चिन्मात्रं परानपेक्षाविवक्षित[७] चिद्रूपमेव केवलं तादृक् शक्तिमद्रूप[८]

---

१. तद्वान्] क१,क२; तद्वान् धर्मवान्-मु
२. तत्रस्थितत्वमात्रेण] मु,क२;तत्रस्थितमात्रेण- क१;
३. नन्वेवं] क१,क२; नत्वेवं- मु
४. शुद्धेऽध्वनि] मु,क२;शुद्धाध्वनि- क१
५. परमैश्वर्यरूपा, क१,क२; परमैश्वर्यरूपं- मु
६. स्वमात्रवित्तमतया]ज१,ज२,ज४; स्वमातृविविक्तमतया-ज३
७. परानपेक्षाविवक्षितं] ज१,ज२,ज४; परमानन्दापेक्षाविवक्षितं-ज३
८. शक्तिमद्रूपं] ज१,ज३,ज४; शक्तं रूपं- ज२

करणभूतपरसंवित्तिद्वारा स्वेतरचिदचिज्ज्ञेयनिपतितज्ञानमिति[१] अचित् स्पन्दक्रियाविष्कारक-शक्तालक्षणक्रियेति चोक्तपरसंवित्तिरूपशक्तिलक्षणकरणसाध्यद्वयर्थक्रियालक्षण-स्वार्थक्रियाकर्तृत्वात्[२] ज्ञातृकर्तृरूपकर्तृलक्षणं भूत्वा यस्य स तथोक्तः। व्यापकत्वादिधर्मवान् आदिशब्देन प्रागुक्ताव्ययादि गृह्यते। अनन्योऽन्यश्च तच्छक्तेस्तस्याः शिवतत्त्वात्मनोपवर्णितायाः शक्तेरनन्यः यदेव परसंवेदनं शक्तिरूपं तदेव स्वसंवेदनं सत् स्वसंवित्सिद्धं शिवरूपमित्यपृथक्सिद्धत्वादन्यः सन् स्वयं न विद्यते इति अनन्यः। अन्यश्च वस्तुत एकमपि ज्ञानं तस्य स्वपरप्रकाशस्वरूपत्वं विद्यते इति[३] स्वप्रकाशस्वरूपमात्रविवक्षया शिव इति परप्रकाशस्वरूपमात्रविवक्षया शक्तिरिति पृथक्सिद्धतयोपवर्णितः। एवम्भूतः सन् समवायात् तादात्म्यसंबन्धितया तद्रूपी भूत्वा स्थितः स्थितवान्। ततो नैयायिकादीनामिव न ह्याधाराधेयभावमतीयं तु क्लृप्तिः। बिन्दुद्वारा शक्तेः शक्तिद्वारा पत्युरिति लयशिवस्य व्यपदेशद्वयलाभः सुलभ एव।

—•—

(व्याख्या) पूर्वं बिन्दुगतव्यपदेशभेदेन पत्युर्लयादिव्यपदेशभेदमुक्त्वा[४] इदानीं तस्यैव शक्त्यवस्थाप्रयुक्तं व्यपदेशान्तरमाह–

(वृत्तिः) व्यपदेशान्तरमाह –

शक्तोऽयं शक्तयो यस्मात् उद्योगादिक्रियाच्युताः।
शिव एवावतिष्ठन्ते निष्कलश्च स एव तु॥२२॥

(व्याख्या) यस्मात् कारणात् दृक्क्रियादिरूपाः शक्तयो बहुवचनं त्वौपाधिकभेदविवक्षया उद्योगादि–क्रियाच्युताः उद्योगप्रवृत्तिरूपावस्थारहिताः सत्यः शिवे पत्यावेवावतिष्ठन्ते। तस्मादयं पूर्वोक्तलयादि–व्यपदेशभाक् पतिः शक्तः। स एव निष्कलश्चेत्युच्यते शक्तिकलारहितत्वात् पाशकलारहितत्वाच्च। एवकारतुशब्दौ अयोगान्ययोगव्यवच्छेदपरौ। तथा चायमर्थः – लयतत्त्वस्य निष्कलत्वायोगो[५] नास्तीत्येवकारार्थः। लय एव निष्कलः न तु भोगाह्वयः अधिकाराह्वयो वा इति तुशब्दार्थः।

(वृत्तिः) अयं लब्धव्यपदेशद्वयवान् पतिः शक्तः भूयः शक्त इति व्यपदेशं लभते। तत्र हेतुमाह। यस्मात् बिन्दोरनवरतमनन्तमन्त्रमन्त्रमहेश्वरादिशरीरादिजननात् अपचितशक्तित्वात् स्वकीयाः शक्तयो वक्ष्यमाणजनन्यादयः उद्योगादिक्रियाच्युताः। भोगाधिकारव्यापृतिभ्यां गलिताः

---

१. स्वेतरचिदचिज्ज्ञेयनिपतितज्ञानमिति] ज२,ज३,ज४;स्वेतरचिदचिज्ज्ञेयनिवर्तितज्ञानमिति- ज१

२. चोक्तपरसंवित्तिरूप ... क्रियालक्षणस्वार्थक्रियाकर्तृत्वात्]ज१,ज२,ज४; चोक्तपरसंवित्तिरूप ... क्रियालक्षणं स्वार्थक्रियाकतृत्वात्-ज३

३. अनन्यः। अन्यश्च वस्तुत एकमपि ज्ञानं तस्य स्वपरप्रकाशस्वरूपत्वं विद्यते इति -ज१, ज२,ज४; ज३ कोशे न विद्यते।

४. पत्युर्लयादिव्यपदेशभेदमुक्त्वा, मु;पत्युर्लयादिव्यपदेशमुक्त्वा- क१

५. निष्कलत्वायोगो, मु;निष्कलत्वायोगात्- क१,क२

सत्यः शिवे शिवसंज्ञिके स्वस्मिन्नेवावतिष्ठन्ते। तदा कर्तव्यतिरस्कारेण बिन्दुप्रसवाभिमुख-कार्यप्रसृतिहेतुतां[१] न भजन्तीत्यर्थः। एवं लब्धव्यपदेशत्रयवान् यः स एव तु बिन्दुप्रसवाभिमुखी इति तत्कार्यप्रसृत्ययोगात् निष्कलः निष्कल इति व्यपदेशं च लभते। एवकारतुशब्दौ अयोगान्ययोगव्यवच्छेदपरौ।

—•—

(व्याख्या) इदानीं बिन्दुगतभोगाख्यव्यापारभेदेन शक्त्यवस्थाभेदेन च पत्युः व्यपदेशभेदमाह–

(वृत्तिः) भोगव्यपदेशः कदेत्यत आह–

उद्युक्तस्तु यदा कार्ये बिन्दुर्भोगाह्वयं तदा।
लभते शिव उद्युक्तः स एव च सदाशिवः।। २३।।
तत्त्वं तदेव सादाख्यं न शिवाद्वस्तुतो भिदा।

(व्याख्या) यदा बिन्दुः प्राणिनां भोगजननाय कार्यनिष्पत्त्यर्थमद्युक्तः तदा शिवोऽपि भोगव्यपदेशं लभते। तदैवोद्युक्तशक्तियुक्तत्वात् उद्युक्त इति वय्पदेशं सदाशिवव्यपदेशं च लभते। तदेव च सादाख्यं तत्त्वमित्यपि उच्यते। चकारात् सकलनिष्कल इति[२] शक्तिकलायुक्तत्वात् सकलः पाशकलाविधुरत्वात् निष्कल इति। पूर्वोक्तं भेदाभावं स्मारयति न शिवादिति। पूर्वोक्तसंज्ञाविशिष्टात् सदाशिवस्य तत्त्वतो भेदो नास्तीत्यर्थः।

(वृत्तिः) यदा यस्मिन् काले कार्ये बिन्दुरुद्युक्तः प्रसवाभिमुखीभूतः तदा तस्मिन् काले भोगाह्वयं स्वपरिग्रहमहामायास्वचिन्मयशक्त्योस्तदेतत् संज्ञालाभसमनन्तरं भोगाभिधानं शिवो लभते। यो लब्धभोगव्यपदेशवान् स एवैतदुद्योगहेतुभूतशक्तित्वात् उद्युक्तः सदाशिव इति व्यपदेशद्वयं लभते। चकारात् सकलनिष्कल इत्यपि च। यदुद्युक्ततायां[३] निमित्तभूतं सादाख्यं नाम तत्त्वं तदेव शक्तिशक्तिमतोरनन्यत्वात् तदेवेत्युक्तम्। तस्मिन् विस्पष्टचिन्मात्रादिलक्षणतया स्थित इत्यर्थः। शिवाच्छक्तिलक्षणशिवतत्त्वस्थिततयोपवर्णितात्तच्छक्तिलक्षणसादाख्यतत्त्वतयोपवर्णितस्य[४] सदाशिवस्य यथाकथञ्चिदधिकारावस्थासमुत्थकार्यविभक्तिवैकल्यतुल्यत्वादधिकारावस्थायामपि अक्षुब्धभागलक्षणबिन्द्वधिष्ठातृत्वलक्षणलयोऽस्तीति[५] लयावस्थायामपि शान्त्यादिसमुपसंहृतिक-बिन्द्वंशपालनलक्षणः सन्नधिकारावस्थायामपि पुनरवान्तरकार्योद्योगभोगलक्षणबिन्दुपालनात्मा[६]

---

१. बिन्दुप्रसवाभिमुखकार्यप्रसृतिहेतुतां] ज१,ज२,ज४; बिन्दुप्रसवाभिमुखकार्यं प्रसृतिहेतुतां–ज३
२. इति] क१,क२; इति च– मु
३. यदुद्युक्ततायां] ज२,ज३;यद्युक्तायां– ज१;यद्युक्तं–ज४
४. शिवाच्छक्तिलक्षणशिवतत्त्वस्थिततयोपवर्णितात्तच्छक्तिलक्षणसादाख्यतत्त्वतयोपवर्णितस्य] ज३; शिवाच्छक्तिलक्षणशिवतत्त्वस्थिततयोपवर्णितस्य–ज१,ज२; शिवाच्छक्तिलक्षणशिवतत्त्व-स्थिततयोपवर्णितात्तच्छक्तिलक्षणसादाख्यतत्त्वस्थिततयोपवर्णितस्य–ज४
५. अक्षुब्धभागलक्षणबिन्द्वधिष्ठातृत्वलक्षणलयोऽस्तीति] ज१,ज३,ज४; अक्षुब्धभागलक्षणं बिन्द्वधिष्ठातृत्वलक्षणलयोऽस्तीति– ज२
६. पुनरवान्तरकार्योद्योगभोगलक्षणबिन्दुपालनात्मा] ज४;पुनरवान्तरकार्योद्योगलक्षणबिन्दुपालनात्मा–ज१.ज२.ज३

सन् भोगोऽस्तीति[1] चोभयोर्लयभोगयोः सदाशिवतत्त्वात्[2] नाधिकारस्येवान्तरमिति न भिदा भेदो नास्ति। शक्तिलक्षणशिवसादाख्यतत्त्वद्वयस्यापि समा नीतिः बिन्दुलक्षणशिवसादाख्य-तत्त्वद्वयस्यापि तथेश्वरतत्त्वस्येव अत्यन्तभिदा नास्ति। हि तर्हि अधिकारस्य भेदोऽस्ति किं कार्यविभक्त्यौपाधिकभेदोऽस्त्यपि न वस्तुत इत्यनुपदमेव ब्रूमः।

—•—

(व्याख्या) पत्यौ भोगवत्वमाध्यासिकं विवर्तरूपमिति शङ्कां व्युदस्यति-

(वृत्तिः) शिवादेतस्य[3] भिदाऽ सम्भवात् भोगो विवर्तरूपः किमित्याशंक्याहभोगेत्यादि-

भोगस्तत्पालनात्मैव नाध्यासस्तदसम्भवात्।। २४।।

(व्याख्या) पत्यौ भोगव्यपदेशः परिपालकत्वौपाधिनैव नत्वध्यासनिबन्धनः। तत्र हेतुमाह-तदसम्भवादिति। बिन्दुगतलयादिव्यापारकर्तृत्वेनैव तद्व्यपदेशसम्भवे अध्यासो वर्णयितुं न शक्यत[4] इत्यर्थः। भोगस्याध्यासिकत्वनिराकरणं लयाधिकाराध्यासिकत्वनिराकरणस्याप्युपलक्षणम्। तदुक्तं रत्नत्रये शक्तिस्वरूपनिरूपणसमये-

निरावरणनिर्द्वन्द्वनिरुपादानवैभवा ।
विविधोपाधिसम्भेदविवर्तविधुरोदया । इति।

शक्तिशक्तिमतोरभेदेन शक्तेराध्यासिकत्वनिराकरणं शक्तिमतोऽपीति द्रष्टव्यम्। विविधोपाधिशब्देन बिन्दुगतलयभोगाधिकारा उच्यन्ते।

(वृत्तिः) भोगोऽत्र तत् पालनात्मैव बिन्दुपालनलक्षणस्वलक्षण एव। पालनं च तत् प्रसवामुखीभूतिक्रियोत्पादने शक्तित्वं ततः[5] स तु नाध्यासः संसारवर्तिनामिव ससुखोऽहं सदुःखोऽहं समोहोऽहमिति बन्धहेतुकविषयारोपरूपो[6] न भवति। कुतः? तत्र तदसम्भवात्। अतद्रूपस्य तद्रूपतयाऽसत्यत्वात्। एकमप्यत्र तद्रूपरहितं[7] शिवबलमधिकरणान्तरे सवितृकिरणमिव अनेकव्यापृतिनिर्वर्तनक्षमत्वाद्[8] अनेकव्यवहारं भजतीत्यर्थः।

—•—

(व्याख्या) इदानीं बिन्दुगतव्यापारभेदेन[9] पत्युः व्यपदेशान्तरमाह-

(वृत्तिः) अधिकारव्यपदेशः कदेत्यत आह -

---

१. भोगो ऽ स्तीति] ज२,ज३,ज४;भोगस्थिति- ज१;
२. सदाशिवतत्त्वात्] ज१; सदास्तित्वात्- ज२,ज३,ज४
३. शिवादेतस्य] ज४;शिवादेस्तस्य-ज१,ज२; शिवादेतस्य हि-ज३
४. शक्यत, क१,क२; शक्यः- मु
५. ततः] ज१,ज२,ज४; ज३ कोशे नास्ति।
६. बन्धहेतुकविषयारोपरूपो] ज४;बन्धहेतुकविषयलक्षणारोपरूपो-ज१,ज२,ज३
७. एकमप्यत्र तद्रूपरहितं] ज३;एकमप्यतद्रूपरहितं-ज१,ज२,ज४;
८. अनेकव्यापृतिनिर्वर्तनक्षमत्वाद्] ज१,ज२,ज३;अनेकस्याप्रतिनिवृत्तिनक्षमत्वाद्-ज४
९. इदानीं बिन्दुगतव्यापारभेदेन] मु,क२;बिन्दुगतव्यापारभेदेन- क१;

बिन्दुः प्रवृत्तः कार्ये[१] स्यात् अधिकारस्तदा यदा।
शिवस्य न भिदा पूर्वा विशेषस्य मुनीश्वराः।। २६।।

(व्याख्या) यदा बिन्दुः कार्ये प्रवर्तते तदा ईश्वरः अधिकारः अधिकाराख्यो भवति। पूर्वाऽविशेषस्य पूर्वस्मात् लयभोगसंज्ञाविशिष्टात् अविशेषस्य भेदकधर्मरहितस्य शिवस्य पत्युः शिव-सदाशिवावस्थापन्नान्नभेदः।

(वृत्तिः) हे मुनीश्वराः यदा यस्मिन् काले बिन्दुः प्रवृत्तः कार्ये स्यात् कुण्डलिनी उत्पादितकार्या भवेत् तदा तस्मिन् काले शिवोऽधिकारोऽधिकार इति व्यपदेशं लभते। पूर्वाविशेषबिन्दोः[२] प्रसृतकार्यतयावस्थाभिदा स्वतोऽस्त्यपि[३] पूर्वात् स्वशक्तिलक्षणशिवतत्त्वसादाख्य-तत्त्वस्थिततयोपवर्णितादविशेषे स्वतो भेदकधर्मरहिते[४] सति अस्य शिवस्य स्वशक्तिलक्षणेश्वरतत्त्वस्थिततयोपवर्णनीयस्य स्वतो न भिदा भेदो नास्ति।

—•—

(व्याख्या) तस्यैव व्यपदेशान्तराण्यपि आह–

(वृत्तिः) व्यपदेशान्तरमाह –

ईश्वरश्च स एव स्यात् तत्त्वं तच्चेश्वराह्वयम्।
प्रवृत्तोऽयमिति प्रोक्तः प्रवृत्ताः शक्तयो मताः।। २७।।

(व्याख्या) स एवाधिकारव्यपदेशयुक्त एव ईश्वरः ईश्वराख्यः तदेवेश्वरतत्त्वमित्यपि उच्यते। तस्यैव प्रवृतशक्त्युपाधिकं व्यपदेशान्तरमाह– प्रवृत्तोऽयमिति। यस्मात् कारणात् शक्तयः प्रवृत्ता मताः कार्यजननायेति शेषः तस्मात् अयमपि प्रवृत्त इति प्रोक्तः। अयमेव सकल इत्यपि उच्यते। शक्तिकलायुक्तत्वात् पाशकलायुक्तत्वाच्च।

(वृत्तिः) स एव लब्धाधिकारव्यपदेशवान् ईश्वरश्च स्यात् ईश्वर इति व्यपदेशं लभते। यत्तत्त्वमीश्वराह्वयमीश्वरसंज्ञकम् बिन्दुकार्यप्रवृत्तिहेतुभूतं तदपि तत्तदेव स्वशक्तिकिरणात्मत्वात्। तस्मिन् विस्पष्टचिन्मात्रादिलक्षणतया स्थित इत्यर्थः। अयं लब्धाधिकारेश्वरव्यपदेशवान् प्रवृत्त इति प्रोक्तः प्रवृत्त इति व्यपदेशं च लभते। कुतः? यस्मात् कारणात् शक्तयः प्रवृत्ता मताः कार्यप्रयोगदशां प्राप्ता इतीष्टाः। सकल इत्यपि व्यपदेशं च लभते इत्यध्याहार्यम्। यानि शिवादीनि नामानि तानि पतिशक्तिबिन्द्वभिहिततत्त्वत्रयस्य साधारणानीति मन्तव्यम्।

—•—

(व्याख्या) लयभोगाधिकाराणामित्यादिप्रवृत्ताः शक्तयो मताः इत्यन्तसार्धदशश्लोकानाम्[५]

---

१. प्रवृत्तः कार्ये] ज४;प्रवृत्तकार्ये-ज१,ज२,ज३
२. पूर्वाविशेषबिन्दोः] ज१; पूर्वाविशेषो बिन्दोः- ज२; पूर्वाविशेषे बिन्दोः-ज३,ज४
३. स्वतोऽस्त्यपि-ज४;स्वतोऽसत्यपि-ज१,ज२,ज३
४. भेदकधर्मरहिते] ज१,ज२,ज४; भेदकर्मरहिते-ज३
५. इत्यन्तसार्धदशश्लोकानाम्] क१; इत्येतदन्तानां अर्धाधिकदशसंख्याकश्लोकानाम्-मु;लयभोगाधिकाराणामित्यादीनामपरा व्याख्या-क२

अपरा व्याख्या क्रियते। ननूक्तस्य शिवस्य लयभोगाधिकारिभेदेन अन्तरालिकभेदः प्रतिपाद्यते। तच्च तदेकत्वप्रतिपादकवक्ष्यमाणश्रुत्यनुमानविरुद्धमित्याशङ्क्य उपोद्घातेनाह–

लयभोगाधिकाराणां न भेदो वास्तवः शिवे।। १६।।

शिवे लयभोगाधिकाराणां वक्ष्यमाणान्तरालिकभेदः न वास्तवः उक्तयुक्तेरेव। किन्तु बिन्द्ववस्थादिरूपलयभोगाद्युपाधिकृत[१] इत्यर्थः। ननूपाधिभूतानां लयादीनां भेदस्यापि औपाधिकत्वे उपाध्यनवस्थाप्रसङ्ग इत्याशङ्क्याह–

किन्तु बिन्दोरणूनां च वास्तवा एव ते मताः।

तत्र शिवभेदोपाधिभूता लयभोगाधिकारा द्विविधाः बिन्द्ववस्थाविशेषाः आणवाश्च। तत्रोभयेषामपि भेदो वास्तव एव न तु सोपाधिका[२] इति मताः। अतो नोक्तदोषः। बिन्द्ववस्थाविशेषाणां लयादित्वं शिवभेदप्रयोजकत्वं तद्भेदस्य च वास्तवत्वं च उत्तरत्र आकरे[३] एव स्फुटम्। अणूनां च लयभोगाधिकारित्वं[४] शिवभेदप्रयोजकत्वं तेषां वास्तवभेदत्वं च उच्यते।

तथा हि – विज्ञानकेवलाणुषु ये अधिकारमलरहिताः अणवः ते[५] बिन्द्ववस्थाविशेषरूपलयतत्त्वे दीक्षया नियुज्यन्ते। अतस्तेऽपि लयाः। तेषु ये अधिकारमलयुक्तत्वेऽपि अत्र पक्वमलाः तेन[६] भोगतत्त्वे[७] नियुज्यन्ते तेऽपि भोगाः। तेषु ये मन्दपक्वमलाः[८] तेनोक्ताधिकारतत्त्वे नियुज्यन्ते तेऽपि अधिकारिणः। तत्त्वसंज्ञया तद्वचनम्। तत्पतितन्नित्युक्तानां[९] तद्व्यवहारस्य यथा वक्ष्यमाण-सम्प्रभेदादिवचनं सामान्यतः शास्त्रे सिद्धत्वात्[१०]। रत्नत्रये उक्तांस्त्रिविधानणून् अनुक्रम्य "ततः स तेषामेकोऽपि लय-भोगाधिकारिणाम्" इति तेषां लयभोगाधिकारित्वानुपादानाच्च। तत्राद्या विदारितसर्वमलतया[११] चिदम्भोधिमग्ना मुक्ता एव। इतरे तु निवृत्तावरणमलत्वेऽपि अधिकारमलसत्त्वान्न मुक्ताः। किन्तु उक्तयुक्त्या तत्तुल्या एव। तदिदं वक्ष्यति–

---

१. बिन्द्ववस्थादिरूपलयभोगाद्युपाधिकृतः, मु,क२;बिन्द्ववस्थादिरूपलयादिभोगाद्युपाधिकृतः- क१;
२. भेदो वास्तव एव न तु सोपाधिकः] सम्पादकीयः पाठः; भेदो वास्तव एव न तु सोपाधिकाः- क१,क२,मु
३. आकरे, मु,क२;भाष्ये- क१;
४. लयभोगाधिकारित्वं] क१; लयभोगाधिकारत्वं- मु,क२
५. ते] क१,क२; एते- मु
६. तेन] मु; ते- क१,क२;
७. भोगतत्त्वे] मु,क२;भोगाधिकारतत्त्वे- क१;
८. मन्दपक्वमलाः] मु;मन्दपक्वमलाः ते- क१,क२;
९. तत्पतितन्नियुक्तानां] क२; तत्पतितं नियुक्तानां-क१; सामान्यतः शास्त्रे तत्पतितं नित्युक्तानां- मु
१०. वक्ष्यमाणसम्प्रभेदादिवचनं सामान्यतः शास्त्रे सिद्धत्वात्] क२;वक्ष्यमाणसम्प्रदायसिद्धत्वात् सामान्यतः शास्त्रसिद्धत्वात् - क१; वक्ष्यमाणसम्प्रभेदसम्प्रदायसिद्धत्वात्- मु
११. तत्राद्या विदारितसर्वमलतया] मु;तत्राद्या निवारितः सर्वे मलतया- क१;तत्राद्यो निवारितः सर्वमलतया-क२

योजिता लयतत्त्वे ये ते मुक्ता नापरत्र च।
भोगाधिकारतत्त्वस्था व्यक्तचिन्मात्रशक्तयः[१]।। इति।

ते च यथायथं शिवतत्त्वेषु भुञ्जानाः पञ्चकृत्यानि च कुर्वते। ते च सर्वेऽन्योन्यं वस्तुतो भिन्ना एव। उक्तरीत्या ते च तत्तदवधि[२] पत्यधिष्ठेयतया[३] अधिष्ठातृभेदका इति। इदं च सर्वं रत्नत्रये उक्तम्।

तथा हि विमलोदारगम्भीरे चिन्महोदधौ।
स्वात्मनि प्रविलीयन्ते तेनैके[४] समधिष्ठिताः।
शिवेन निभृतात्मीयशक्तयोऽन्ये विशेरते[५]।
समालिङ्ग्य महामायाम् अपरावृत्तिशालिनीम्।
तत्संस्पर्शसुखैकाग्रबुद्धयो भोगलम्पटाः।
तथा परे परं व्योम समाश्रित्याध्वमूर्धनि।
पञ्चकृत्यानि कुर्वन्ति पत्युराज्ञानुवर्तिनः।
ततः स तेषामेकोऽपि लयभोगाधिकारिणाम्।
अधिष्ठातृतया भेदमौपचारिकमृच्छति। इति।

अत्रैते उक्तलयतत्त्वे नियोजिताः। तेन लयतत्त्वस्थितेन समधिष्ठिताः। एवमुत्तरत्रापि तत्तत्त्वाधिपतिना समधिष्ठिता इत्यर्थो बोध्यः। अन्येऽपि पक्वमलात्[६] विज्ञानकलाः[७] महामायाम् उक्तभोगावस्थास्वरूपां समालिङ्ग्य तत्र नियोजिताः। अपरे मन्दपक्वमलाः परं व्योम उक्ताधिकारतत्त्वाख्यं समाश्रित्य तत्र नियोजिताः[८]। ते च उभयेऽपि भोगाधिकारयोः शक्तिरित्यादिवचनानुसारेण[९] यथायोग्यं भोगिनः शिवादितत्त्वेषु पञ्चकृत्यकारिणश्च। तदाह- तत्संस्पर्शेति अध्वमूर्धनीत्यादि च। अत्र आभ्यां वचनाभ्याम् आत्मनि प्रविलीयन्ते इत्यनेन च तेषां लयभोगाधिकारित्वे निमित्तान्तरमप्युक्तं वेदितव्यम्[१०]। लयभोगाधिकारभेदं स्वाभाविकमणूनाम्

---

१. व्यक्तचिन्मात्रशक्तयः] क१; व्यस्तचिन्मात्रशक्तयः-मु,क२
२. तत्तदवधि] क१; तत्तदधिपैरेव- मु;तत्तदधिपति-क२
३. पत्यधिष्ठेयतया] क१; अधिष्ठेयतया- मु;वाधिष्ठेयतया-क२
४. तेनैके] मु;तेनैते- क१,क२
५. अन्ये विशेरते] क१,क२; अन्येपि शेरते-मु
६. पक्वमलात्] क१,मु; अतिपक्वमलाः-क२
७. विज्ञानकलाः] क१,क२; विज्ञानाकलाः- मु
८. नियोजिताः। अपरे मन्दपक्वमलाः परं व्योम उक्ताधिकारतत्त्वाख्यं समाश्रित्य तत्र नियोजिताः] मु,क२;नियोजिताः- क१
९. शक्तिरित्यादिवचनानुसारेण] क१; शक्तिरित्यादिवचनानुसरणेन- मु,क२
१०. तेषां लयभोगाधिकारित्वे निमित्तान्तरमप्युक्तं वेदितव्यम्।, मु,क२;तेषां- क१

उक्त्वा तत्प्रयुक्तं शिवभेदमाह- अत इति। एकस्यैव शिवस्य वक्ष्यमाणम् उपाधिभेदेनापि स्वरूपसंज्ञयोः भेदमाशङ्क्य दृष्टान्तेन उपपादयति-यथार्क इति[१]।

—•—

(व्याख्या) एवमुपोद्घातेन विरोधं परिहृत्य षण्णां पदार्थानाम् उद्देशलक्षणयोः कृतत्वात् क्रमप्राप्तां प्रतिज्ञाताम् परीक्षामारभते। तत्र प्रथमं पतिभेदलक्षणं परीक्षयिष्यन् तत्रापि लयभोगाधिकाराख्येत्युक्तेषु[२] प्रथमं लयस्वरूपं तत्प्रयुक्तं च पतिभेदं तत्प्रयुक्तं च संज्ञाभेदं च[३] दर्शयति-

उपसंहृतकार्यात्मा यदा बिन्दुर्व्यवस्थितः॥१८॥
तदा लयाह्वयं तत्त्वं शिवतत्त्वं तदेव हि।
विद्यातत्त्ववन्नेदं सन्नतत्वादिलक्षणम्॥१९॥

(व्याख्या) यदा उपसंहृतः कार्यात्मा[४] यस्य स[५] तथोक्तः। तदा लयाह्वयं तत्त्वं भवतीति। अत्र बिन्दोरेव लयत्वं श्रुत्या विधीयते। तत्र सन्निहितत्वात् तत्त्वशब्दाच्च संग्रहे उपाधिभूतलयादेरेव सामान्यतः उक्तत्वेन तस्यैव विशिष्याकाङ्क्षितत्वाच्च। तदुपाधिकस्य च शिवस्य लय इत्येव संज्ञा पूर्वोक्तपरिभाषया भवति। एवं चोत्तरत्रापि भोगाधिकारत्वमपि उपाधिभूतयोः बिन्द्वस्थयोरेवेति ज्ञेयम्।

ननु योजिता लयतत्त्वे ये ते मुक्ता इत्यादिवचनैः लय इत्यादिवचनैः लयतत्त्ववत् शिवतत्त्वमपि स्वस्मिन् योजितानां मुक्तिप्रदमागमान्तरे श्रुतमस्ति। न चात्र प्रमाणाभावः। उत्तरत्र सत्यमित्यादिना शिवतत्त्वादिद्वैविध्यमङ्गीकृत्य तानि प्राप्यानीत्यादिना तयोः शोध्याशोध्यवचनस्यैव तत्र प्रमाणत्वात्[६]। तथा च तादृशं शिवतत्त्वं प्रसिद्धम्। भुवनाधारशिवतत्त्वमेव फलानुरोधं[७] लयतत्त्वमेवेति विशये आह- शिवतत्त्वं तदेव न तु भुवनाधारं शिवतत्त्वं फलविरोधादिति भावः। अनेन तत्त्वं तदेव सादाख्यमिति तत्त्वं तच्चेश्वराह्वयमित्येतद्द्वयमपि[८] व्याख्यातं वेदितव्यम्। इदं च लयादितत्त्वानां शिवतत्त्वाद्यभिधानं[९] शास्त्रे अवश्यकर्तव्यविरोधपरिहाराय। बिन्दुक्षये वा[१०] याथार्थ्यमस्य

---

१. इति] क१,क२; यथार्कः पङ्कजं नित्यं बोधसंशोषणादिभिः। कर्मभिर्बोधकाख्यां लभतेऽत्र तथा शिवः। इत्ययं मूलश्लोकः मु कोशे दत्तः।तदनन्तरं यथार्क-इति उक्तार्थमेतत् इति व्याख्याभागोऽपि तत्र दृश्यते।
२. लयभोगाधिकाराख्येत्युक्तेषु] मु,क२;लयभोगाधिकाराख्यैः उद्युक्तेषु- क१;
३. संज्ञाभेदं च] मु;संज्ञाभेदं- क१,क२;
४. उपसंहृतः कार्यात्मा] क१,क२; उपसंहृतकार्यः आत्मा-मु
५. यस्य सः] मु;यस्यासौ- क१; यस्य-क२
६. प्रमाणत्वात्] मु,क२;प्रमाणात्- क१;
७. फलानुरोधं] मु;फलानुरोधात्- क१,क२;
८. तदेव न तु भुवनाधारं शिवतत्त्वं फलविरोधादिति भावः। अनेन तत्त्वं तदेव सादाख्यमिति तत्त्वं तच्चेश्वराह्वयमित्येतद्द्वयमपि] मु,क२; तच्चेश्वराह्वयमित्येव द्वयमपि - क१
९. शिवतत्त्वाद्यभिधानं] क१,क२; शिवाद्यभिधानं- मु
१०. वा] क१,क२; च- मु

भुवनाधारशिवतत्त्वाद्यपेक्षया वैशिष्ट्यमाह–विद्यादीति। विद्या शुद्धविद्या आदिशब्देन ईश्वरतत्त्वादीनां ग्रहणम्। सन्नतत्वमधोभावादि। अत इदं तत्त्वं स्वत एवोत्कृष्टमिति भावः। किञ्च उपसंहृतकार्यावस्था अत एवोत्कृष्टा शिवशक्तिरपि लयतत्त्वमेव। एवं बिन्दोः वक्ष्यमाणावस्थाद्वयविशिष्टा या भोगाधिकारतत्त्वमपि सापि शिवभेदप्रयोजिका। तदुक्तं प्रकरणे–

शक्तयो हि इदं कर्तव्यमिति स्वात्मनि अवहिता[१] लयत्वाभिधानावस्थाविशेषम्[२] उद्दीपयन्त्यो निष्कलादिपदप्रवृतौ[३] उपाधिभावं प्रतिपद्यन्ते। यदा कृतिकार्यसम्प्रवृत्ताः[४] न च तत्प्रयोगभूमिं प्राप्ताः तदा पालनप्रवृत्तत्वाद् भोगत्वाभिधानावस्थाविशेषम्[५] आदर्शयन्त्यः सकलनिष्कलादि-पदप्रवृत्तौ कारणत्वमुपयान्ति। यदा ताः कार्यप्रयोगदशामनुप्राप्ताः तदाधिकारत्वाभिधान-मवस्थान्तरम्[६] अवभासयन्त्यः सकलादिपदप्रवृत्तौ[७] हेतुतां व्रजन्तीति तथा स्वयमपीमां सिद्धवत्कृत्य वक्ष्यति–लयादिकोऽप्ययं भेदः शक्तितस्त्विति। शक्तोऽयं शक्तयो यस्माद् उद्योगादिक्रियाच्युताः इति च। लयावस्थां यदा प्राप्नोति तदा[८] लाघवात् तत्तद्विशिष्टोक्तबिन्दोः लयतत्त्वत्वम्[९]। एवं च शास्त्रप्रसिद्धाः शक्त्यवस्थाविशेषकृताः शक्त उद्युक्तः प्रवृत्त इति पदभेदा अपि लयादिभेदा एवेति।

—•—

किन्तु स्वदृक्क्रियाशक्तिकिरणात्मकमव्ययम्।
व्यापकं नित्यमचलं सर्वतोमुखमैश्वरम्।। २०।।

(व्याख्या) किन्तु[१०] स्वस्य या दृक्क्रियाशक्तिः क्रियांशरहिता तस्याः किरणात्मक-मतिविरलत्वात् स्वच्छत्वाच्च। तत्किरणव्याप्तम्[११] अव्ययं व्ययोऽपक्षयः[१२] तद्रहितम्। व्यापकं चिच्छक्तेः व्यापकधर्मत्वात् नित्यं नाशरहितम्। अचलं महार्थसंहारकालेऽपि चलरहितं सर्वतोमुखम् अप्रतिबन्धात् सर्वत्र प्रसारितकिरणदृक्शक्तियुतम् ऐश्वरमीश्वरसम्बन्धि। एवं लयतत्त्वं निरूप्य तदुपाधिकं शिवभेदं तत्प्रयुक्तं च संज्ञाभेदं दर्शयति–

तस्मिन् विस्पष्टचिन्मात्रो व्यापकत्वादिधर्मवान्।
अनन्योऽन्यश्च तच्छक्तेः समवायात् स्थितः शिवः।। २१।।

१. अवहिता] मु,क२;अव्यवहिता- क१;
२. लयत्वाभिधानावस्थाविशेषम्] मु,क२;लयतत्त्वाभिधानावस्थाविशेषम्- क१
३. निष्कलादिपदप्रवृतौ] क१,क२; निष्कलपदप्रवृत्तम्-मु
४. कृतिकार्यसम्प्रवृत्ताः] मु;कृताः कार्यसम्प्रवृता- क१,क२;
५. भोगत्वाभिधानावस्थाविशेषम्] क१; भोगत्वाभिधानमवस्थाविशेषम्- मु,क२
६. तदाधिकारत्वाभिधानमवस्थान्तरम्] मु,क२;तदाधिकारत्वाभिधानान्तरम्- क१;
७. सकलादिपदप्रवृत्तौ] क१,क२; सकलादिप्रवृत्तौ- मु
८. तदा] मु;च तथा च- क१,क२;
९. तद्विशिष्टोक्तबिन्दोः लयतत्त्वत्वम्] मु;तत्तद्विशिष्टस्य उक्तबिन्दोः लयत्त्वम्- क१,क२;
१०. किन्तु] क१,क२; किंच- मु
११. तत्किरणव्याप्तम्] मु;तत् किरणं व्याप्तमपि- क१; तत्किरणं व्याप्तम्-क२
१२. अव्ययं व्ययो ऽपक्षय] मु;अव्ययोऽक्षयः- क१; अव्ययोऽपक्षयः-क२

तस्मिन् लयतत्त्वे विस्पष्टचिन्मात्रः विशेषेण स्पष्टं चिन्मात्रं क्रियांशरहितं चिद्रूपं यस्य स तथोक्तः[१] व्यापकत्वनित्यत्वादिधर्मवान् स्थित इत्यर्थः। तत्र शक्त्यंशावस्थाने सम्बन्धमाह–समवायादिति। समवायं किं नैयायिकादिवदत्यन्तभिन्नयोरेव, नेत्याह। अनन्योऽन्यश्च तच्छक्तेरिति। न चैवं भेदाभेदविरोधः। तस्य प्रमाणसिद्धत्वेन संयोगतदत्यन्ताभाववद् अविरोधात्। तदुक्तं–सम्बन्धः शक्तिमच्छक्त्योः[२] तादात्म्यं स्यादिति। अथवा अनन्योऽन्यशब्देन व्याप्तिः विवक्षिता। तदप्युक्तम् शिवज्ञानबोधेव्याप्तितोऽनन्य इति। अस्य च लयसंज्ञा पूर्वोक्तपरिभाषासिद्धा।

—•—

यदर्थं शक्तेरपि लयादौ प्रवेशः उक्तः तदाह–

शक्तोऽयं शक्तयो यस्मात् उद्योगादिक्रियाच्युताः।
शिव एवावतिष्ठन्ते निष्कलश्च स एव तु।। २२।।

(व्याख्या) शक्तोऽयं यः शक्त्युपाधिकः शास्त्रे शक्तत्वेन प्रसिद्धः सोऽपि अयमेव लय एव। न तु ततोऽन्यः। ननु शक्तियोगित्वं शक्तत्वं तच्च उद्युक्तप्रवृत्तयोः वक्ष्यमाणयोरपि अस्तीति अतिप्रसङ्ग इत्याशङ्क्य शक्तिशब्देन क्रियांशरहिता उदासीना शक्तिर्विवक्षिता। अतो नोक्तदोष इत्याह– शक्तयो यस्मादिति। यस्मात् उद्योगादिक्रियाच्युताः शक्तयः उक्तलयाधिपतिशिव[३] एवावतिष्ठन्ते न वक्ष्यमाणयोः शिवयोः तयोः यथाक्रमम् उद्योगावस्थानां[४] प्रवृत्त्यवस्थानां वा तासां[५] वर्तनादिति। तस्मात् उक्तदोषाभावेन अयमेव शक्तो नान्यो विशेषत इत्यर्थः। ननु शिवतत्त्वपतिर्निष्कलो विशिष्टः श्रूयते। सोऽपि किमस्मादन्यः? नेत्याह–निष्कलश्चेति। शिवतत्त्वाधिपतित्वेन श्रूयमाणो विशिष्टो निष्कलोऽपि तु[६] स एव लयतत्त्वाधिपतिः शक्त एव। न तु ततोऽन्यः लयतत्त्वे एतादृशशिव-तत्त्वतत्पत्योरपि[७] ऐक्यस्य युक्तत्वादिति भावः। अस्य निष्कलत्वोक्त्या उक्तशक्तयोरपि[८] यथाक्रमं सकलाकलत्वं सकलत्वं च बोध्यम् एतेषां निष्कलत्वादिकं च। तथा हि–विमलोदारेत्यादिना पूर्वोक्तशक्त्यवस्थाचिच्छक्तिरूप-कलावस्थाविशेषकृतं बोध्यम्। क्रमप्राप्तं भोगतत्त्वस्वरूपं तदुपाधिकपतिभेदं चाह–

उद्युक्तस्तु यदा कार्ये बिन्दुर्भोगाह्वयं तदा।
लभते शिव उद्युक्तः स एव च सदाशिवः।। २३।।
तत्त्वं तदेव सादाख्यं न शिवाद्वस्तुतो भिदा।

१. तथोक्तः] मु;तथा- क१,क२
२. शक्तिमच्छक्त्योः] मु,क२;शक्तिमतःछक्त्योः- क१;
३. उक्तलयाधिपतिशिव] मु,क२;उक्तलयपरशिव- क१;
४. उद्योगावस्थानां] क१,क२; उद्योगावस्थानं-मु
५. प्रवृत्त्यवस्थानां वा तासां] क१; प्रवृत्त्यवस्थानमेव-मु; प्रवृत्त्यवस्थानामेव तासां-क२
६. निष्कलोऽपि तु] मु,क२;निष्कलोऽपीति- क१;
७. लयतत्त्वे एतादृशशिवतत्त्वतत्पत्योरपि] मु;लयतत्त्वस्यैव तादृशशिवतत्त्वरूपत्वे तत्पत्योरपि- क१; लयतत्त्वस्यैव तादृशशिवतत्त्वे तत्पत्योरपि-क२
८. शक्तयो वा उद्युक्तव्यक्तयो- क१; उक्तशक्तयोरपि-मु;उक्तयोरपि-क२

(**व्याख्या**) बिन्दुर्यदा उद्युक्तः क्षुब्धावस्थः। अत्र बिन्दुग्रहणं पूर्वोक्तयुक्त्या शक्तेरप्युपलक्षणम्। तथा च उद्युक्ता शक्तिश्च यदेत्यर्थः तदा भोगाह्वयं लभते पूर्वोक्तयुक्त्या शक्तिविशिष्टो बिन्दुः। अत्रापि विद्यादितत्त्ववदित्यारभ्य[१] समवायात् स्थितः शिव इत्यन्तमनुषज्यते। तथा च तद्व्याख्यानं च[२] पूर्ववदेव। तस्य[३] च अधिकारसंज्ञा पूर्वोक्तन्यायलभ्या। शिवः शिव उद्युक्तः[४]। उद्युक्तोऽपि शक्त्युपाधिकः शास्त्रे[५] प्रसिद्धः शिव एव[६] भोगाधिपतिः[७] शिव एव न ततोऽन्यः भोगतत्त्वकोटि-प्रविष्टस्तदुपाधिभूतोद्युक्तः शक्तिसमवायात्[८]। तत्त्वं तदेव सादाख्यम् इत्येतत् शिवतत्त्वं तदेव तत्[९] इत्यनेन व्याकृतम्[१०]। अस्य चायमर्थः–शास्त्रे प्राप्यत्वेन श्रूयमाणं सादाख्यं तत्त्वमपि तदेव भोगतत्त्वमेव। न तु भुवनाधारं[११] प्रसिद्धं तत्त्वान्तरम्। एकफलत्वात् विरुद्धफलत्वाच्च[१२]। एवं च तत्पतित्वेन श्रूयमाण उत्कृष्टोऽपि सदाशिवः स एव उक्तबिन्द्ववस्थाविशेषो भोगतत्त्वोपाधिक एव भोगतत्त्वसदाशिवतत्त्वयोरैक्ये तदुपाधिकयोरपि ऐक्यस्यैव[१३] युक्तत्वादिति भावः। न शिवाद्वस्तुतो भिदा तस्य भोगोपाधिकशिवस्य पूर्वोक्तलयोपाधिकशिवात् वास्तवभेदो नास्ति किन्तु औपाधिक एव भेदः। अत्र हेतुः पूर्वमेवोक्तः।

—•—

ननु तत्त्वस्य भोगत्वम् उक्त्वा तदुपाधिकस्तत्कर्ता[१४] पतिरित्युक्ते तस्य भोक्तृत्वं प्रतीयते। तत्र भोगो नाम कः भुज पालनाभ्यवहारयोरिति व्याकरणानुसारेण भोगस्यार्थद्वयसत्त्वात् इत्याकाङ्क्षायामाह–

भोगस्तत्पालनात्मैव नाध्यासस्तदसम्भवात्।। २४।।

(**व्याख्या**) उक्तविधया प्रतीयमानो भोगः तत्पालनात्मैव। यथा भुनक्ति राज्यमिति विषयान् भुङ्क्ते इत्यादौ अपरस्मिन् विषये परत्राध्यासरूपो[१५] यो भोगः तादृशोऽत्र न विवक्षित इत्याह–

---

१. विद्यादितत्त्ववदित्यारभ्य] क१,क२; विद्यादितत्त्वमित्यारभ्य- मु
२. च] मु,क२;तु- क१;
३. तस्य] क१,क२; तस्याः-मु
४. शिवः उद्युक्तः] क१,क२; उद्युक्तः- मु
५. शक्त्युपाधिकः शास्त्रे] क१,क२; शक्त्युपाधितस्तत्र- मु
६. शिव एव] क१,क२; शिवः-मु
७. भोगाधिपतिः] क१; भोगाधिपतिः शिवः-मु,क२
८. भोगतत्त्वकोटिप्रविष्टस्तदुपाधिभूतोद्युक्तः शक्तिसमवायात्] क१,क२; भोगतत्त्वकोटिप्रविष्ट-तदुपाधिगतोद्युक्तशक्तिविशिष्टशिवतत्त्वम्-मु
९. तदेव तत्] मु;तदेतत्- क१,क२;
१०. व्याकृतम्] मु,क२;व्याख्यातम्- क१;
११. भुवनाधारं] मु,क२;भुवनाधिकारं- क१;
१२. विरुद्धफलत्वाच्च] क१,क२; अविरुद्धफलत्वाच्च-मु
१३. ऐक्यस्यैव] क१,क२; ऐक्यस्य- मु
१४. तदुपाधिकस्तत्कर्ता] मु,क२;तदुपाधिकशिवाद्वास्तत्कर्ता- क१;
१५. परत्राध्यासरूपो] क१,क२; पराध्यासरूपो- मु

नाध्यास इति। उक्ताध्यासरूपो भोगो न विवक्षितः। विशेषदर्शनवतः शिवस्य अध्यासासम्भवात्[१]। क्रमप्राप्तमधिकारतत्त्वस्वरूपं तदुपाधिकपतिभेदं च दर्शयति–

बिन्दुः प्रवृत्तः कार्ये स्यादधिकारस्तदा यदा।
प्रवृत्तोऽयमिति प्रोक्तः प्रवृत्ताः शक्तयो मताः।। २५।।

शिवस्य न भिदा पूर्वा विशेषस्य मुनीश्वराः।
ईश्वरश्च स एव स्यात् तत्त्वं तच्चेश्वराभिधम्[२]।। २६।।

(व्याख्या) अत्रापि बिन्दुग्रहणं शक्तेरपि उपलक्षणम्। एतदभिसन्धाय वक्ष्यति – प्रवृत्ताः शक्तय इति। तथा च बिन्दुः यदा प्रवृत्तः शक्तियुक्तः[३] स्वकार्ये प्रवृत्तः स्यात् तदा अधिकारसंज्ञो[४] भवति। अत्रापि विद्यादितत्त्ववदित्यारभ्य स्थितः शिव इत्यनुषञ्जनीयम्। अत एव वक्ष्यति पूर्वाविशेषस्येति। यस्तु शास्त्रे प्रवृत्त इति प्रोक्तः शक्त्युपाधिकः शिवः सोऽपि अयमेव उक्ताधिकारतत्त्वोपाधिक एव न ततोऽन्यः। अत्र हेतुः प्रवृत्ताः शक्तयः याः तस्य प्रवृत्तस्य उपाधिभूताः ताः अस्मिन्नेव अधिकारतत्त्वोपाधिके उक्तविधया मताः सम्मता इति यतः अत इत्यर्थः। शिवस्य न भिदेत्येतत् व्याख्यातप्रायम्। ननु[५] ईश्वरतत्त्वमपि अधिकारतत्त्वतुल्यं प्राप्यं श्रूयते पूर्वोक्तागमे तदपि[६] किं प्रसिद्धभुवनाधारमीश्वरतत्त्वमिति विशये आह– तत्त्वं तच्चेश्वराभिधमिति[७]। आगमान्तरे प्राप्यत्वेन श्रूयमाणमीश्वराभिधं तत्त्वमपि तदेव उक्ताधिकारतत्त्वमेव न प्रसिद्धं[८] भुवनाधारं तत्त्वं पूर्वोक्तयुक्तेरिति भावः। एवं च तत्पतित्वेन श्रूयमाणो विशिष्टो य ईश्वरोऽपि[९] स एव स्यात् अधिकारतत्त्वोपाधिक[१०] एव स्यात्। तत्त्वयोरैक्ये तदुपाधिकयोरप्यैक्यस्यैव युक्तत्वादिति भावः। तदवस्थाविशेषप्रयुक्तत्वप्रतिपादनेन[११] तटस्थलक्षणस्य सुस्थत्वेऽपि बिन्दोरचेतनत्वेन स्वतः प्रवृत्त्यादिव्यापारासम्भवेन ईश्वरकर्तृक एव प्रवृत्त्यादिव्यापारभेदः स्वीकर्तव्यः।

—•—

---

१. अध्यासासम्भवात्] क१; अध्यासाभावात्- मु;अध्याससम्भवात्-क२
२. मु कोशे श्लोकार्धक्रमे कश्चन व्यत्यासो दृश्यते।
३. प्रवृत्तः शक्तियुक्तः] क१; प्रवृत्तशक्तियुक्तः- मु,क२
४. अधिकारसंज्ञो] क१,क२; अधिकारिसंज्ञो- मु
५. ननु] क२;न तु-क१,मु;
६. पूर्वोक्तागमे तदपि] क२;पूर्वोक्तमेतदपि-क१,मु;
७. तत्त्वं तच्चेश्वराभिधमिति] क१; तच्चेश्वराभिधमिति-मु
८. न प्रसिद्धं] क१; नाप्रसिद्धं- मु,क२
९. श्रूयमाणो विशिष्टो यः, मु;श्रूयमाणविशिष्टः ईश्वरोऽपि- क१; श्रूयमाणे विशिष्ट ईश्वरोऽपि-क२
१०. स एव स्यात् अधिकारतत्त्वोपाधिकः] क१,क२; अधिकारतत्त्वोपाधिकः- मु
११. तदवस्थाविशेषप्रयुक्तत्वप्रतिपादनेन] क२;तदवस्थाविशेषप्रयुक्तत्वप्रतिपादने- क१; ननूक्तया रीत्या शिवगतलयभोगाधिकारव्यपदेशानां बिन्दुगतावस्थाविशेषप्रयुक्तत्वपतिपादनेन- मु;

(व्याख्या) तस्य च कर्तृत्वजनकदशाव्यावृत्ततात्कालिकव्यापारवत्त्वप्रयुक्तम्[१] इति तस्य विकारित्वं स्यात्। तथा च स्वाभावादच्युत इति पूर्वोक्तं स्वरूपलक्षणमसम्भवीत्यभिसन्धाय शङ्कन्ते।

(वृत्तिः) ऋषयः स्वभावादच्युतः शक्तः इत्यादिभिस्सूचितविकृतित्वं नोपलभ्य कृत्यकरणं विस्पष्टं ज्ञातुमाशङ्कयन्ति–

ऋषय ऊचुः–

बिन्द्वस्थाविशेषेण शिवभेदस्त्वयोदितः।
बिन्दोरचेतनत्वेन प्रवृत्तिः स्वत एव न।। २७।।
कर्ता चेत् तत्प्रवृत्त्यर्थं विकारी स्यात्तदा शिवः।
एवं विरोध आपन्ने परिहारं वदेश्वर।। २८।।

(व्याख्या) शिवभेदः शिवसदाशिवेश्वरव्यपदेशभेदः। बिन्द्वस्थाविशेषेण बिन्दुगतलय-भोगाधिकाराख्येन व्यापारेणैवेति त्वयोदितः प्रतिपादितः। एवमपि बिन्दोरचेतनत्वेन जडत्वेन स्वतः प्रवृत्तिर्न सम्भवति। यद्वक्ष्यति– अचेतनं जगद्विप्राश्चेतनप्रेरणं विना इत्यादि। अतः तत्प्रवृत्त्यर्थं तस्य बिन्दोः प्रवृत्त्यादिव्यापारसिद्ध्यर्थं शिवः कर्ता चेत् तदा विकारी स्यात्। व्यापारवत एव कर्तृत्वदर्शनादिति भावः। एवं विरोधे कर्तृत्वाविकारित्वयोरिति[२] शेषः आपन्ने प्राप्ते अजनकदशा-व्यावृत्ततात्त्विकव्यापारवतः[३] कर्तृत्वाङ्गीकारेऽपि शिवस्य न विकारित्वमित्यभिप्रायेण परिहरति–

(वृत्तिः) हे ईश्वर बिन्द्वस्थाविशेषेण बिन्दोरवस्था उपसंहृतकार्यात्मत्वादि तस्या विशेषो भेदस्तेन शिवभेदः पतिभेदः शिवः सदाशिव ईश्वर इत्युक्तः त्वयोदितः व्यावर्तक-धर्मस्याधिकरणान्तरस्थत्वान्न वास्तव इति भावः। बिन्दोरुपसंहृतकार्यलक्षणाद्यवस्थां लब्धुं स्वतः चेतनानधिष्ठानात् न प्रवृत्तिः न भवत्येवोत्साहः कुतः अचेतनत्वेन जडधर्मित्वात्। उपसंहृतस्वकार्य-घटादिलक्षणाद्यवस्थां लब्धुं जलवाहकाद्यनधिष्ठित मृद इव। अथ तत्प्रवृत्त्यर्थं तदुत्साहार्थं क्रियावेशी प्रवृत्तः कर्ता चेत् पतिर्यदि तदा तदानीं स तु शिवो विकारी स्यात् स्वरूपान्तरपरिणतिमान् भवेत्। एवमित्थं विरोधे आपन्ने अचेतनत्वस्वतःप्रवृत्तत्वयोरविकारित्वप्रवृत्तत्वयोः[४] सामानाधिकरण्याभावे समुद्भूते परिहारं समाधानं वद कुरु।

कर्तृत्वं द्विविधं विप्राः सङ्कल्पात् करणादपि।
न हि सङ्कल्पमात्रेण कुलालैः क्रियते घटः।। २९।।

(व्याख्या) सङ्कल्पात् अनुसन्धानमात्रात् करणात् करचरणादिव्यापारात् अपिशब्दादिच्छा-

---

१. कर्तृत्वमजनकदशाव्यावृत्ततात्कालिकव्यापारवत्त्वप्रयुक्तम्] मु; कर्तृत्वजनकदशाव्यावृत्ततात्त्विक-व्यापारवत्त्वप्रयुक्तम्– क१; कर्तृत्वजनकदशाव्यावृत्ततात्कव्यापार--वत्त्वप्रयुक्तम्– क२

२. कर्तृत्वाविकारित्वयोरिति] क२;कर्तृत्वाविकारित्वयोरिति कर्तृत्वविकारित्वयोरिति– क१; पदद्वयं मु कोशे न दृश्यते।

३. अजनकदशाव्यावृत्ततात्त्विकव्यापारवतः] क१,क२; अजनकदशाव्यावृत्ततात्कालिकव्यापारवतः– मु

४. अचेतनत्वस्वतःप्रवृत्तत्वयोरविकारित्वप्रवृत्तत्वयोः] ज१,ज२,ज४; अचेतनत्वस्वतःप्रवृत्तयोः–ज३

शक्तेरपि सर्वत्र सङ्कल्पमात्रादेव कर्तृत्वमिति कर्तृत्वद्वैविध्यमनुपपन्नमित्यत आह – न हीति। हि यस्मात् कारणात् कुलालैः सङ्कल्पमात्रेण घटो न क्रियते अतः कर्तृत्वद्वैविध्यमुपपन्नम्। अन्वयव्यतिरेकाभ्यां कुलालादिशरीरव्यापारस्य[1] अपेक्षितत्वादिति भावः।

(वृत्तिः) हे विप्राः कर्तृत्वं कार्यकरणसामर्थ्यं द्विविधं द्विप्रकारं भवतीति शेषः। कुतः संकल्पादिदमेवं भूतं भवत्विति स्मृत्यैकं करणाद्विकृतिहेतुभूतहस्तचलनादिव्यापृत्यैकम्। ननु उभयोरपि संकल्पस्यावश्यकत्वात् तमेव केवलमवलम्ब्य कर्तृत्वमेकरूपं भवत्वित्यत आह– नहीत्यादि। नहि हस्तचलनादिव्यापृतिरूपकरणं विहाय संकल्पमात्रेण केवलमिदमेवं भूतं भवत्विति स्मृत्या कुलालैर्मृदं संक्षोभ्य घटः क्रियते।

—•—

(व्याख्या) नन्वेवमपि कर्तृत्वद्वैविध्यमनुपपन्नम् उक्तान्वयव्यतिरेकाभ्यां सर्वत्र शरीरव्यापारस्यापि अवश्यकत्वात् इत्यत आह – शिव इति।

(वृत्तिः) ननु तर्हि शिवोऽपि तथेति किमनया भिन्नकल्पनयेत्यत आह –

शिवः सङ्कल्पमात्रेण बिन्दुक्षोभकरो यतः[2]।
न व्यापारविशेषेण येनायं विकृतो भवेत्।। ३०।।

(व्याख्या) शिवः सङ्कल्पमात्रेण न तु शरीरगतस्पन्दादिव्यापारविशेषेणापि येन व्यापारविशेषेण[3] विकृतो भवेत्[4] तेन शरीरव्यापारेण नेत्यर्थः। ननु सङ्कल्पस्यापि अजनकदशाव्यावृत्ततात्त्विकव्यापारत्वस्य[5] अवश्यवक्तव्यतया पुनरपि विकारित्वं तदवस्थमेवेति चेत् न। कार्यजननानुकूलयावत्कारणसहितस्यैव अनुसन्धानस्य सङ्कल्पशब्दवाच्यताप्रयोजकत्वेन तादृशसङ्कल्पस्य आश्रयविकारानापादकत्वात्।

(वृत्तिः) स शिवः सदा प्रतिसृष्ट्यारम्भकालम् अचिद्व्यापारहेतुत्वाद् व्यापारशब्दशब्दितेन स्वाभिन्नकरणशक्तिसंकल्पमात्रेण बिन्दुक्षोभकरः। बिन्दुं संक्षोभ्य शान्त्यतीतादिभुवननिर्माणं करोतीत्यर्थः। न व्यापारविशेषेण न हि केवलं भिन्नकरणव्यापृत्यन्तरेण विकरणेन येन विकरणेनायं शिवो विकृतो भवेत् रूपान्तरपरिणतिमान् भवेत्।

—•—

(वृत्तिः) ननु शिवस्तु व्यापृतिम् अनपेक्ष्य[6] न विकृतिमान् भवति। कुलालस्तु ताम् अपेक्ष्य[7] विकृतिमान् भवतीत्युक्तं किमपराद्धं तेनेत्यत आह–

---

१. कुलालादिशरीरव्यापारस्य] मु;कुलालादिशरीरादिव्यापारस्य- क१; कुलालादिशरीरादिव्यापारस्यापि- क२
२. यतः] क१; सदा-मु,क२
३. व्यापारविशेषेण] क१,क२; व्यापारविशेषेणायं- मु.
४. भवेत्] मु;भवति- क१,क२
५. अजनकदशाव्यावृत्ततात्त्विकव्यापारत्वस्य] क१; अजनकदशाव्यावृत्ततात्कालिकव्यापारत्वस्य- मु; अजनकदशाव्यावृत्ततादात्विकव्यापारत्वस्य- क२
६. अनपेक्ष्य] ज२,ज३,ज४;अनवेक्ष्य- ज१;
७. अपेक्ष्य] ज२,ज३,ज४;अवेक्ष्य- ज१;

समस्तोपाधिशून्यत्वात् निर्मलत्वाच्च हे द्विजाः।
य एवोपाधिमन्तस्ते विकृताः कार्यजन्मनि।। ३१।।
ततश्च नाविकारित्वं कर्तृत्वेन विरुध्यते।

(व्याख्या) विकारहेतुभूतव्यापारानाश्रयत्वे हेतुमाह- समस्तेति। समस्तैः देहेन्द्रियादिभिः। तत्र हेतुमाहनिर्मलत्वादिति। मलादिसम्बन्धशून्यत्वादित्यर्थः। मलसम्बन्धवत एवाभिव्यक्ताद्यर्थं कलादिसम्बन्धस्य अपेक्षितत्वादिति भावः।उक्तहेतावप्रयोजकत्वशङ्कां निरस्यति - य एवेति। यतः कर्तुः विकारित्वे[१] उपाधिमत्वमेव प्रयोजकम्। कुलालादीनामपि स्वतो[२] विकाराभावेन उपाधिकृतविकारास्यैव वक्तव्यत्वात् अतो नाप्रयोजकत्वमित्यर्थः। उपसंहरति - ततश्चेति। कर्तृत्वेन[३] कर्तृत्वसामान्येन किन्तु कर्तृत्वविशेषेण विरुध्यत इत्यर्थः।

(वृत्तिः) हे द्विजाः न पक्षपाततोऽस्माभिरुच्यते। किन्तु शिवस्य समस्तोपाधिशून्यत्वात् उप समीपववर्तिन्यात्मनि स्वधर्मम् आदधति आसञ्जयन्तीत्युपाधयः शरीरेन्द्रियादयः। समस्तैस्तैः शून्यत्वात् भोग्यभोक्तृत्वसम्बन्धाभावात्। ननु तदुपहितकेवलात्मनां[४] सङ्कल्पादेरसम्भवात् तथेति कुतः शिवस्य बिन्दुक्षोभकरत्वमित्याशङ्कायाम् इदं निर्मलत्वाच्चेति। न केवलं तेषामिव तदुपहितत्वमात्रं[५] मलेनातिरस्कृतशक्तित्वादपि न सापेक्षत्वविकारित्वादिकम्।

ननु यत्र कर्तृत्वं तत्र विकारित्वमिति व्याप्तिरस्ति। सत्यम् ये केचित् कार्यजन्मनि करणीयोत्पादने उपाधिमन्तः देहिनः कर्तारस्ते स्वकीयशक्तेः[६] व्यापारापेक्षत्वाद्विकृताः विकारिणो भवन्त्येव। ततः स्वतोऽपि कुम्भकारादीनां विकारित्वासम्भवात्[७]। यत्र देहित्वसमानाधिकरणकर्तृत्वं तत्र विकृतित्व-मित्यवच्छिन्नत्वाद्व्याप्तेः अविकारित्वं कर्तृत्वेन न विरुध्यते। तस्य स्वसमानाधिकरणस्थितिर्न तिरस्क्रियते। यत्र चित्त्वे सत्यविकारित्वं तत्र कर्तृत्वम्। यथा स्वदेहस्पन्दकर्तर्यात्मनि इत्यनुमितत्वात्।

—•—

(व्याख्या) ननु कर्तृत्वे शरीरव्यापारवत्वस्यैव[८] प्रयोजकत्वदर्शनात्। कथं तर्हि तस्य कर्तृत्वम्। तथा च कर्तृत्वार्थं शरीरव्यापारस्य अवश्याङ्गीकर्तव्यतया[९] अविकारित्वकर्तृत्वयोः विरोधः तदवस्थ एवेत्याशङ्क्य निराकरोति-

(वृत्तिः) ननु देहिनामेव कर्तृत्वं दृष्टमिति कथं विदेहस्य कर्तृत्वमित्याशङ्कायामाह -

---

१. कर्तुः विकारित्वे] क१; कर्तृविकारित्वे- मु,क२
२. स्वतो] क१,मु;स्वतोऽधिष्ठानाभावेन-क२
३. कर्तृत्वेन] क१,क२; न कर्तृत्वेन- मु
४. तदुपहितकेवलात्मनां] ज१;तद्रहितकेवलात्मनां - ज२,ज३,ज४
५. तदुपहितत्वमात्रं] ज१; तद्रहितत्वमात्रं- ज२,ज३,ज४
६. स्वकीयशक्तेः]ज१, ज२,ज३; स्वक्रियाशक्तेः-ज४
७. कुम्भकारादीनां विकारित्वासम्भवात्] ज१,ज३,ज४; कुम्भकारादिविकारित्वासंभवात्-ज२
८. शरीरव्यापारवत्वस्यैव] क१,क२; शरीरव्यापारत्वस्यैव- मु
९. अवश्याङ्गीकर्तव्यतया] मु,क२;अवश्यमङ्गीकर्तव्यतया- क१

समस्तोपाधिशून्यत्वात् कर्तृत्वं नेष्यते कथम्।। ३२।।
कर्तृत्वप्रतिबन्धत्वात् उपाधेः तद्वियोगतः।
भवेत् प्रत्युत कर्तृत्वं प्राचुर्याय मुनीश्वराः।। ३३।।

(**व्याख्या**) शिवस्य कर्तृत्वं समस्तोपाधिशून्यत्वेन शरीरव्यापारादिरहितत्वेन हेतुना नेष्यत इति कथं न कथमपि उपपद्यते। कर्तृत्वे उपादानगोचरज्ञानादिमत्वस्य प्रयोजकत्वेन शरीरादिव्यापारस्य कर्तृतायाम् अप्रयोजकत्वादिति भावः। प्रत्युत सिद्धान्त्यभिमतसर्वकर्तृतायाम् उपाधेः प्रतिबन्धकत्वेन तदभाव एव प्रयोजक इत्याह - कर्तृत्वेति। उपाधेः मलाद्युपाधेः[१] सर्वकर्तृताप्रतिबन्धकत्वात्[२] तद्वियोगतः मलाद्युपाधिवियोगतः[३] प्राचुर्याय कर्तृत्वं सर्वकर्तृत्वमित्यर्थः।

(**वृत्तिः**) हे मुनीश्वराः समस्तोपाधिशून्यत्वात् निखिलशरीरेन्द्रियाद्यभावतः कर्तृत्वं कथं केन प्रकारेण नेष्यते न स्वीक्रियते। किं देहित्वं कर्तृत्वेन व्याप्तमिति वा किं कर्तृत्वं देहित्वेन व्याप्तमिति वा। तत्र न प्रथमः। उपाधेः कर्तृत्वव्याप्तसेन्द्रियशरीरस्य[४] दहनव्याप्तधूमस्य तदतिप्रकाशप्रतिबन्धत्वमिव कर्तृत्वप्रतिबन्धत्वात् तदभिव्याक्ति-विरोधित्वात्। किञ्चिद्विषयकरत्वं प्रतिबन्धमित्याशयः। तद्वियोगतः स्वस्वनिबन्धनमलशरीरेन्द्रियादिविश्लेषतः। कर्तृत्वं प्रत्युत पुनरभिमतविरोधतः। किञ्चिज्ञकर्तृत्वविलक्षणतया आर्द्रवर्ति-प्रभावाद्यभावतो विधूम दीप इव प्राचुर्याय अत्यभिव्यक्त्यर्थं[५] भवेत् सर्वविषयं स्यादिति भावः।

—•—

(व्याख्या) कार्यानुकूलस्पन्दादिरूपव्यापाररहितस्यापि कर्तृत्वं सदृष्टान्तमुपपादयति–

(वृत्तिः) यदुक्तं द्वितीयं कर्तृत्वं देहित्वव्याप्तमिति। तत्र यद्वा कार्यं शरीरयुक्तेन कर्त्रा व्याप्तम्[६] इत्यत्र चानैकान्तिकत्वं प्रदर्शयन् विकृतित्वं नोपलभ्य विदेहिनः कर्तृत्वं सदृष्टान्तं साधयति –

अदेहस्यापि कर्तृत्वं स्वदेहप्ररणे यथा[७]।
यथार्को दिनचेष्टानां सन्निधेरुपकारकः।। ३४।।
तथा सन्निधिमात्रेण विदधात्यखिलं शिवः।

(**व्याख्या**) यथा देवदत्तादेः स्वदेहप्रेरणादौ कार्ये तदनुकूलशरीरादिव्यापाररहितस्यापि कर्तृत्वं[८] तथा अशरीरस्यापि परमेश्वरस्य सर्वकर्तृत्वं भविष्यतीति भावः। तत्रैव दृष्टान्तान्तरमाह – यथेति।

---

१. मलाद्युपाधेः] क१,क२; कलाद्युपाधेः- मु
२. सर्वकर्तृताप्रतिबन्धकत्वात्] मु;सर्वकर्तृत्वं प्रतिबन्धकत्वात्- क१; सर्वकर्तृत्वाप्रतिबन्धकत्वात्-क२
३. तद्वियोगतः मलाद्युपाधिवियोगतः] क१,क२; कलाद्युपाधिवियोगतः- मु
४. कर्तृत्वव्याप्तसेन्द्रियशरीरस्य] ज२; कर्तृत्वव्याप्तस्येन्द्रियशरीरस्य- ज१,ज४; कर्तृत्वव्याप्तस्येन्द्रियशरीरस्य दहनव्याप्तसेन्द्रियशरीरस्य-ज३
५. अत्यभिव्यक्त्यर्थं- ज१,ज३,ज४; अभिव्यक्त्यर्थं- ज२
६. कर्त्रा व्याप्तम्] ज३;कर्तृव्याप्तम् -ज१,ज२,ज४; कर्त्रा व्याप्तम्-ज३
७. यथा] मु;यतः- क१,क२;
८. कर्तृत्वं] मु;यथा कर्तृत्वं- क१,क२

यथार्कः दिने दिने जायमानप्राणिव्यापाराणां तदनुकूलतादात्विकचेष्टादिव्यापाराभावेऽपि[१] उपकारकः तादात्विकपरिस्पन्दादिरूपव्यापारशून्यस्य[२] कर्तृत्वे सर्वदा कर्तृत्वप्रसङ्ग इत्यत आह- सन्निधेरिति। सन्निधिलक्षणव्यापारादित्यर्थः। ननु कोऽयं शिवस्य अजनकदशाव्यावृत्ततादात्विकः सन्निधिर्नाम[३] व्यापारः। न तावत् कार्यदेशावस्थायित्वं तस्याजनकदशाव्यावृत्तत्वाभावात्। अजनकदशायां[४] स देशः कार्यदेश एव न भवति। सत्येव कार्ये कार्यदेशत्वस्य विवक्षितत्वादिति चेन्न[५]। अन्योन्याश्रयात्। नापि शक्तिसमवधानमेव सान्निध्यं तस्यापि नित्यत्वेन अजनकदशाव्यावृत्तत्वाभावात्।

नापि शक्तेः कार्यौन्मुख्यं सन्निधानम् औन्मुख्यस्यैव निर्वक्तुमशक्यत्वात्। कार्यजननानुकूल-परिणामविशेषस्यौन्मुख्यशब्दार्थत्वे शक्तेः परिणामित्वस्वीकारे अपसिद्धान्तापातात्। कार्यजननानुकूलसहकारिसमवधानस्य सन्निधिशब्दार्थत्वे सहकारिणां नित्यत्वे पूर्वोक्तदोषानिस्तारादनित्यत्वे च तेषामेव जनकत्वे शक्तितत्साहित्यविशिष्टशक्त्युपेतस्य[६] जनकत्वकल्पनायां प्रमाणाभावात्। नापि कार्योत्पत्त्यनुकूलचिकीर्षासम्बन्धः। चिकीर्षाया अपि जन्यत्वाभ्युपगमे शिवस्य विकारित्वप्रसङ्गतादवस्थ्यात् नित्यसिद्धेच्छयाः सहकारिसमवधानमात्रेण चिकीर्षारूपत्वाङ्गीकारे सहकारिण एव जनकत्वेन तस्या अपि[७] जनकत्वे प्रमाणाभावादिति चेत् अत्राभिधीयते। कार्यौन्मुख्यविशिष्टशक्तेरेव सन्निधिशब्दार्थत्वात् औन्मुख्यत्वं[८] च कार्यानुकूल-सहकारिसाहित्यमेव। न च पूर्वोक्तदोषापत्तिः। प्रवृत्तिः परतन्त्रा संसारिप्रवृत्तित्वात् भृत्यादिप्रवृत्ति-वदित्यनुमानेन शक्त्युपेतस्यापि जनकत्वस्य साधनात्[९]। अत्र संसारिपदमीश्वरप्रवृत्तौ व्यभिचारवारणाय। न चौतदनुमानप्रवृत्तेः पूर्वम्[१०] ईश्वरासिद्ध्या व्यभिचारोपस्थितिरेव नास्तीति वाच्यम्। क्षित्यादिकं सकर्तृकम् इत्यनुमानेन निगमागमादिभिश्च तत्सिद्धौ व्यभिचारोप-स्थितिसम्भवात्। अतः[११] सन्निधिमात्रेण शिवस्य जनकत्वे न विकारित्वमिति लक्षणासम्भव[१२] इति सर्वमनवद्यम्।

(वृत्तिः) सदेहवददेहस्यापि शिवस्य कर्तृत्वमवगम्यते। तथा यथात्मनः स्वदेहप्रेरणे स्वकीयसूक्ष्मदेहस्पन्दद्वारा स्थूलदेहस्पन्दक्रियायामादिसंयोगे विकारित्वादिदूषणात् अस्पृष्ट्वा

---

१. तदनुकूलतादात्विकचेष्टादिव्यापाराभावेऽपि] मु,क२;तदनुकूलतात्त्विकचेष्टादिव्यापाराभावेऽपि- क१;
२. तादात्विकपरिस्पन्दादिरूपव्यापारशून्यस्य] मु,क२;तात्त्विकपरिस्पन्दादिरूपव्यापारशून्यस्य- क१;
३. अजनकदशाव्यावृत्ततादात्विकः सन्निधिर्नाम] मु,क२;अजनकदशाव्यावृत्तस्तात्त्विकसन्निधिर्नाम- क१
४. अजनकदशायां] क१,क२; किंच अजनकदशायां- मु
५. विवक्षितत्वादिति चेन्न] क२;विवक्षितत्वात् - क१,मु
६. शक्तितत्साहित्यविशिष्टशक्त्युपेतस्य] मु,क२;शक्तितत्सान्निध्याविशिष्टशक्त्युपेतस्य- क१;
७. तस्या अपि] क१,क२; तस्यापि- मु
८. औन्मुख्यं] मु,क२;औन्मुख्यत्वं- क१;
९. जनकत्वस्य साधनात्] मु,क२;साधनात्- क१
१०. पूर्वम्] क१,क२; पूर्वमेव- मु
११. अतः] मु,क२;अत्र- क१;
१२. न विकारित्वमिति लक्षणासम्भवः] क१,क२; नाविकारित्वलक्षणासम्भवः- मु

संकल्पलक्षणक्रियार्थक्रियाविशिष्टशक्तिसंबन्धलक्षणसन्निधिमात्रेण कर्तृत्वम् अवगतम्[१]। ननु इच्छामात्रेण कर्तृत्वं स्वाधिष्ठितशरीरस्पन्दादिके दृष्टं न तु बाह्ये। सत्यम्। अत एव सदाधिष्ठायकत्वेन विश्वमीश्वरस्य शरीरमिवानुमीयते[२]। अत एव शिवः शुद्धाध्वलक्षणसूक्ष्मदेहस्पन्दद्वारा अशुद्धाध्वलक्षणस्थूलदेहं स्पन्दयति। अस्मदादीनामिव न तु वास्तवशरीरमनोव्यङ्ग्यत्वं तदिच्छयाः मलेन शून्यत्वात् अदेहश्च शिवः कस्यचित् कर्ता भवति व्यक्तचित्त्वादात्मवदिति। नहि सदेहत्वेन कर्तृत्वं सदेहकर्त्रा कार्यं वा[३] व्याप्तम्। दृष्टान्तान्तरं दर्शयति यथेत्यादि। यथार्कः सूर्यो दिनचेष्टानां दिने दिने जायमानप्राणिशरीरस्पन्दक्रियाणां तात्त्विकचेष्टारहितः सन्निधेः सन्निधानेनोपकारकः कर्ता भवति तथा शिवः सन्निधिमात्रेण बिन्दोर्विचित्रपरिणतियोग्यसमयं विदित्वा इदमेवं भूतं भवत्विति संकल्पमात्रेणाखिलं विदधाति समस्तं करोति। न तु सूर्यादेरिव प्रागभूत्वा तदानीं कार्यदेशावस्थायित्वं भगवतः सन्निधित्वं सर्वदा सर्वगतत्वात्। किन्तु संकल्पलक्षणक्रियार्थक्रियाविशिष्टस्वशक्तिसम्बन्धित्वम्।

—•—

(व्याख्या) इदानीं शरीरादिव्यापारवत एव कर्तृत्वनैयत्येऽनवस्थाप्रसङ्गात् अशरीरस्यैव[४] कर्तृत्वम् अकामेनापि स्वीकार्यमित्याह –

(वृत्तिः) ननु न जातु देवतामूर्तिरस्मदादिशरीरवदिति शूद्धत्वात् तद्देहस्य[५] कर्तृत्वप्रतिबन्धत्वं न भवतीति। पुनर्देहिनो विश्वकर्मादेः संक्लृप्त्या स्वाभिमतकार्यकर्तृत्वदृष्टेश्च कार्यत्वेन परिदृश्यमानं विश्वं सदेहकर्त्रा व्याप्तम्। तन्नेत्याह–

सदेहस्यापि कर्तृत्वं सर्वत्रापि यदीष्यते।। ३५।।
तद्देहस्यापि कार्यत्वात् व्याप्तं कर्त्रन्तरेण तत्।

(व्याख्या) सर्वत्रापि[६] कार्ये सदेहस्यैव कर्तृत्वं यदि इष्यते तदा तद्देहस्यापि अवच्छेदकीभूतदेहस्यापि कार्यत्वात् तदपि शरीरं शरीरिकर्त्रन्तरेण व्याप्तम्।

(वृत्तिः) विदेहवत् सदेहस्यापि भगवतः सदेहकर्तॄणामग्रगण्यतया साधनीयानन्तस्यापि इत्यभिप्रायः। सर्वत्राप्यशुद्धवर्त्मनीव शुद्धवर्त्मन्यपीत्यभिप्रायः[७]। कर्तृत्वं यदीष्यते यद्यभ्युपगम्यते तद्देहः किं वस्तुतः परिच्छिन्नोऽपरिच्छिन्नो वा। यद्यप्यपरिच्छिन्नस्तदा शिवस्यैव बिन्दुः शक्तिर्वा

---

१. अवगतम्] ज४;आगतम्-ज१,ज२,ज३

२. ननु इच्छामात्रेण कर्तृत्वं स्वाधिष्ठितशरीरस्पन्दादिके दृष्टं न तु बाह्ये। सत्यम्। अत एव सदाधिष्ठायकत्वेन विश्वमीश्वरस्य शरीरमिवानुमीयते। जेपे पे अमतल उनवी पउपसंत जव जीम बवउउ. वि त्ंउांघ्वें वद डवाघंतपां, २ (च. २४६)रू नन्विच्छायाः शरीरान्तरनैरपेक्ष्येण ... शरीरमिवानुमीयत इति।

३. वा] ज१,ज२,ज३; च-ज४

४. अशरीरस्यैव] मु,क२;अशरीरस्य- क१;

५. तद्देहस्य] ज२,ज३,ज४;तददेहस्य - ज१

६. सर्वत्रापि] मु;यदि सर्वत्रापि- क१,क२;

७. सर्वत्राप्यशुद्धवर्त्मनीव शुद्धवर्त्मन्यपीत्यभिप्रायः-ज१,ज३,ज४; ज२ कोशे लुप्तम्।

देहत्वेनोपचर्यत इत्यस्मद्दर्शनमेव। यदि परिच्छिन्नः तर्हि सावयवत्वान्नचाकार्य इति वाच्यम्। यत्र सावयवत्वं तत्र कार्यत्वमिति सव्याप्तिकसावयवत्वसद्धेतोर्व्याप्तिविभञ्जनप्रसङ्गात्[१]। नहीश्वरशरीर-व्यतिरिक्त इति व्याप्तिः संकोचनीया। अदेहस्यापि कर्तृत्वं स्वदेहप्रेरणे यथेति विदेहस्यापि कर्तृत्वलक्षणकार्यसिद्धेन निबन्धनम्[२] इति विफलत्वात्[३]।

—•—

ततस्तद्देहस्याप्यस्मदीयशरीरवत् कार्यत्वात् कर्त्रन्तरेण तदितरविधात्रा तत्कार्यं व्याप्तं यत्र कार्यत्वं तत्र सकर्तृकत्वमिति साहचर्यनियमनियमितम् भवतु ततः का क्षतिरित्याशङ्क्याऽऽह-

तस्य देहादयोऽप्येवमित्यवस्था न कुत्रचित्।। ३६।।
ततः प्रथमसृष्टेस्तु समस्तोपाधिवर्जितः।
कर्ता महेश एवेष्टः प्रवृत्ताशेषशक्तिकः।। ३७।।

(व्याख्या) एवं तस्यापि शरीरस्येत्यनवस्थेत्यर्थः। ननु बीजाङ्कुरानवस्थावदनादित्वादयमदोष इत्यत आह- तत इति। तुशब्दः शङ्काव्यावृत्त्यर्थः। प्रथमसृष्टेः सर्गाद्यकालीनसृष्टेः सङ्कल्पात् करणादपीत्यत्र प्रथमोक्तायाः सङ्कल्पसृष्टेर्वा समस्तोपाधिवर्जितः देहेन्द्रियादिकरणशून्यः[४] महेश एव कर्ता इष्टः। कथं करणशून्यस्य कर्तृत्वमित्यत आह- प्रवृत्ताशेषशक्तिक इति। प्रवृत्ताः कार्योन्मुखीभूता अशेषाः समस्ताः शक्तयो यस्य स तथोक्तः। विचित्रानन्तशक्तिमतः परमेश्वरस्य शरीराभावेऽपि विचित्रानन्तकार्यनिर्वाहो नाश्चर्यावह इति भावः। अत्रेश्वरस्याशरीरत्वे[५] विचित्रतरशक्तियुक्तत्वे च कठवल्ली श्वेताश्वतरश्रुतिश्च द्रष्टव्या।

(वृत्तिः) अदेहस्य तत्र कर्तृत्वानभ्युपगमात् तस्य विश्वकर्तुः देहनिर्मातुः देहादयो ऽ पि एवं कर्त्रन्तरेण व्याप्ता इति तस्य तस्येत्यवस्था न कुत्रचिदेकत्रापि न भवति। किन्त्वनवस्थेत्यर्थः। ननु कस्यचित् कर्तुर्देहस्य[६] स्वकृतत्वमभ्युपगम्य अनवस्थां परिहरामः। तन्न। स्वदेहस्य स्वनिर्मितव्यत्वे विदेहस्य तत्र कर्तृत्वानभ्युपगमात्। प्रागपि देहित्वं सिद्धमिति तद्देहस्यापि स्वनिर्मितव्यत्वे तत् सिद्धमित्यनवस्था दुर्निवार्या तस्तद्दुर्निवार्यत्वात्[७]। प्रथमसृष्टेस्तु सृष्ट्यारम्भकाले प्रथमप्रभावाणां देहेन्द्रियाणां सदेहकर्तघ्णामग्रजन्मनामनन्तादीनामित्याशयः। सृष्टेः संसर्जनस्य समस्तोपाधिवर्जितः समस्तैः शरीरेन्द्रियादिभिर्विमुक्तः प्रवृत्ताशेषशक्तिकः। प्रवृत्ताः संकल्पलक्षणव्यापृतिरूपा अशेषाः समस्ता जनन्यादयः शक्तयो यस्य स तथोक्तः। महेशः शिवः कर्तेष्टः स्रष्टेत्यभिमतः तदेतत् सदुक्त्या परशिवस्य कघ्प्तपञ्चवक्त्रत्रिपञ्चदृक्त्वात् वास्तवं शाक्तं बैन्दवादिकं वा शरीरं वदन्तः

---

१. सव्याप्तिकसावयवत्वसद्धेतोर्व्याप्तिविभञ्जनप्रसङ्गात्] ज१,ज२,ज४; सव्याप्तिकस्यावयवत्वसमो . . . . तोर्व्याप्तिविभजनप्रसङ्गात्-ज३
२. सिद्धेन निबन्धनम्] ज१,ज३; सिद्धेर्न निर्बन्धनम्- ज२;सिद्धेन निर्बन्धनम्-ज४
३. विफलत्वात्]ज२,ज३,ज४;सफलत्वात्-ज१;
४. देहेन्द्रियादिकरणशून्यः, क१,क२; देहादिकरणशून्यः- मु
५. अत्रेश्वरस्याशरीरत्वे] मु,क२;अत्रेश्वरस्याशरीरत्वेऽपि- क१;
६. कर्तुर्देहस्य] ज३,ज४;कर्तृदेहस्य-ज१,ज२
७. तस्तद्दुर्निवार्यत्वात्] ज१,ज२; तद्दुर्निवार्यत्वात्-ज३,ज४

प्रतिक्षिप्ताः। एवकारतुशब्दौ अयोगान्ययोगव्यवच्छेदपरौ। ननु शिवस्य कुम्भादौ कर्तृत्वादर्शनात् कुतः सर्वकर्तृत्वं? सत्यं। तत्र प्रयोजकत्वरूपं कर्तृत्वमस्तीति सर्वमनवद्यम्।

—•—

(व्याख्या) यथा अधिकारकर्तृत्वं निर्विकारस्याप्यविरुद्धम् एवं लयादिकर्तृत्वमपीत्याह–

(वृत्तिः) इत्थं सदेहस्य कर्तुः सर्वकर्तृत्वं निरस्य शिवभेदः शक्तितः सिद्ध इत्युपसंहरति–

लयादिकोऽप्ययं भेदः शक्तितस्तु ततः स्थितः।
बिन्दुक्षोभो यतः शम्भोः शक्तेरेव प्रवर्तते।। ३८।।

(व्याख्या) यतो बिन्दुक्षोभः बिन्दुगतव्यापारो लयादिशक्तेरेव न देहादिव्यापारमपेक्ष्यापि अतो[१] लयादिप्रयुक्तः पतिभेदः[२] संहर्तृत्वपालकत्वरूपः शक्तित[३] एव। उदासीनोद्युक्तशक्तिभ्यां व्यवस्थितः।

(वृत्तिः) अयं प्रागुक्तः लयादिकः शिवादिको भेदः शक्तितः शक्तिद्वारा पत्युः स्थितो निश्चितः। ततः तस्मात् कारणात्[४] बिन्दुक्षोभो बिन्दुविकरणम् शम्भोः शिवस्य शक्तेः संकल्परूपलक्षणतः प्रवर्तते जायते। तथाहि– शक्तयो हि कर्तव्यतिरस्कारेण स्वात्मन्यवस्थिताः लयतत्त्वाभिधानमवस्थाविशेषमुद्दीपयन्त्यो निष्कलादिपदप्रवृत्तौ उपाधिभावं प्रतिपद्यन्ते। यदातुराः कार्यसम्पादनप्रवृत्ता न च तत्प्रयोगभूमिं प्राप्ताः[५] तदा तत्पालनप्रवृत्तत्वात् भोगतत्त्वाभिधान-मवस्थाविशेषम् आदर्शयन्त्यः सकलनिष्कलादिपदप्रवृत्तौ कारणतामुपयान्ति। यदा पुनः कार्यप्रयोगदशामनुप्राप्ताः तदाधिकारतत्त्वाभिधानम्[६] अवस्थान्तरमवभासयन्त्यः सकलादिपदप्रवृत्तौ हेतुतां व्रजन्तीति शक्तीनां प्रवृत्तिभेदकल्पनयात्र भेदो न पारमार्थिकः। यदाहुः–

शक्त उद्युक्तः प्रवृत्तश्च कर्ता त्रिविध इष्यते।
शक्तेः प्रवृत्तिभेदेन भेदस्तस्योपचारतः।। इति।।

ननु भेदोपचारस्य प्रयोजनमत्र वक्तव्यम्। यदाहुः– नर्ते प्रयोजनादिष्टं मुख्यशब्दार्थलङ्घनम् इति। उच्यते।

दीक्षादिनाधिकारतत्त्वयोजितस्य भोगाख्यतत्त्वयोजितस्य ततोऽपि लयतत्त्वयोजितस्याणोः स्थूलसूक्ष्मपर–शक्त्यभिव्यक्तिभेदेन वास्तव एवात्र भेद इति दर्शयितुं संस्कारकस्य[७] अत्र भेदोपचारः कृत इति न निष्प्रयोजनम्। शिवशिवशक्तिव्यापाराणां लयाद्यविभागभेदो वास्तव इति तात्पर्यम्।

—•—

१. अतो] क१,क२; ततः कृतः– मु
२. लयादिप्रयुक्तः पतिभेदः, मु,क२;लयादिप्रयुक्तपतिभेदः– क१;
३. संहर्तृत्वपालकत्वरूपः शक्तितः] क१,क२; संहर्तृत्वपालकत्वरूपशक्तितः– मु
४. ततः तस्मात् कारणात्] ज३;ततः तस्मात् कारणात् यतो यस्मात् कारणात् –ज१,ज२,ज४
५. तत्प्रयोगभूमिं प्राप्ताः] ज१,ज३,ज४; तत्प्रयोगादिमप्राप्ताः– ज२
६. तदाधिकारतत्त्वाभिधानम्] ज२,ज३,ज४;तदधिकारतत्त्वाभिधानम्– ज१
७. संस्कारकस्य] ज२,ज३,ज४;संस्कारस्य– ज१;

(व्याख्या) शिवस्य शक्तितः समस्तकार्यनिर्वाह इत्युक्तम्। सा शक्तिः कीदृशीति जिज्ञासायां स्वाभिमतां शक्तिं निरूपयति–

(वृत्तिः) सा शक्तिः कीदृशीति जिज्ञासायां तत्स्वरूपं निरूपयति –

ज्ञानक्रियात्मिका सापि सत्या नित्योदितप्रभा।
सा पराभिमुखी सर्वबन्धलेशविवर्जिता।। ३९।।
अनन्यान्या शिवात् सैव वस्तुतो मूर्तिरैश्वरी।

(व्याख्या) ज्ञानं च क्रिया च ते आत्मा स्वरूपं यस्याः सा तथोक्ता। अनेन ज्ञानक्रियेच्छाशक्तीनां भेदवादो निराकृतः। एकत्वं[१] च पूर्वमेव निरूपितम्। श्रुतिसिद्धं च। सत्येत्यनेनानिर्वचनीयत्वनिरासः। ईश्वराभिन्नतच्छक्तेः अनिर्वचनीयत्वासम्भवादिति भावः। नित्येति पाठे जन्यत्ववादिनिरासः। जन्यत्वे च शिवस्य विकारित्वापत्तिरिति भावः। नित्यमुदिता प्रभा[२] नित्योदितस्य सन्ततोदितस्य परमेश्वरस्य प्रभेति वा। नित्योदितेत्यनेन अस्वप्रकाशवादिमतं निराक्रियते। अस्वप्रकाशत्वे जडत्वेन शिवतादात्म्यानुपपत्तेरिति भावः। सा पूर्वोक्ता शक्तिः पराभिमुखी सदा सर्वविषयाभिमिखी। अनेनाणुशक्तिवैलक्षण्यं दर्शितम्। तत्रैव हेतुमाह –

सर्वबन्धेति। सर्वेषां मलमायाकर्मणां बन्धानां लेशेनापि वर्जिता[३] इत्यर्थः।अत्यन्तभेदमत्यन्ताभेदं च निराकरोति अनन्यान्येति। तादात्म्यमापन्नेत्यर्थः। तदुक्तं[४] कूर्मे –

एका शक्तिः स चैकोऽपि शक्तिमान् उच्यते शिवः।
शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थिनः।
अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तकाः।। इति

पूर्वं शक्तिप्रतियोगिकं तादात्म्यं[५] शिवे निरूपितम्। इदानीं शिवप्रतियोगिकं तादात्म्यं[६] शक्तौ निरूप्यत इति न पौनरुक्त्यम्। नन्वेवमशरीरित्वे शिवे मूर्तिमत्वव्यपदेशः कथमित्यत आह – सैवेति। चिच्छक्तिरेव नत्वनन्तेशादिवत् बैन्दवीमूर्तिः।

(वृत्तिः) सापि शक्तिः ज्ञानक्रियात्मिका ज्ञानं च क्रिया च ते आत्मा स्वरूपं यस्याः सा तथोक्ता। ज्ञानात्मिकेत्यनेन परिग्रहशक्तेः कुण्डलिन्याः विशिनष्टि स्म नित्या नाशरहिता तदनेन बौद्धज्ञानाद्विशिनष्टि स्म। सर्वबन्धलेशविवर्जिता सर्वमलादिबन्धानां लेशेन शेषांशभूताधिकारमलेनापि विवर्जिता विमुक्ता। तदनेन विद्येश्वरादिशक्तेर्विशिनष्टि स्म। नित्योदितप्रभा अनादिव्यक्तप्रकाशा। तदनेन मुक्तशिवशक्तेर्विशिनष्टि[७] स्म। सा पराभिमुखी विषयाभिमुखी तदनेन

१. एकत्वं] क१,क२; एवं- मु
२. प्रभा नित्योदितप्रभा] मु;प्रभा- क१,क२
३. वर्जिता] क१,क२; विवर्जिता- मु
४. अत्यन्तभेदमत्यन्ताभेदं च निराकरोति अनन्यान्येति। तादात्म्यमापन्नेत्यर्थः। तदुक्तं] मु,क२;तदुक्तं- क१
५. शक्तिप्रतियोगिकं तादात्म्यं] क१,क२; शक्तिप्रतियोगिकतादात्म्यं- मु
६. शिवप्रतियोगिकं तादात्म्यं]क१,क२; शिवप्रतियोगिकतादात्म्यं- मु
७. ज्ञानप्रधानस्वप्रकाशशिवस्वरूपाद्विशिनष्टि] ज१,ज३,ज४; ज्ञानप्रधानाकाशशिवस्वरूपाद्विशिनष्टि- ज२

क्रियात्मिकेत्यनेन च ज्ञानप्रधानस्वप्रकाशशिवस्वरूपाद्विशिनष्टि स्म। शिवादनन्यपरचिद्रूपशक्तेः[1] संवेद्यतया तदनुभूतिलक्षणस्ववृत्तिकस्वचिद्रूपशिवसिद्धौ सत्यां यद्यपि स्वेतरस्ववेद्यत्वे स्वात्मनि क्रियाविरोधेन वेद्यविलक्षणवेदनत्वेन स्वसंवेद्यतया विराजत इति। यदेव परसंवेदनं शक्तिरूपं तदेव स्वसंवेदनं सत् स्वसंवित्सिद्धं शिवरूपमित्यपृथक्सिद्धत्वादन्या सती स्वयं न विद्यत इत्यनन्या। अन्या च एकापि संवित् तस्याः स्वपरापेक्षस्वरूपत्वं विद्यत इति स्वापेक्षस्वरूपमात्रविवक्षया[2] शिव इति परापेक्षस्वरूपमात्रविवक्षया शक्तिरिति पृथक्सिद्धतयोपवर्णिता। सैव एतल्लक्षणलक्षितैव वस्तुतः स्वभावतः ऐश्वरी शिवसम्बन्धिनी मूर्तिः। द्विविधा ह्यात्मनां मूर्तिः चला ऽ चला च। तत्र चला तात्त्विकभौवनशरीरात्मिका अचला ज्ञानक्रियात्मिका। मूर्तिरियमपीदृशी। ननु व्यतिरिक्ता हि मूर्तिः, सत्यम्। तत्त्वेनोपचर्यत इति अव्यतिरिक्ता। तदुक्तमत्र –

ज्ञानक्रिये शिवप्रोक्तः सर्वार्थे निर्मले परे। इति।

—•—

(व्याख्या) पत्युर्लयादिकोऽप्ययं भेदः शक्तितस्तु ततः स्थित[3] इत्यत्र यादृशशक्त्यवस्थाभेदात्[4] लयादिभेदोऽपि विवक्षितः तत्र शक्तेः स्वरूपं तारतम्यं तत्र योजितानां फलं निरूपयति–

(वृत्तिः) सा तु –

लयावस्थां यदा प्राप्ता तदोदासीनरूपिणी।। ४०।।
कार्याभावादुदासीना साम्यावस्था तदैव हि।

(व्याख्या) सेत्यनुवर्तते। सा शक्तिः यदा लयावस्थां प्राप्ता तदा उदासीनरूपिणी। तत्र हेतुमाह–कार्याभावादिति। क्रियांशाभावादित्यर्थः। अतः सा उत्कृष्टतमा[5] इति भावः। भोगावस्थायां तत्स्वरूपं निरूपयति – साम्येति। यस्मात् विज्ञानक्रिययोः साम्यम् उद्युक्तकर्तृषु उद्योगावस्थायां तस्मात् तदा साम्यावस्था शक्तेः भवतीत्यर्थः।

(वृत्तिः) यदा यस्मिन् काले लयावस्थामतिक्रान्तबिन्दुकदशां प्राप्ता गता तदोदासीनरूपणी। तस्मिन् काले[6] कर्तव्यतिरस्कारलक्षणा कुतः कार्याभावात् स्वकर्तव्यलक्षणक्रियांशस्य स्वनिष्ठत्वादुदासीना तदैव हि साम्यावस्था सदृशत्वदशा। यदोद्युक्तदशां प्राप्तेति शेषः।

—•—

(वृत्तिः) कुत इत्यत आह–

---

१. शिवादनन्यपरचिद्रूपशक्तेः] ज१,ज२,ज३; शिवादनन्यापरचिद्रूपशक्तेः-ज४
२. स्वापेक्षस्वरूपमात्रविवक्षया] ज१,ज२,ज३;सापेक्षस्वरूपमात्रविवक्षया-ज४
३. ततः स्थितः] क१,मु; व्यवस्थितः-क२
४. यादृशशक्त्यवस्थाभेदात्] क१,क२; यादृशाच्छक्त्यवस्थाभेदात्- मु
५. उत्कृष्टतमा-क१,मु;उत्कटतमा-क२
६. लयावस्थामतिक्रान्तबिन्दुकदशां प्राप्ता गता तदोदासीनरूपणी। तस्मिन् काले- ज१,ज३,ज४; ज२ कोशे नास्ति।

विज्ञानक्रिययोः साम्यं यस्मादुद्युक्तकर्तृषु।। ४१ ।।
तदा ह्येतत् करोमीति व्यापारे साम्यमेतयोः।

(व्याख्या) उद्योगावस्थायां ज्ञानक्रिययोः साम्यावस्था कुत इत्यत आह– एतदिति। एतदिति ज्ञानांशस्याभिनयः[१] करोमीति क्रियांशस्य। कार्ये जनयितव्ये उद्युक्तकर्तृणाम्[२] इदं मया कर्तव्यमिति ज्ञानक्रिययोः तुल्यावस्थानुभावात् साम्यमिति भावः। अत एषा उत्कृष्टतरेति भावः।

(वृत्तिः) यस्मात् कारणात् उद्युक्तकर्तृषु स्वस्वकार्यसमुत्पत्त्यर्थं तदुपायचिन्तकेषु कुम्भकारादिषु एतत् करोमीति व्यापारे विज्ञानक्रिययोः ज्ञानक्रियाशक्त्योः वेदनकृतिव्यापृत्योः साम्यं[३] विविक्तं विदितम्। ततस्तस्मात्[४] उद्युक्तकर्तरि शिवे शिवस्य निर्विकल्पेऽपि शब्दानुविद्धबौद्धविकल्पवैधुर्यलक्षणयाथार्थ्यपदार्थपरस्परव्यावृत्तरूपग्रहणलक्षणा विकल्प-सविकल्पोऽस्तीति[५] एतयोः ज्ञानक्रियाशक्त्योरेतत् करोमीति ज्ञानक्रियारूपे व्यापारे साम्यमनुसन्धेयम्। एतदिति *ज्ञानांशस्याभिनयः[६] करोमीति क्रियांशस्य।

अधिकारे क्रियोद्रिक्ता कार्येष्वधिकृता यतः।। ४२ ।।

(व्याख्या) अधिकारावस्थायां तत्स्वरूपं निरूपयति – अधिकार इति। अधिकारावस्थायां[७] क्रिया उद्रिक्ता ज्ञानांशादिति[८] शेषः। तत्र हेतुमाह – कार्येष्विति। अत एषा केवलमुत्कृष्टेत्यर्थः।

(वृत्तिः) अधिकारे अधिकारदशायां क्रियात्मिका शक्तिः ज्ञानशक्तेः उद्रिक्ता बाहुल्यवती कुतः यतः क्रियाशक्तिः कार्येष्वधिकृता प्रवृत्ता तत् कार्यं किमित्यत आह– कार्यं च करणीयं तु इच्छानन्तरकार्यकृत् इति श्रुतेः। भगवतः क्रियाशक्तिरेव स्वकर्तव्यक्रियां संकल्पशब्द-शब्दितदृक्क्रियात्मकेच्छालक्षणकर्तव्यान्तरं कृत्वा तेन घटितेच्छाशक्तित्वेन वर्तते। पुनरस्मदादीनामपि सरागमनोभि ऽ व्यक्ता सती क्रियाशक्तिः तादृशी सतीच्छाशक्तिरिति च वर्तत इति गुरवः।

—•—

(व्याख्या) ननु कार्यत्वं नाम क्रियासाध्यत्वं क्रिया च स्पन्दरूपा शरीरिण्येव दृष्टा। तथा च पुनरपि विकारित्वप्रसङ्ग इत्याशङ्क्य कार्यशब्दार्थमधिकृतशब्दार्थं च वदन् क्रियोद्रेकं दर्शयति–

---

१. एतदिति ज्ञानांशस्याभिनयः] मु;ज्ञानांशाभिनयः- क१,क२;
२. उद्युक्तकर्तृणाम्] मु,क२;उद्युक्तकर्तृणा- क१;
३. वेदनकृतिव्यापृत्योः साम्यं] ज१,ज२,ज४; वेदनव्यापारयोः सम्यक्-ज३
४. ततस्तस्मात्] ज१,ज२,ज३;ततस्तस्मात् कारणात्-ज४
५. शब्दानुविद्धबौद्धविकल्पवैधुर्यलक्षण याथार्थ्यपदार्थपरस्परव्यावृत्तरूपग्रहणलक्षणाविकल्पसविकल्पो ऽ स्तीति] ज१,ज२,ज३; शब्दानुविद्धबौद्धविकल्पवैधुर्यलक्षण . . . लक्षणापि विकल्पसविकल्पो ऽ स्तीति -ज४
६. *ज्ञानांश ... अपरत्र च' पर्यन्तं भागः ज२ कोशे लुप्तः। परं ४६ तमपृष्ठे ईशानी परमा काष्ठा इत्यस्य श्लोकस्य व्याख्यानावसरे अयं भागः पुनर्दृश्यते।
७. अधिकारावस्थायां] क१,क२; अधिकारे अधिकारावस्थायां- मु
८. ज्ञानांशादिति] क२;नांशादिति- क१; ज्ञानादिति- मु;

कार्यं च[1] करणीयं तु गुणसङ्कल्पसंस्मृतिः।

(व्याख्या) करणीयं कृतिविषयमित्यर्थः। तत्र करणशब्दार्थमाह–गुणसङ्कल्पसंस्मृतिरिति। करणं नाम गुणानां कार्यधर्माणां सङ्कल्पसंस्मृतिः।

(वृत्तिः) ततस्तदिच्छाशक्तिलक्षणकर्तृशक्तिः कर्तव्यार्थमात्रनिपतिततदिच्छात्म प्रत्यर्थेच्छात्म स्वकार्येषु प्रवृत्तेति तदपि करणीयं गुणसंकल्पसंस्मृतिः प्रत्यर्थमिदमेवं भवत्विति कर्तव्यपदार्थ-गुणविषयेच्छालक्षणस्मरणं तल्लक्षणं ज्ञानम्।

—•—

(वृत्तिः) ततः–

न तु व्यापार इत्युक्ता विभोस्तद्विषया स्मृतिः।। ४३।।

(व्याख्या) एवं भवतु इत्येवमाकारम्[2] अनुसन्धानं न तु व्यापार[3] इति। एवं च न विकार[4] इति भावः। एतादृशानुसन्धानस्य शक्तिनिष्ठत्वभ्रमं व्यावर्तयति–विभोरिति। विभोः शिवस्य कार्यविषयं स्मरणं तदेव कृतिरित्यर्थः।

(वृत्तिः) विभोः शिवस्य तद्विषया स्मृतिः[5] विचित्रगुणबिन्दुकार्यगोचरं स्मरणं न तु व्यापार इत्युक्ता विकृतिनिबन्धनजडस्पन्दक्रियारूपव्यापृतिरिति नोदिता। तथोक्तिस्तु तद्धेतुत्वात्। तदुक्तं मालिनीविजये –

ज्ञापयन्ती जगत् सर्वं ज्ञानशक्तिर्निगद्यते।
एवम्भूतमिदं वस्तु भवत्विति यदा पुनः।।
जाता तदैव तद्वस्तु कुर्वन्त्यत्र क्रियोच्यते। इति।

—•—

(व्याख्या) फलितमाह[6]–

(वृत्तिः) फलितमाह–

तस्मात् सदाशिवो ज्ञानाज्ञानरूप इति स्थितः।

(व्याख्या) यस्मात् ज्ञानक्रिययोरवस्थाद्वयेऽपि समत्वं तस्मात् सदाशिवोऽपि[7] ज्ञानाज्ञानरूपः[8] ज्ञानरूपः क्रियारूपश्च[9] इत्यर्थः। इदं च ईश्वरस्यापि उपलक्षणं तत्रापि ज्ञानक्रिययोः सत्त्वेन ज्ञानाज्ञानरूपत्वस्य अनुक्तसिद्धत्वात्।

१. च] मु,क२;तु- क१;
२. इत्येवमाकारम्] मु,क२;इत्येवकारम्- क१;
३. न तु व्यापार, मु;निर्व्यापार- क१; न व्यापार-क२
४. च न विकार] क२;तु न विकार- क१; च अविकार- मु;
५. तद्विषया स्मृतिः] ज२,ज३,ज४;तद्विषयतास्मृतिः- ज१
६. फलितमाह] क१,क२; मु कोशे न दृश्यते।
७. सदाशिवोऽपि] क१,क२; सदाशिवः- मु
८. ज्ञानाज्ञानरूपः] मु,क२;ज्ञानं ज्ञानरूपं- क१;
९. ज्ञानरूपः क्रियारूपश्च] मु;ज्ञानरूपक्रियारूपः- क१,क२;

(वृत्तिः) तस्मादिति। तस्मात् क्रियाया अपि ज्ञानलक्षणत्वात् सदा स्वापादिसर्वस्मिन् काले शिवः ज्ञानज्ञातृरूप इति स्थितः। स्वपरप्रकाशरूपः न जडस्पन्दक्रियालक्षण इति सुनिश्चितः इदमपरिज्ञातवतां भ्रम इति भावः।

—•—

(व्याख्या) एतदवस्थाद्वयानुस्यूतज्ञानविशेषद्वयं प्रति लयावस्थायां विद्यमाननि-र्विशेषचितिरेव प्रयोजिकेत्याह–

(वृत्तिः) ज्ञानक्रियाशक्त्योरर्थप्रत्यर्थविषयस्वकार्यानुरूपतः समविषमस्थिति-मुक्त्वोपसंहरति–

अनयोर्ज्ञानयोर्हेतुरविशेषात्मिका चितिः।। ४४।।

(व्याख्या) अनयोः साम्याधिकारावस्थागतयोः ज्ञानविशेषयोः अतः अवस्थाद्वय-चित्प्रयोजकत्वेनापि उदासीना चित् उत्कृष्टतमेति भावः।[१]

(वृत्तिः) अनयोः ज्ञानयोः एतयोः विचित्रकार्यविषयज्ञानतद्गुणसंकल्प-रूपज्ञानलक्षणक्रिययोः[२] हेतुः कारणं अविशेषात्मिका अविशेषः अभेद आत्मा स्वरूपं यस्याः सा तथोक्ता। उभयसाधारणरूपिणीत्यर्थः।

—•—

(व्याख्या) पूर्वोक्तमेव शक्तिशरीरत्वं[३] स्मारयति–

शक्तिरुक्ताऽविकल्पा सा महती मूर्तिरैश्वरी।

(व्याख्या) अविकल्पा निर्विकल्पात्मिकेत्यर्थः[४]। ऐश्वरी ईश्वरसमवेतेत्यर्थः।

(वृत्तिः) अत एवाविकल्पा विकल्परहिता। महती सर्वार्थव्यापिका ऐश्वरी शिवसमवायिनी मूर्तिरचलेति पुरोक्ता। चितिः चित् सा शक्तिरुक्ता शिवबलमिति प्रोक्ता। सा तु चिदचिदनुग्रहकत्रह्ल सत्यचिदनुग्रहकत्रह्ल सती। चिच्छक्तितिरोधायिका। चिदनुग्रहकर्त्री सत्यचिन्मलशक्तितिरोधायिका भवति। शिवसमवेततया शक्तेः परिणतिधर्मरहितत्वात् तत् ज्ञानक्रियारूपकार्यभेदोक्ति-रुपचारबीजेति। तदपृथक्सिद्धमेकस्वभावं ज्ञेयम्। तदुक्तं रत्नत्रये –

इच्छाकार्यमनिच्छापि कुर्वाणेच्छा चिदव्यया।
ज्ञानमज्ञानरूपैवमक्रियापि क्रिया तथा।। इति।।

—•—

---

१. ज्ञानविशेषयोः अतः अवस्थाद्वयचित्प्रयोजकत्वेनापि उदासीना चित् उत्कृष्टतमेति भावः।, मु; ज्ञानविशेषयोः- क१,क२;

२. विचित्रकार्यविषयज्ञानतद्गुणसंकल्परूपज्ञानलक्षणक्रिययोः] ज१,ज२,ज४; विचित्रकार्यविषयज्ञान-तत्त्वगुणसंकल्परूपज्ञानलक्षणक्रिययोः-ज३

३. शक्तिशरीरत्वं] मु;शरीरत्वं- क१,क२

४. ज्ञानविशेषयोः अतः अवस्थाद्वयचित्प्रयोजकत्वेनापि उदासीना चित् उत्कृष्टतमेति भावः।वाक्यमिदं क१,क२ कोशयोरत्रैव दृश्यते, मु कोशे तु इतः पूर्वमेव वर्तते।

(व्याख्या) ननु क्रियापादे शोध्यत्वेनोक्तस्य शिवतत्त्वस्य अधुना शिवतत्त्वं तदेव तदित्यादिना अशोध्यलयाद्यभेदेनाभिधानमनुपपन्नम्। किञ्च, व्यापकशुद्ध्या व्याप्यशुद्ध्यर्थं शिवतत्त्वस्य शान्त्यतीत-कलाव्याप्तत्वं[१] चोक्तम्। तदपीदानीं लयतत्त्वस्य शिवतत्त्वाभिधाने[२] विरुद्धं कारणीभूतबिन्द्ववस्थाविशेषस्य लयतत्त्वस्य कार्यभूतशान्त्यतीतकलानिष्ठत्वासम्भवादिति शङ्कन्ते।

(वृत्तिः) ऋषयो वाच्यभेदमजानन्तः समानवाचकमात्रे भ्रमन्तः पुनराशंकयन्ति-

ऋषयः-

दीक्षायां भगवंस्तत्त्वं शिवाख्यं शोध्यमीरितम्।। ४५।।
शान्त्यतीतकलाव्याप्तमिति चाद्य विरुध्यते।

(व्याख्या) शिवाख्यमिति सदाशिवाधिकारतत्त्वयोः अपि उपलक्षणम्। अत एव तयोरपि उत्तरत्र परिहारः कथ्यते। शान्त्यतीतकलाव्याप्तमित्येतच्च बिन्द्ववस्थाविशेषस्य लयादिरूप-शिवतत्त्वस्य विरुध्यते। तत्र हि शिवसदाशिवेश्वरतत्त्वानि द्विविधानि लयादिबिन्द्ववस्थाविशेषाणि पुरुषार्थसाधकानि मुख्यानि एकानि। अन्यानि बिन्दुकार्याणि भुवनाद्याधाराणि[३]। तत्र शोध्यत्वव्याप्यत्वप्रतिपादकागमेषु द्वितीयान्येव विवक्षितानि नाद्यानि।

(वृत्तिः) हे भगवन् दीक्षायां शिवाख्यं शिवाभिधानं तत्त्वमतिक्रान्तबिन्दुकमित्युक्तं शोध्यमीरितम् शोधनीयमित्यप्युक्तम्। पुनः शान्त्यतीतकलाव्याप्तं शान्त्यतीतकलागर्भितमिति चोदितम्। अद्य इदानीं तदिदं विरुध्यते अतिक्रान्तबिन्दुकत्वेन तिरस्क्रियते।

—•—

(व्याख्या) अतो नोक्तविरोध इति वदन् द्वितीयविरोधे तत्राद्यशिवतत्त्वग्रहणेऽपि मतान्तरेण परिहारान्तरमपि आह-

(वृत्तिः) भगवान् सत्यशब्दं प्रयुञ्ज्यार्धाङ्गीकारं[४] प्रदर्शयन् परिहरति। -

ईश्वरः-

चोदितं सत्यमेवैतत् वक्ष्ये यूयं समाहिताः।। ४६।।
प्रवृत्तित्वादयं बिन्दुः क्षोभ्यते नाखिलात्मना।
तत्र यो क्षुब्धभागोऽस्य शान्त्यतीतकला तु सा।। ४७।।
शान्त्यादिभुवनात्मा यः परिणामस्तु बैन्दवः।
शिवतत्त्वं तदत्रोक्तं[५] सादाख्यं भुवनं तु यत्।। ४८।।

---

१. शान्त्यतीतकलाव्याप्तत्वं] क१,क२; शान्त्यतीतकलाव्याप्यत्वं- मु
२. शिवतत्त्वाभिधाने] क२;शिवतत्त्वरूपत्वाभिधाने- क१; शिवतत्त्वत्वाभिधाने- मु;
३. भुवनाद्याधाराणि] क१; भुवनाधाराणि- मु,क२
४. प्रयुञ्ज्यार्धाङ्गीकारं] ज१,ज४; प्रयुञ्ज्याङ्गीकारं-ज३
५. तदत्रोक्तं] क१,क२; तु तत्रोक्तं- मु

बैन्दवं तु सादाख्यं तत्त्वमुक्तं शिवागमे।
ऐश्वरं तदधस्तत्त्वं तदेवैश्वरमीरितम्।। ४९।।

(**व्याख्या**) प्रकृतित्वात् अनेकोपादानत्वात्[१] अखिलात्मना कार्त्स्न्येन न क्षोभ्यते न विक्रियते। किन्तु एकदेशेन। तथा च सविकारनिर्विकारयोर्मध्ये यो क्षुब्धभागः[२] स शान्त्यतीत इत्युक्तम्[३]। तत्कला शान्त्यतीतकलाव्याप्तिशास्त्रे[४] विवक्षिता न तु जन्यभुवनादिरूपा। अत एव सुप्रभेदे शान्त्यादीनि चत्वार्येव भुवनानि शिवतत्त्वे निष्कलशिवोपाधित्वेन उक्तानि तस्याक्षुब्धलया-दिव्यापकत्वम्[५] अप्यविरुद्धमिति भावः। द्वितीयशिवतत्त्वादिविवक्षया परिहरति–शान्त्यादीति। शान्तिरादिः येषां तानि शान्त्यादीनि। तथा च बिन्दुपरिणामात्मकं प्रथमविरोधशोध्यं शास्त्रे शिवतत्त्वमित्युक्तम्। न तु बिन्द्ववस्थाविशेषो लयः। अतो न विरोध इति भावः। शोध्यं सादाख्यं निरूपयतिसादाख्यमिति।

(**वृत्तिः**) प्रकृतित्वात् परमकारणात्वात् सर्वात्मना क्षोभ्यत्वे अनित्यत्वतो ऽ नवस्था प्रसङ्गात् अयं षट्पदार्थमध्यपठितो बिन्दुरखिलात्मना सर्वात्मना न क्षोभ्यते न विक्रियते। तत्र क्षुब्धाक्षुब्धभागयोर्मध्ये ऽ स्य बिन्दोरक्षुब्धभागो यः सा शान्त्यतीतकला शान्त्यतीतकलेति ज्ञेया। यः शान्त्यादिभुवनात्मा शान्त्यादीन्युपलक्षणत्वाच्छान्त्यतीतसहितानि भुवनान्येवात्मा स्वरूपं यस्य स तथोक्तः बैन्दवः बिन्दूत्पन्नः परिणामः तदत्र शान्त्यतीतकलाव्याप्तत्वशोध्यत्वस्वीकारे शिवतत्त्वमुक्तम्। न तूपसंहृतकार्यबिन्दुलक्षणम्। तदधिष्ठानशिवशक्तिकिरणात्मकम् अथवेति भावः। पुनरत्रेति पदमिदमपि ज्ञापयति। अत्र पौष्करपारमेश्वरे शिवतत्त्वमुक्तम्। अन्यत्र शान्तिमस्तकस्थं शान्त्यतीतकलाव्याप्तं शान्त्यतीतभुवनमेकं शोध्यं शिवतत्त्वम्। पुनः शान्त्यादिभुवनात्मकं शान्त्यादिकलाचतुष्टयम्। शान्त्यतीतकलाव्याप्तं शक्तितत्त्वमिति। सादाख्यमीश्वरतत्त्वमपि अत्र न शिवशक्तिकिरणात्मकम् अथवोद्युक्तकार्यबिन्द्वात्मकं कार्यप्रयोगभूमिप्राप्तिमत् बिन्द्वात्मकं वेत्याह–सेत्यादि। शिवागमे। यत् बैन्दवं सादाख्यं सादाख्यसंज्ञितं[६] भुवनं तत्तु तदेव शोध्यत्वेन समुदितं सादाख्यतत्त्वमुक्तम्। न तु तदित्याशयः यत्तदधस्तत्त्वमधस्तनभागे वर्तमानत्वं ऐश्वरमीश्वरसंबन्धि तथेश्वरसंज्ञितं तदेवेश्वरमीरितं तदेव शोध्यत्वेन समुदितमीश्वरतत्त्वमित्युक्तम्। न तु तदित्याकूतम्।

—•—

इत्थं परिहृत्योपसंहरति –

एतानि त्रीणि तत्त्वानि सन्ति तत्त्वात्मवर्त्मनि।

---

१. अनेकोपादानत्वात्] क१,क२; उपादानत्वात्- मु
२. क्षुब्धभागः, क१,क२; क्षुब्धभागः ईषत् क्षुब्धभागः- मु
३. स शान्त्यतीत इत्युक्तम्] मु;स- क१,क२
४. तत्कला शान्त्यतीतकलाव्याप्तिशास्त्रे] मु;शान्त्यतीतकलाव्याप्तिशास्त्रे- क१,क२;
५. तस्याक्षुब्धलयादिव्यापकत्वम्] क२; तस्याःक्षुब्धलयादिव्यापकत्वम्- क१; तस्य च अक्षुब्धलयादिव्यापकत्वम्- मु
६. बैन्दवं सादाख्यं सादाख्यसज्ञितं] ज४;बैन्दवसादाख्यमसादाख्यसंज्ञितं-ज१; बैन्दवं सादाख्यसंज्ञितं-ज३

एतान्येव तु शोध्यानि पूर्वोक्तानि न कुत्रचित्।। ५०।।
तानि प्राप्यानि सर्वैस्तु दीक्षया योजितैर्नृभिः।

(व्याख्या) तत्त्वभुवनयोः तादात्म्येन भुवनं[१] तदेकभुवनं[२] तत्त्वमेव शिवागमे तत्र शोध्यप्रकरणे सादाख्यमित्युक्तम्। न तु बिन्द्ववस्थाविशेषो भोगः। शोध्यत्वेनोक्तमीश्वरतत्त्वमप्याह दृऐश्वरमिति। तदधः सदाशिवतत्त्वादधः[३] तत्त्वमैश्वरं यत्तदेव तत्र दीक्षायां शोध्यप्रकरणे ऐश्वरमित्युक्तम्। न तु बिन्द्ववस्थाविशेषरूपम् अधिकारतत्त्वमित्यर्थः। तेषां तु[४] तत्त्वानां शिवतत्त्वदिनामकत्वं तत्तन्नामकपश्वधिष्ठितत्वात्[५]। एतेषां तत्त्वानामुत्पत्तिक्रमः संख्यानियमश्च बिन्दुपटले वक्ष्यते। उत्तरपक्षाभ्युपगमम्[६] आह–एतान्येव[७] इदानीं बिन्दुपरिणामत्वेन उक्तानि[८] लयादीनि पतिपटलादाविति शेषः। कुत्रचिदपि न शोध्यानीत्यन्वयः।

(वृत्तिः) तत्त्वमेव आत्मा स्वरूपं[९] षडध्वसु मध्ये यस्य वर्त्मनस्तत्तत्त्वात्मवर्त्म तस्मिन् तत्त्वात्मवर्त्मनि शुद्ध इत्याशयः। एतानि बैन्दवानि त्रीणि तत्त्वानि सन्ति। विद्यातत्त्वमीश्वरतत्त्वे शक्तितत्त्वं शिवतत्त्वे ऽन्तर्भूतं ज्ञेयम्। एतान्येव तु शोध्यानि कुत्रचित् क्वचिदपि न पुरोक्तानि शक्तिकिरणात्मकत्वेनोक्तानि। तदधिष्ठेयोपसंहृतबिन्द्वात्मादीनि वा। ननु भुवनोपाधिकभोगाधिकारदशां[१०] गताया शक्तेर्मन्त्ररूपत्वात् कथं न शोध्यत्वम्। सत्यम्। मन्त्रात्मवर्त्मतया शोधनीयं न तु तत्त्वात्मवर्त्मतयेति न किञ्चिदसमञ्जसम्। तानि बैन्दवानि दीक्षया योजितैः सर्वैरणुभिर्निरतिशयभोगार्थं[११] प्राप्याणि।

—•—

(व्याख्या) ननु दीक्षया[१२] योजितैः त्रयाणामपि प्राप्यत्वाविशेषे मुक्तेः त्रैविध्यं स्यादित्यत[१३] आह–

(वृत्तिः) ननु सर्वैरित्युक्तं किं लयतत्त्वे योजितैरपि? नेत्याह–

---

१. भुवनं] क१,क२; भुवनं तदेव- मु
२. तदेकभुवनं] क१,क२; भुवनं- मु
३. तदधः सदाशिवतत्त्वादधः] मु;तदधः- क१,क२;
४. तु]क१; च- मु,क२
५. तत्तन्नामकपश्वधिष्ठितत्वात्] मु,क२;तत्तन्नामकमुपाध्यधिष्ठितत्वात्- क१;
६. उत्तरपक्षाभ्युपगमम्] क१,क२; उक्तपक्षापवादम्- मु
७. एतान्येव] मु;अतः एतान्येव- क१,क२
८. उक्तानि] क१; उक्तानि पुरोक्तानि- मु,क२
९. आत्मा स्वरूपं] ज३,ज४;आत्मनां स्वरूपं-ज१;
१०. भुवनोपाधिकभोगाधिकारदशां] ज३,ज४;भुवनोपाधिकभोगोऽधिकारदशां -ज१;
११. सर्वैरणुभिर्निरतिशयभोगार्थं] ज१,ज३;सर्वैर्नृभिर्निरतिशयभोगार्थं-ज४
१२. दीक्षया] मु,क२;दीक्षायां- क१;
१३. स्यादित्यत] सम्पादकीयः पाठः; स्यादिति- क१; स्यादित्यत्र- मु,क२

योजिता लयतत्त्वे ये ते मुक्ता नापरत्र[1] च।।५१।।
भोगाधिकारतत्त्वस्था व्यक्तचिन्मात्रशक्तयः।

(व्याख्या) लयतत्त्वे शिवतत्त्वे ये योजिताः ते मुक्ताः अधिकारमलस्यापि अभावात्। अपरत्र भोगाधिकारयोः न मुक्ताः किन्तु व्यक्तचिन्मात्रशक्तयः अनावृतसार्वज्ञ्यमात्राः साधिकारमला इत्यर्थः। तथा च न मुक्तित्रैविध्यमिति भावः।

(वृत्तिः) विद्यातत्त्वादनन्तभुवनादूर्ध्वं तत्त्वभुवनात्मकानि सदाशिवनिवृत्तिप्रतिष्ठाविद्याशान्ति-बिन्दुपरमशिवलक्षणानि सप्तैव क्रमेणातिशयवन्ति विमोक्षस्थानानि सन्ति। तत्र परमशिवलक्षणस्थानमेकं विहाय सर्वस्मात् भोगतत्त्वावधिबिन्दुसंज्ञकशान्त्यतीत-पर्यन्तादधस्तान्नोधृतः सप्रेर्यत्वान्न निवृत्त इति न मुक्तः। ततो दीक्षायां मायातत्वादूर्ध्वं मलविच्छेदान्तं पाशच्छेदं कृत्वा स्वान्तर्भूतशुद्धद्वित्रितत्त्वाधिकारभोगतत्त्वावलम्बिनीं तदनुरूपस्थूलसूक्ष्मरूपिणीं शिवतत्त्वाभिव्यक्तिं विधाय शिखाच्छेदरूपतिरोधशक्तिप्रेर्यत्वविच्छित्यधिकृतिपूर्वं परलक्षण-शिवत्वाभिव्यक्त्यर्थम्। तस्मात् भोगतत्त्वादुद्धृत्य लयतत्त्वे ऽ तिक्रान्तबिन्दुके परशिवलक्षणपदे ये योजितास्ते तत्सदृशपरगुणपरव्यक्त्या सम्प्राप्तसर्वेश्वरत्वान्मुक्ताः विमुक्तबन्धनाः शिवसदृशा भवन्ति। ननु-

अनाख्ये तु निरालम्बे अग्राह्ये मनवर्जिते।
निस्तत्वे योजितो मुक्त इति शास्त्रस्य निश्चयः।।

इति श्रुतेः परमुक्तिप्राप्त्यर्थं लयव्यपदेशाद्यसंस्पर्शिनि विशिष्टलक्षणशिवे योजनं कार्यं सत्यम्। अत्र श्रीमन्मतङ्ग इव शोध्यत्वेन समुदितं सर्वं भोगतत्त्वान्तः कृतमिति। तदुपरि योजिताः सर्वत्र योजिता इति न किञ्चिदसमञ्जसम्। अपरत्र च' अनतिक्रान्तबिन्दुके लये भोगाधिकारतत्त्वद्वये चस्त्वर्थः[2] ये योजितास्ते न मुक्ताः शान्त्यतीतादिभुवनगमनत्वात् प्रेर्यत्वान्न निवर्तन्त इति भावः। तर्हि ते कीदृग्रूपाः भोगाधिकारतत्त्वस्थाः शिवस्य भोगाधिकारस्थानत्वेन वक्ष्यमाणशान्त्य-तीतादिभुवनस्था। व्यक्तचिन्मात्रशक्तयः प्रकटीकृतशिवसमदृक्शक्तयः[3]। कर्तृशक्त्या क्रमतः किञ्चित् किञ्चिन्यूनभावं भजन्तीति भावः। ननु शक्तेर्निरंशत्वात् कथं चिदंशेनाभिव्यक्तिर्न क्रियांशेनेति? सत्यम्। श्रीमदनन्तादीनां शक्तयः स्थूलसूक्ष्मात्मनाभिव्यक्ता शब्दानुविद्धा सर्वार्थान्[4] दर्शयन्ति शब्दादिसापेक्षत्वात्। ज्ञानशक्तिव्यक्तिरपि न सर्वथेति सर्वमनवद्यम्।

—•—

(व्याख्या) पत्युः इयता प्रबन्धेन बिन्दुगतावस्थाभेदेन भेदमुक्त्वा भुवनोपाधिकं व्यपदेशभेदमपि लभत इत्याह-

---

१. नापरत्र] मु,क२;न परत्र- क१;
२. चस्त्वर्थः] ज२,ज३;च स. . . . र्थ- ज१; चस्त्वये-ज४
३. भोगाधिकारतत्त्वस्थाः शिवस्य भोगाधिकारस्थानत्वेन वक्ष्यमाणशान्त्यतीतादिभुवनस्था। व्यक्तचिन्मात्रशक्तयःप्रकटीकृतशिवसमदृक्शक्तयः] ज१,ज२,ज४; समदृक्शक्तयः-ज३
४. सर्वार्थान्] ज३,ज४;सर्वार्थं-ज१,ज२;

(वृत्तिः) सूचितं भुवनाधिष्ठातृत्वेनापि भिन्नव्यपदेशं विस्पष्टं विनिवेदयति –

बिन्दुनैव हि भिन्नोऽयं भक्तस्तु भुवनैरपि।।५२।।

(व्याख्या) बिन्दुना बिन्दुगतलयाद्यवस्थाविशेषेणेत्यर्थः। भिन्नः व्यपदेशभेदवान् भक्तः विभक्तः व्यपदेशभेदवानिति यावत्। भुवनप्रयुक्तो व्यपदेशभेदः।

(वृत्तिः) बिन्दुना बिन्द्ववस्थाविशेषेण भिन्न एव भिन्नव्यपदेशं लब्धवानेवायं शिवस्तदनन्तरं भुवनैरपि विभक्तः[1] प्रतिभुवनमधिष्ठातृतया तदनुगुणभिन्नव्यपदेशं लभते।

—•—

(व्याख्या) तानि भुवनानि क्रमेणोद्दिशन् तत्प्रयुक्तं संज्ञाभेदं पत्यौ दर्शयति–

शान्त्यतीता च शान्तिश्च[2] विद्यास्थितिनिवृत्तयः।

(व्याख्या) एषु भुवनेषु उपाधिषु तत्तदधिष्ठात्रीशानादिशक्तियोगात् शिवः यथाक्रममीशानादिसंज्ञाः लभते।

(वृत्तिः) तद्भुवनानि च महाप्रलयानन्तरं सर्गारम्भे क्रमिकगलनबिन्दूपाधिकोद्युक्तावस्थेन क्रमिककार्यप्रयोगदशात्माधिकारावस्थोपरूढेन[3] विचित्रसर्गनिर्माणाधिकारं निर्वर्तयता भगवता प्रथमं बिन्दौ शब्दसृष्टौ नाद इव निर्मितं शान्त्यतीताशान्त्यतीतभुवनं स्वान्तर्भूतस्वोर्ध्ववतह्लन्धिकादिभुवनं शान्त्यतीतारूपपरबिन्दोः शक्तिरूपत्वेन स पुनरमूर्तिमान् निःसन्निवेशनिर्मितिमान्[4] इति भुवनाधारत्वायोगात् तत्कार्यशान्तिमस्तकस्थम् अत एव लयतत्त्वसंज्ञितं यद्यपि भोगतत्त्वसंज्ञितं सत् भोगतत्त्वान्तर्भूतमीशानभुवनम् इत्यपि प्रसिद्धम्। शान्तिर्विद्यास्थितिनिवृत्तयः। स्थितिप्रतिष्ठा-शान्त्यादीनि चत्वारि भुवनानि शान्त्यादिकलाचतुष्टयं शिवस्य भोगस्थानं शक्तितत्त्वमिति तन्त्रान्तरे प्रसिद्धत्वात् शक्तितत्त्वभुवनान्युच्यन्ते। अत्र तु शिवतत्त्वान्तर्भूततया शक्तितत्त्वस्य दर्शनमिति ज्ञेयम्।

—•—

(वृत्तिः) तत्र शिवस्य संज्ञाभेदं दर्शयति–

भुवनानि महान्त्येषु संज्ञाः पञ्च लभेच्छिवः।।५३।।
ईशानपुरुषाघोरवामजातात्मिकाः[5] क्रमात्।
एताः सदाशिवावस्था भोगस्याननपञ्चकाः।।५४।।

---

१. विभक्तः] ज१; भक्तः- ज२,ज३,ज४
२. शान्त्यतीता च शान्तिश्च] मु,क२;शान्त्यतीतादिशान्तिश्च- क१;
३. क्रमिककार्यप्रयोगदशात्माधिकारावस्थोपरूढेन] ज१,ज२; क्रमिककार्यप्रयोगतः दशात्माधिकारावरूढेन- ज२; क्रमिककार्यप्रयोगदशात्माधिकारावस्थेनोपारूढेन- ज४
४. पुनरमूर्तिमान् निःसन्निवेशनिर्मितिमान्] ज३,ज४;पुनरमुक्तिमां निस्सन्निवेशनिर्मिमोनि- ज१; पुनरमूर्तिमाभिस्सन्निवेशनिर्मितिमान्- ज२;
५. ईशानपुरुषाघोरवामजातात्मिकाः] मु,क२;ईशानपुरुषाघोरवामजातादिकाः- क१;

(व्याख्या) पुरुषः तत्पुरुषः जातः सद्योजातः। उक्तानामेवेशानादिशक्तीनां सदाशिवावस्थायामाननपञ्चकात्मकत्वमपि आह- एता इति। यद्वा संज्ञाः पञ्च लभेत् शिव इत्यत्र तद्वानीशः तिसृष्वपीति वचनानुसारेण तत्तदुपाधिकाः शान्त्यतीता शान्तिः[१] इत्येवमादिकाः पञ्चसंज्ञाः लभेत् शिव इत्यर्थः। ईशानेत्यादिकमुत्तरत्रैव योज्यम्।

(वृत्तिः) एतदभिधानानि भुवनानि महान्ति उपरितनभुवनोपरिवर्तित्वात् एषु पञ्चस्वधिष्ठातृतया शिवः संज्ञाः क्रमादीशानाद्यात्मिकाः पञ्च लभेत्। एता एतत्संज्ञितशक्तिव्यापृतिलक्षणेशानादिमूर्तयः सदाशिवावस्थाः सदाशिवस्य सादाख्यतत्त्वाधिष्ठातुरीशानादिमूर्तिसमष्टिरूपस्य[२] शिवस्यावस्थाः व्यष्टिरूपतयावस्थितयः। स एव भोगसंज्ञितः[३] शान्त्यतीतादिप्राप्तिकामैरीशानमूर्त्याद्याकारतया ध्यातव्यः फलप्रदो भवति। अत एव ताः भोगस्य व्यष्टिरूपस्य शान्त्यतीतादिभुवनाधिष्ठातुः[४] शिवस्याननपञ्चकाः।

—•—

(व्याख्या) भोगस्य सदाशिवस्य क्रमात् ऊर्ध्वमारभ्य[५] आननानां पञ्चकं यासां ताः तथोक्ताः। तासामेव शक्तीनां सदाशिवमूर्तिशिरोवक्त्रादिरूपत्वं[६] वक्तुं प्रथमतः सदाशिव-मूर्तिरूपम्[७] आह-

(वृत्तिः) सादाशिवीं समष्टिरूपां तां तनुमेव कार्यं शरीरयुक्तेन कर्त्रा व्याप्तमित्यभ्युपगमे ऽ पि[८] क्लृप्तशाक्ततनुरस्तीति दर्शयन् वर्णयति -

पञ्चमूर्तिमयी शुभ्रा नित्या सकलनिष्कला।
मूर्तिः सादाशिवी ज्ञेया सर्वकार्यप्रवर्तिका।।५५।।

(व्याख्या) ईशानादिपञ्चमूर्तिमयी शुभ्रा निर्मला अस्मदादिशरीरवत् जन्येति भ्रमं[९] व्यावर्तयतिनित्येति। सकलनिष्कलत्वं[१०] च पूर्वमेवोपपादितम्।

(वृत्तिः) पञ्चमूर्तिमयी ईशानादिपञ्चमन्त्रमूर्तिरूपा शुभ्रा धवलाकारतयोपास्या नित्या परमार्थतो नाशरहिता क्लृप्ताकारत्वान्मूर्तेः क्लृप्तरूपोपसंहृतिः श्रीमन्मतङ्गादौ वर्णिता। सकलनिष्कला

१. शान्त्यतीता शान्तिः] क१,मु;शान्त्यतीतःशान्तः-क२
२. एतत्संज्ञितशक्तिव्यापृतिलक्षणेशानादिमूर्तयः सदाशिवावस्थाः सदाशिवस्य सादाख्यतत्त्वाधिष्ठातुरीशानादिमूर्तिसमष्टिरूपस्य] ज१,ज३,ज४; एतत्संज्ञितशक्तिव्यापृतिलक्षणेशानादिमूर्तिसमष्टिरूपस्य-ज२
३. भोगसंज्ञितः] ज१; तत्र भोगसंज्ञितः- ज२,ज३,ज४
४. व्यष्टिरूपस्य शान्त्यतीतादिभुवनाधिष्ठातुः] ज२,ज३,ज४;व्यष्टिरूपशान्त्यतीतादिभुवनाधिष्ठातुः- ज१;
५. ऊर्ध्वमारभ्य] मु;प्रागारभ्य- क१,क२;
६. सदाशिवमूर्तिशिरोवक्त्रादिरूपत्वं] मु;सदाशिवमूर्तिस्वरूपत्वमपि- क१,क२;
७. सदाशिवमूर्तिरूपम्] क१; सदाशिवमूर्तिस्वरूपम्- मु,क२
८. शरीरयुक्तेन कर्त्रा व्याप्तमित्यभ्युपगमेऽपि] ज३;शरीरयुक्ते ननु कर्तृव्याप्तमिति अभ्युपगमे ऽ पि- ज१; शरीरव्याप्तमित्यभ्युपगमे ऽ पि- ज२; शरीरयुक्तेन कर्तृव्याप्तमित्युपगमेऽपि-ज४
९. जन्येति भ्रमं] क१,क२; जन्यभ्रमं- मु
१०. सकलनिष्कलत्वं] मु,क२;सकलनिष्कलं- क१

तदधस्तनकार्योद्युक्तत्वात्। अत एव समष्टिरूपाधिकारो ऽ पि सदाशिवोऽत्र भोग इति वर्णित इति वक्ष्यामः। ईदृशी मूर्तिस्तनुः सादाशिवी ज्ञेया सादाख्यतत्त्वाधिष्ठातृसदाशिवभट्टारक-सम्बन्धिनीत्यवगमनीया। सा तु सर्वकार्यप्रवर्तिका निष्पत्त्यर्थं सर्वकार्यसंकघ्प्तमिति[१]।

—•—

(वृत्तिः) पञ्चमूर्तिमयत्वं विस्पष्टं दर्शयति -

ईशानशेखरी सा च पुंवक्त्राघोरहृत्स्थला।
वामगुह्या च सद्याङ्घ्री हारिणी जननी तथा।।५६।।
रोधयित्रीति तिसृभिः शक्तिभिः कल्पितेन्द्रिया।

(व्याख्या) अस्याः शक्तेः कीदृग्रूपावयवत्वम् इत्याकाङ्क्षायाम् आह- ईशानेति। ईशानमूर्तिः शेखरं[२] यस्याः सा ईशानशेखरी। पुमान् तत्पुरुषः वक्त्रं यस्याः सा तथोक्ता। एवमुत्तरत्रापि द्रष्टव्यम्। तदुक्तं ब्रह्मशम्भुभिः -

शान्त्यतीतकलामूर्धा[३] शान्तिवक्त्रसरोरुहा।
विद्याविततवक्षोंसा प्रतिष्ठागुह्यमण्डला।

निवृत्तिजानुजङ्घाङ्घ्रिः इति। अत्र कलावाचिभिः शब्दैः तदधिष्ठात्र्य ईशानादिशक्तयो[४] ऽभिधीयन्ते। एकस्या एव शक्तेरधिष्ठेयभेदादीशानादिपञ्चविधत्वम्[५]। तदुक्तं रत्नत्रये -

कार्यभेदादधिष्ठानवशादेकैव पञ्चधा।
सा भाति बिन्दुशान्त्यादिपञ्चाधिष्ठेयगोचरा।। इति।

अत्र बिन्दुशब्देन शान्त्यतीतकलोच्यत इति द्रष्टव्यम्। ईशानादीनां मूर्धादिपरिकल्पना[६] च उपर्यधोभावेन अवहितशान्त्यतीतादिकलापञ्चकाधिष्ठेयकत्वात्[७] कैश्चित्[८] उपासकैः मूर्धादिभावेन[९] ताः परिकल्पिता इति ईशानादिषु मूर्धाद्यवयवव्यपदेशं[१०] वर्णयन्ति। देहात्मिकाः शक्तीरुक्त्वा[११]

१. सर्वकार्यप्रवर्तिका निष्पत्त्यर्थं सर्वकार्यसंकघ्प्तमिति] ज२,ज३,ज४;सर्वकार्यप्रवर्तकनिष्पत्त्यर्थं सर्वकार्यसंक्षिप्तिमती- ज१
२. ईशानमूर्तिः शेखरं] मु;ईशानीमूर्तिशेखरं- क१,क२;
३. शान्त्यतीतकलामूर्धा] मु,क२;शान्त्यतीतकलामूर्त्या- क१;
४. तदधिष्ठात्र्य ईशानादिशक्तयः] क२;तदधिष्ठात्रीशानादिशक्तयः- क१; तत्तदधिष्ठात्र्य ईशानादिशक्तयः- मु;
५. शक्तेरधिष्ठेयभेदादीशानादिपञ्चविधत्वम्] मु,क२;शक्तेरधिष्ठेयभेदादिपञ्चविधत्वम्- क१;
६. मूर्धादिपरिकल्पना] मु,क२;मूर्त्यादिपरिकल्पना- क१;
७. अवहितशान्त्यतीतादिकलापञ्चकाधिष्ठेयकत्वात्] मु; अविहितशान्त्यादिकलापञ्चाधिष्ठायकत्वात्- क१; अवहितशान्त्यादिकलापञ्चाधिष्ठायकत्वात्- क२
८. कैश्चित्] क१; केचित्तु- मु,क२
९. मूर्धादिभावेन] मु,क२;मूर्त्यादिभावेन- क१
१०. मूर्धाद्यवयवव्यपदेशं] मु,क२;मूर्त्याद्यवयवव्यपदेशं- क१;
११. देहात्मिकाः शक्तीरुक्त्वा] मु,क२;देहात्मिका शक्तिरुक्ता- क१;

करणात्मिकाः शक्तीराहहारिणीत्यादिना। हरति संसारमिति हारिणी। जनयतीति जननी रोधयतीति रोधयित्री। एताभिः तिसृभिः शक्तिभिः कल्पितानि इन्द्रियाणि यस्याः सा सादाशिवी मूर्तिरिति पूर्वेणान्वयः।

(वृत्तिः) समासार्थसमर्थनमुत्तरत्र क्रियते। ईशानाद्यात्मस्थूलकार्यतनुः[१] हारिणीजननी-रोधयित्रीती तिसृभिः शक्तिभिः कल्पितानि उपलक्षणतया बुद्ध्यादिसहितेन्द्रियाणि यस्याः सा कल्पितेन्द्रिया कल्पितसूक्ष्मकरणतनुयुक्ता। ईशानप्रमुखाष्टशक्तीनां क्रियाशक्तिप्रसरस्वरूपत्वात्[२] ज्ञानशक्तिः क्रियाशक्तिः इच्छाशक्तिः तिरोधानशक्तिः अनुग्रहशक्तरिति प्रथितशक्तिपञ्चक-स्वरूपप्रसरा[३] विशेषात्मशक्तिलक्षणसदाशिवचौतन्यव्यक्तिमती च।

—•—

(व्याख्या) ननु ईश्वरस्य अनन्तशक्तिमत्वे ताः सर्वाः शक्तयः किमिति न निरूप्यन्ते इत्याशङ्क्याह–

(वृत्तिः) शिवस्यानन्तशक्तित्वात् किं केवलमासामुपवर्णनामिति नाशङ्कनीयमित्याह –

अष्टावेता यशस्विन्यः ईशानाद्यास्तु शूलिनः।। ५७।।

(व्याख्या) अनन्तशक्तीनां मध्ये एतासामन्तरङ्गत्वात् सर्वकार्यप्रवर्तकत्वेन प्रसिद्धत्वाच्च निरूपणमिति भावः।

(वृत्तिः) हे द्विजाः त्रिशूलिनः शिवस्य एताः ईशानाद्या[४] अष्टौ यशस्विन्यः सर्वकार्यसमुत्पादनक्षमत्वात् कीर्तिमत्यः ततस्तन्मात्रोपवर्णनम्[५] इत्याशयः।

—•—

(व्याख्या) ईशानादिशक्तीनां तत्तत्कृत्यप्रदर्शनद्वारा[६] मूर्धादिविभागकल्पनम्[७] आह–

आसां वीर्यं विभागं च स्वरूपेणोच्यते द्विजाः।

(व्याख्या) आसाम् ईशानादिशक्तीनां वीर्यं तत्तज्जननसामर्थ्यं[८] विभागं तत्तत्कृत्योपाधिद्वारा विभागः नपुंसकत्वं छान्दसम्[९]।

---

१. ईशानाद्यात्मस्थूलकार्यतनुः] ज२,ज४;ईशानाद्यात्मा स्थूलकार्यतनुः- ज१,ज३
२. ईशानप्रमुखाष्टशक्तीनां क्रियाशक्तिप्रसरस्वरूपत्वात्] ज१,ज३; ईशानीप्रमुखाष्टशक्तीनां क्रियाशक्तिप्रसर .... रूपत्वात्- ज२,ज४
३. प्रथितशक्तिपञ्चकस्वरूपप्रसरा] ज२,ज३,ज४;प्रथितशक्तिपञ्चकस्वरूपस्य प्रसरा- ज१; प्रथितशक्तिपञ्चकस्वरूपप्रसरा- ज२,ज३,ज४
४. ईशानाद्या] ज१; ईशान्याद्या- ज२,ज३,ज४
५. ततस्तन्मात्रोपवर्णनम्] ज३,ज४;तत्तत्तन्मात्रोपवर्णनम्-ज१,ज२;
६. तत्तत्कृत्यप्रदर्शनद्वारा] मु,क२;तत्कृत्यप्रदर्शनद्वारा- क१;
७. मूर्धादिविभागकल्पनम्] मु;मूर्त्यादिकल्पनम्- क१; मूर्धादिविकल्पनाम्-क२
८. तत्तज्जनकसामर्थ्यं] मु;तज्जननसामर्थ्यं- क१,क२;
९. नपुंसकत्वं छान्दसम्- क१,क२; वाक्यमिदं मु कोशे न दृश्यते।

(वृत्तिः) आसां शक्तीनां वीर्यं सामर्थ्यं तद्भेदेन कार्यविभागश्च स्वरूपेणोच्यते स्वभावतः कथ्यते।

—•—

(वृत्तिः) क्रमतो वदति –

ईशानी परमा काष्ठा शेखरत्वेन कल्पिता।।५८।।
जगत्पूरणहेतुत्वात् बिन्दोर्नादादिवृत्तिभिः।
वेण साम्यतस्तस्य पुमान् वक्रमितीर्यते।।५९।।
घोरो मलादिसंसारः तद्विरोधितया[१] विभुः।
अघोर इति विख्यातः सद्भावोऽयं स्वलक्षणः[२]।।६०।।
हृदयं चापि सद्भावो यस्मात् तस्मात् तदेव हि।
वामस्य तु रहस्यत्वात् सूक्ष्मत्वात् दृक्क्रियात्मकः।।६१।।
कर्ता विश्वस्य पुत्रादिकार्येषु जननं[३] यतः।
वामो गुह्यस्ततश्चायं शास्त्रेऽस्मिन् सम्मतो बुधाः।।६२।।
सर्गेच्छामात्रतः[४] तस्य स्वशक्तिप्रसरात्मिकाम्।
मूर्तिमासादयेद्यस्मात् सद्योमूर्तिस्ततः स्मृतः।।६३।।

(व्याख्या) परमा काष्ठेति विश्वाधिष्ठानुरूपसर्वाक्रमणहेतुत्वात्[५] इति भावः। अस्मिन्नर्थे अथर्वशिरःश्रुतिरपि। शेखरत्वेन शिरस्त्वेन बिन्दोः कुण्डलिन्याः नादादिवृत्तिभिः[६] जगत्पूरणहेतुत्वात् पुरुषस्य वक्रसाम्यात् वक्रत्वेन कल्पना[७]। सद्भाव इति[८] समीचीनो भावः सद्भावः तत्र हेतुः सलक्षण इति दुःखरूपसंसारनिवर्तकत्वरूपलक्षणसहितत्वादिति भावः। तस्य हृदयत्वव्यपदेशे हेतुम्[९] आह– हृदयं चापीति। वामदेवस्य गुणसाम्यपुरःसरं गुह्यत्वमाहवामोऽस्येति[१०]। सूक्ष्मत्वे हेतुमाहदृक्क्रियात्मक इत्यादिना। सद्यशब्दार्थमाह–स्वस्येच्छेति। सूक्ष्मत्वे हेतुमाह– दृक्क्रियात्मक इत्यादिना। इच्छामात्रतः न तु कारणान्तरमपेक्ष्य। तस्यैव मूर्तिव्यपदेशे निमित्तमाह– मूर्तिमासादयेदिति।

---

१. तद्विरोधितया] क१,क२; तद्विशोधयिता– मु
२. स्वलक्षणः] क२;सलक्षणम्– क१; सलक्षणः–मु
३. जनकं] मु;जननं– क१,क२;
४. सर्गेच्छामात्रतः] क२;स्वर्गेच्छामात्रतः– क१; स्वस्येच्छामात्रतः– मु;
५. विश्वाधिष्ठानरूपसर्वाक्रमणहेतुत्वात्] क२;विश्वाधिष्ठानुरूपा सर्वाक्रमणहेतुत्वात्– क१; विश्वाधिष्ठानुरूपसर्वातिक्रमणहेतुत्वात्– मु
६. नादादिवृत्तिभिः] क१; नादादिवृत्तिभिः सूक्ष्मादिवृत्तिभिः– मु,क२
७. कल्पना] मु,क२;कल्पना स्यात्– क१;
८. सद्भाव इति] मु,क२;भाव इति– क१;
९. हृदयत्वव्यपदेशे हेतुम्] मु;हृदयव्यपदेशे हेतुम्– क१; हृदयव्यपदेशहेतुम्– क२
१०. गुह्यत्वमाह–वामोऽस्येति। सूक्ष्मत्वे हेतुमाह–दृक्क्रियात्मक इत्यादिना। सद्यशब्दार्थमाह–स्वस्येच्छेति।, मु;गुह्यत्वमाह–स्वर्गेति– क१; गुह्यत्वमाह–वामोऽस्येति।... सद्यःशब्दार्थमाह–स्वेच्छेति।– क२

(वृत्तिः) ईशानी अनुग्रहकरी शिवलक्षणोर्ध्वपदे अनुग्राह्यं शिष्यं योजयति। परमा उन्नतियुक्ता काष्ठा निरतिशया उत्तमाङ्गवत् सर्वोर्ध्वस्थितत्वात् शेखरत्वेन मूर्धत्वेन कल्पिता। ईशान्यात्मा ईशानो नृत्तगुरुद्विमूर्तितयाप्यभिध्यायमानोऽत्र शेखरं यस्याः सा सादाशिवी मूर्तिः। ईशानशेखरी बिन्दोर्नादादिवृत्तिभिः। तन्त्रोत्पत्तिपटले वक्ष्यमाणनादादयो वृत्तयो येषां ते नादादिवृत्तयः। शास्त्रपदवाक्यात्मविप्रुट् प्रसराः तैः शास्यशासकात्मकतया कालाग्न्याद्यनाश्रितान्तमखिल-जगदापूरयन्ती पूरणी नाम शक्तिः तिरोभावकरी। तदात्मको मन्त्रस्ताभिः[१] जगत्पूरणहेतुत्वात् पुमानित्युच्यते। अनेकार्थत्वाद् धातूनां पुञ्पवन इति धातुः पूरणार्थोऽपि वर्तते। पुंसाम् अज्ञाननिचयं पुनातीति वा पुमान् तस्य पुंसो वचनहेतुत्वात् वेणास्येन साम्यतः तुल्यत्वात् वक्रमितीर्यते वक्रमित्युच्यते। पुमान् पूरणहेतुभूतः वक्रं वचनहेतुलक्षणं यस्याः सा सादाशिवी तनुः पुंवक्रा। घोरः मलादिसंसारः मलहेतुभूतरागद्वेषादिसंसारः तद्विरोधितया तद्व्युदासित्वेन विभुः या संहारकरी हादह्लनामशक्तिः तल्लक्षणो मन्त्रः अघोर इति विख्यातः। अयं शान्तलक्षण स्वलक्षणः। सद्भावः परमार्थः हृदयं चापि लोकप्रसिद्ध्या सद्भावः परमार्थः कथ्यते यस्मात् तस्माद् अघोरस्तदेव हृदयमेव हि। अघोरः शान्तस्वभावः हृत्स्थलं परमार्थलक्षणं यस्याः सा सादाशिवी मूर्तिः अघोरहृत्स्थला। दृक्क्रियात्मकः वामः या सूक्ष्मदेहात्मिका वक्ष्यमाणत्रिकृत्यकरी[२]। स्थूलदेहात्मिका स्थितिमात्रकरी वामानामशक्तिः। तल्लक्षणः अस्य वामनाममन्त्रस्य वामशब्दस्य विलक्षणोक्त्या विलक्षणतया प्राण्यदृष्टपूर्वविलक्षणाङ्गस्येव रहस्यत्वात् गुह्यत्वात् सूक्ष्मत्वादप्रत्यक्षत्वात् विश्वस्य कर्ता जनिता। स तु पुत्रादिकार्यदर्शनात्[३] प्राण्यदृष्टपूर्वविलक्षणाङ्गमिव विश्वलक्षणकार्यदर्शनादनुमीयते इति भावः। यतो यस्मात् कारणात् *पुत्रादिकार्येषु[४] जन्यतेऽनेनेति जननम्। प्राण्यङ्गभूतसाधनं गुह्यशब्दवाच्यं प्रसिद्धम्। ततस्तस्मादयं वामो विश्वकार्यसाधनभूतः। शास्त्रे ऽ स्मिन्नस्मिच्छिवदर्शने हे बुधाः गुह्यः गुह्यशब्दवाच्य इति सम्मितः सम्यगनुमितः। वामो विलक्षणो गुह्यं जगज्जननलक्षणं यस्याः सा सादाशिवी मूर्त्तिर्वामगुह्या। सर्गेच्छामात्रतः सृष्ट्यारम्भं कुर्म इति चिन्तनानतिक्रमेण तस्याधिकारमनुप्रविशतः शिवस्य स्वशक्तिप्रसरात्मिकाम्। स्वकीया सृष्टिकरी मूर्तिनामशक्तिः तस्याः प्रसराः तदुत्थाः[५] कलाः सिद्ध्यादयः तदात्मिकां मूर्तिं सदाशिवतत्त्वाधिष्ठातृरूपपञ्च-वक्त्रत्रिपञ्चदृगात्मकशरीरावयवम् आसादयेत् प्राप्नुयात् परात् समभिव्यक्तस्तदवयवस्वरूपी स्यात्। ततः स मन्त्रः सद्योमूर्तिः स्मृतः। सद्यः सद्योमूर्तिः अङ्गम् अवयवः यस्याः सा सादाशिवीमूर्तिः सद्याङ्गी।

—•—

---

१. मन्त्रस्ताभिः, ज१,ज२; मन्त्रशक्तिभिः-ज३;मन्त्रस्तैः-ज४

२. वक्ष्यमाणत्रिकृत्यकरी] ज१,ज३,ज४; वक्ष्यमाणकृतिकृत्यकरी-ज२

३. प्राण्यदृष्टपूर्वविलक्षणाङ्गस्येव रहस्यत्वात् ... पुत्रादिकार्यदर्शनात् -ज१,ज२,ज४; अयं भागः ज३ कोशे नास्ति।

४. इतः परं ज२ कोशे ग्रन्थो लुप्तः। परं "कार्यं च करणीयं तु गुणसंकल्पसंस्कृतिः इत्यस्य पूर्वतनश्लोकस्य ३६ तमपृष्ठे त्यक्तस्य व्याख्यानं पुनरारब्धम्।

५. तदुत्थाः] ज४;तदर्थाः-ज१,ज३

(व्याख्या) शिवस्य मन्त्रशरीरत्वप्रसिद्धिरपि एताभिरेवेत्याह–

(वृत्तिः) उपसंहरति –

एवं मन्त्रास्तु पञ्चैते तैर्निबद्धा[1] तनुः शिवा।
वस्तुतस्तु न भिन्नास्ते यतो नान्ये स्वशक्तितः।। ६४।।

(व्याख्या) स्वशक्तितः शिवशक्तितः[2] इत्यर्थः। एवं च शक्तिरिति मन्त्र इति च[3] व्यपदेशमात्रभेदो न वस्तुभेद इत्यर्थः।

(वृत्तिः) एवमित्थमेते पञ्चमन्त्राः तनुः[4] ईशानादिभिः शिवा शुद्धा तनुः सादाशिवी मूर्तिरुक्तप्रकारेण निबद्धा घटिता। ते मन्त्रशब्दशब्दिताः वस्तुतः स्वभावतः विद्यातत्त्वनिवासिन इव ततः शिवान्न भिन्नाः यतः यस्मात् कारणात् स्वशक्तितः तत्प्रसरात्मकत्वात् नान्ये नेतरे भवन्ति।

—•—

(व्याख्या) पञ्चब्रह्ममन्त्रवत् अन्येऽपि षडात्मकाः[5] शक्तिरूपा मन्त्राः सन्तीति नामतो दर्शयति[6]–

(वृत्तिः) पुनरपि मन्त्राः सन्तीत्याह–

अन्तरङ्गास्तथा चान्ये मन्त्राः सन्ति शिवात्मिकाः।
हृच्छिरश्चूलिका[7] वर्मलोचनास्त्राणि नामतः।। ६५।।

(व्याख्या) अन्तरङ्गाः[8] आवश्यकाः न तु वक्ष्यमाणवत् बहिरङ्गा इत्यर्थः। तदेव नामतो दर्शयति[9] हृदिति। हृत्[10] हृदयं तेन हृदयाय नम इति मन्त्रो लक्षितः[11]। शिरः शिरःशब्देन शिरसे स्वाहेति मन्त्रो विवक्षितः चूलिका तेन शिखायै वषडिति मन्त्रो विवक्षितः[12]। वर्म कवचं तेन कवचाय हुमिति मन्त्रोऽभिप्रेतः लोचनानि लोचनशब्देन नेत्रत्रयाय वौषडिति मन्त्रो लक्षितः। अस्त्रम् अस्त्राय फडिति मन्त्रो लक्ष्यते। नामत इति षडङ्गानां हृदयं शिरः शिखा कवचं नेत्रं अस्त्रम् इति नामानीत्यर्थः।

---

१. तैर्निबद्धा]ज१,ज३;यैर्निबद्धा-ज४
२. स्वशक्तितः शिवशक्तितः] मु;शिवशक्तितः- क१क२;
३. शक्तिरिति मन्त्र इति च] मु;शक्तिमन्त्र इति- क१, क२;
४. तनुः] ज१,ज२; तैः-ज३,ज४
५. षडात्मकाः- क१; षडङ्गात्मकाः-मु, क२
६. नामतो दर्शयति] क१, क२; आह- मु
७. चूलिका] मु, क२;श्रषका खशिखा,- क१;
८. अन्तरङ्गाः] क१, क२; अन्तरङ्गाः इति अन्तरङ्गाः - मु
९. इत्यर्थः तदेव नामतो दर्शयति] मु;इत्यर्थः- क१, क२;
१०. हृत्- क१, क२; हृदिति हृत्- मु
११. लक्षितः, क१; लक्ष्यते- मु, क२
१२. विवक्षितः] क१,क२; लक्षितः- मु

(वृत्तिः) तथा ईशानादिवन्न[१] बहिरङ्गाः। किन्तु तत्स्थानेष्वन्तरङ्गाः। *सदाशिवतन्वन्तरित-क्लृप्तिमन्तः[२] शिवात्मकाः शिवशक्तिप्रसरस्वरूपाः अन्ये मन्त्राः सन्ति। तन्नामानि दर्शितवान् हृदित्यादिना।

—•—

(व्याख्या) हृदयादिमन्त्राणां तत्तद्व्यपदेशे प्रवृत्तिनिमित्तमाह–

(वृत्तिः) हृदित्यादिशब्दार्थमाह–

सद्भावो हृदयं तस्य शिरः सर्वोच्छ्रितो गुणः[३]।
वशित्वमपराधीनं या शिखा सोपरि स्थिता।। ६६ ।।

स्वभावगुप्तमन्येषां समर्थमपि गोपने।
तेजः कवचसाधर्म्यात् तन्नाम्ना व्यपदिश्यते।। ६७ ।।

सर्वज्ञताया यद्बीजं यतस्तेन[४] निरीक्षणम्।
योऽसावप्रसहः शम्भोः प्रतापो हेतिरुच्यते।। ६८ ।।

(व्याख्या) तस्य सदाशिवस्य सद्भावः संश्चासौ भावश्च[५] सद्भावः। इदं च हृदयशब्दव्यपदेश्यत्वे निमित्तम्। शिरःशब्दव्यपदेश्यत्वे निमित्तमाहशिर इति। यतः तस्य सर्वोच्छ्रितो गुणः अतः शिरोमन्त्रस्य शिरःशब्दव्यपदेश्यत्वमित्यर्थः। शिखामन्त्रस्य शिखाशब्दव्यपदेश्यत्वे हेतुमाहउपरिस्थितेति। उपरिस्थितत्वे हेतुः वशित्वमपराधीनमिति। कवचमन्त्रस्य कवच-शब्दव्यपदेश्यत्वे[६] निमित्तमाहस्वभावगुप्तमिति। स्वभावगुप्तं सदन्येषां गोपने रक्षणे समर्थं यत्तेजः तत् कवचसाधर्म्यात् वर्मेति व्यपदिश्यते। नेत्रमन्त्रस्य नेत्रशब्दव्यपदेश्यत्वे हेतुमाहसर्वज्ञताया इति। यस्मात् कारणात् सर्वज्ञताया बीजं यतः तेन निरीक्षणं च ततः तन्नेत्रव्यपदेश्यमित्यर्थः। अस्त्रमन्त्रस्य अस्त्रशब्दव्यपदेश्यत्वे हेतुमाह– योऽसाविति। शम्भोरप्रसहः अन्यैः सोढुमशक्यः प्रतापः हेतिरिति[७] उच्यते अस्त्रमन्त्रमिति व्यपदिश्यते।

(वृत्तिः) तस्य पञ्चमन्त्रतनोः शिवस्य हृदयं सद्भावः। परमार्थलक्षणं शिरः सर्वोच्छ्रितो गुणः[८]। सर्वोपरिवर्तिस्वधर्मः यद्वशित्वं चिदचित्प्रेरकत्वम् अत एवापराधीनं स्वातन्त्र्यलक्षणं सोपरि

---

१. ईशानादिवन्न] ज२,ज३;ईशानादिपञ्च- ज१
२. सदाशिवतन्वन्तरितकर्घप्तिमन्तः- ज१,ज४; 'सदाशिव . . . कारणात् सा परमा' पर्यन्तं ग्रन्थभागः ज२ मातृकायां न विद्यते।
३. सर्वोच्छ्रितो गुणः] मु;सर्वोच्छ्रिता गुणाः- क१; सर्वोच्छ्रयो गुणः-क२
४. यतस्तेन निरीक्षणम्] सम्पादकीयः पाठः;यत्नतस्तेन- क१ (छन्दोभङ्गः); ततस्तेन- मु;यत्ततस्ते निरीक्षणम्-क२
५. भावश्च] क१,क२; भावश्चेति- मु
६. कवचशब्दव्यपदेश्यत्वे] मु,क२;व्यपदेश्यत्वे- क१;
७. हेतिरिति] मु;हेतिः- क१,क२;
८. सर्वोच्छ्रितो गुणः] ज४;सर्वोच्छ्रिता गुणाः-ज१,ज३;

स्थिता। शिखा यत् तेजस्वभावः गुप्तम्। स्वकीयभावेन महिम्ना सापेक्षरहितेन रक्षितम्। न केवलं तन्मात्रमन्येषां चिदचिल्लक्षणानां गोपने ऽपि समर्थं शक्तं तत् तेजः कवचसाधर्म्यात् वर्मसादृश्यात् तन्नाम्ना व्यपदिश्यते कवचमित्युच्यते। सर्वज्ञतायाः षड्गुणमध्यपठितायाः बीजं हेतुभूतं ज्ञानशक्तिप्रसरं नेत्रशब्दशब्दितं तेजः। यद्यस्मात् कारणात् ततस्तेन तेजसा निरीक्षणं भगवतः सर्वार्थावलोकनम्। यो ऽसावप्रसहः सोढुमशक्यः प्रतापः। चिदचिज्जातं भोग्यसापेक्षः। प्रकर्षेण तदनपह्नवनीयतया प्रतप्यते ऽनेनेति प्रतापः। तत् तेजः शम्भोः शिवस्य हेतिरुच्यते अस्त्रमिति निगम्यते।

—•—

(व्याख्या) वशित्वमपराधीनमित्यत्र यदैश्वर्यमुक्तम् ईशानी परमा काष्ठेत्यत्र यत् परमकाष्ठारूपत्वमुक्तं तयोरर्थभेदम्[१] अनूद्याभिधत्ते–

(वृत्तिः) देहवर्मास्त्रधृतिमतामैश्वर्यं दृष्टं किमस्य तदित्यत आह –

ऐश्वर्यं परमा काष्ठा नैजो गुण इतीष्यते।
यस्मात् सा परमा काष्ठा व्याप्त्युत्कर्षात्मको गुणः।। ६९।।

(व्याख्या) ऐश्वर्यं परमा काष्ठेति[२] शिवस्य यन्नैजगुणद्वयमिष्टं तत्र परमा काष्ठा सकल-जगत्तत्वाभिव्याप्तिः। ऐश्वर्यं नाम जीवजडवर्गस्वामित्वम्।

(वृत्तिः) ऐश्वर्यमस्य परमा काष्ठा परमोन्नतिभूता काष्ठा निरतिशया। सा का परिग्रहरूपिणी किं नेत्याह नैजो गुण इतीष्यत इति। निजः गुणः न व्यतिरिक्तेत्यर्थः। कुतः यस्मात् कारणात् सा परमा * काष्ठा व्यक्त्युत्कर्षात्मको गुणः। सर्वज्ञत्वसर्वकर्तृत्वरूपशिवत्वाभिव्यक्तिनिरतिशयात्मको गुणः शिवानन्द शिवभोगशब्दशब्दितः। मुक्तशिवस्यापि स एष गुणोऽस्तीति वक्ष्यामः।

—•—

(वृत्तिः) अर्थान्तरमाह –

ऐश्वर्यं स्वामिता सर्वचिदचिद्वर्गयोः द्वयोः।
ऐश्वर्यं नात्र वशिता सा यस्मादीशितुः फलम्।। ७०।।

(व्याख्या) ऐश्वर्यशब्दस्यार्थान्तरपरत्वशङ्कां व्यावर्तयति–ऐश्वर्यं नात्रेति। तत्र हेतुमाह– सा यस्मादिति। वशित्वं[३] अणिमाद्यन्तर्गतं वशित्वम्। यस्मादैश्वर्यफलं तस्मात्[४] तदैश्वर्यं न भवतीत्यर्थः।

(वृत्तिः) अथवा पुनरैश्वर्यं सर्वचिदचिद्वर्गयोर्द्वयोः स्वामिता। चिदचिदात्मकं स्वमस्तीति स्वामित्वं[५] स्वामिता। अत्र शिवे ऐश्वर्यं न वशिता न ह्यणिमादिमध्यपठितवशिता। सा वशिता

---

१. तयोरर्थभेदम्] क१,क२; तयोरर्थम्- मु
२. परमा काष्ठेति] मु;परमकाष्ठेति- क१,क२
३. वशित्वं] मु;वशित्वं यस्मात्- क१,क२;
४. तस्मात्] क१,क२; तस्मादेव-मु
५. स्वामित्वं] ज१,ज२; स्वामी तत्त्वं-ज३,ज४

यस्मादीशितुस्तद्वशितावतः फलं स्वाह्लादनिमित्तं सापेक्षरहितस्वपरापरिपूर्तिलक्षण-परमाह्लादनिमग्नस्य भगवतश्चिदचिद्वर्गयोः स्वामिता चिदचिदनुग्रहार्थम्।

—•—

(व्याख्या) पञ्चब्रह्ममन्त्राणामिव षडङ्गमन्त्राणामपि शक्त्यात्मकत्वेन शिवाभेद इत्याह–

(वृत्तिः) एवं मन्त्रस्वरूपमुक्त्वोपसंहरति–

मन्त्रास्तु सर्व एवैते शक्तयः परमेष्ठिनः।
नित्यसिद्धाश्च ताः प्रोक्ताः शक्तस्तद्योगतः शिवः।। ७१ ।।

(व्याख्या) सर्व इति। हृदयादिमन्त्रा इत्यर्थः। ननु मन्त्राणाम् अनित्यानां[१] कथं नित्यशक्त्यभेदः शिवाभेदो वेत्यत आह दृनित्यसिद्धाश्च ताः प्रोक्ताः। इति। मन्त्राणामिवैतेषां[२] नानित्यत्वम्[३] इति भावः। निरूपितशक्तियोगादेव पत्युः शक्तत्वं न तु नैयायिकादिवत् कर्तृत्वमात्रेणेत्याह दृशक्तस्तद्योगतः शिवः इति।

(वृत्तिः) सर्व एवैते मन्त्राः पञ्चब्रह्मषडङ्गात्मकाः परमेष्ठिनः शिवस्य शक्तयः ईशान्यादिशक्त्यात्मकाः। ताश्च शक्तयः नित्यसिद्धाः प्रोक्ताः विद्यातत्त्वनिवासिन इव नेत्यर्थः। तद्योगतः ईशान्यादिशक्तिसम्बन्धात् शिवः शक्तः ईशानादिशक्तिमान्[४] भवति।

—•—

(व्याख्या) एतेषां मन्त्राणां कदा पुनः शक्तिव्यपदेश इत्याकाङ्क्षायामाह–

(वृत्तिः) सर्वदा शिवस्तदवस्थः किं नेत्याह –

यदा कार्यप्रवृत्तास्तास्तदोच्यन्ते तु शक्तयः।

(व्याख्या) कार्यप्रवृत्ता इति। कार्योद्युक्ता इत्यपि द्रष्टव्यम्। उदासीनावस्थायां तु शिवे अत्यन्तलीनत्वात् शिवस्य शक्तय इति शक्तीनां प्राधान्येन व्यवहारो नास्तीति भावः।

(वृत्तिः) यदेशान्यादयस्ताः कार्यप्रवृत्ताः कार्यप्रयोगभूमिं प्राप्ताः। तदेशानादिस्वशक्तिमद्भेदं[५] कुर्वन्त्यः शक्तय उच्यन्ते शक्तय इति निगद्यन्ते। यदोपसंहृतकार्यलक्षणस्वनिष्ठतां[६] यान्ति तदेशान्याद्याः शक्तयो ब्रह्मात्मकशरीरान्तरं भगवतः कथ्यत इति भावः।

—•—

(व्याख्या) शक्तिनिरूपणमुपसंहरति–

---

१. अनित्यानां] क२;अनुक्तानां-क१,मु;
२. मन्त्राणामिवैतेषां] क१; नित्यसिद्धाश्च ताः प्रोक्ताः इति बैन्दवमन्त्राणामिवैतेषां- मु;नित्यसिद्धाश्च ताः प्रोक्ताः इति मन्त्राणामिवैतेषां-क२
३. नानित्यत्वम्] मु,क२;नित्यत्वम्- क१;
४. ईशानादिशक्तिमान्] ज१,ज३; ईशानमूर्त्यादिशक्तिमान्- ज२,ज४
५. तदेशानादिस्वशक्तिमद्भेदं] ज१,ज२; तदेशानादिशक्तिमद्भेदं-ज३,ज४
६. यदोपसंहृतकार्यलक्षणस्वनिष्ठतां] ज१,ज२,ज४; यदोपसंहृतकार्यलक्षणा स्वनिष्ठतां-ज३

शक्तिशक्तिमतोर्भेदः प्रसङ्गादेवमीरितः।।७२।।

(व्याख्या) प्रसङ्गात् पतिनिरूपणप्रसङ्गात्।

(वृत्तिः) शक्तिशक्तिमतोर्भेदः प्रसङ्गात् सादाशिवतनूक्तिप्रसक्तप्रसङ्गादेवमित्थं कार्यभेदादीशान्यादिशक्तिभेदः तद्योगत ईशानादिशक्तिमद्भेदः ईरितः समुदितः।

—•—

(व्याख्या) एतेषां मन्त्राणां शक्त्यात्मकत्वादेव शिवाभिन्नत्वं न तु सप्तकोटिमहामन्त्राणामिवात्यन्तभेद इत्याह–

शिवेन सात्मका एते मन्त्रा भिन्नाणवो न च।

(व्याख्या) एते पञ्चब्रह्मषडङ्गमन्त्राः शिवात्मकाः शिवतादात्म्यापन्नाः। यद्वा ननु सप्तकोटिमहामन्त्राणां शरीरत्वेन तदधिष्ठातारः प्रत्येकं भिन्नाः आत्मानः सन्तीति शास्त्रस्थितिः। तथा चौतेषामपि मन्त्राणामात्मानः तद्वदेव अणव एव[१]। एवं प्रतिमन्त्रं[२] भिन्नाश्च नेत्याह – शिवेनेति। शिवेनैकेनैव सात्मकाः[३]। नाणवो नापि भिन्नास्तदात्मान इत्यर्थः।

(वृत्तिः) ये मन्त्राः शिवेन सात्मकाः शिवेन सहात्मना स्वरूपेण वर्तन्त इति सात्मकाः तादात्म्यसम्बन्धलक्षणा इत्यर्थः। शिवस्य विद्यातत्त्वनिवासिन इव ते न च भिन्नाणवः भिन्नो व्यतिरुक्तोऽणुरात्मा स्वरूपं येषां ते तथोक्ताः।

—•—

(व्याख्या) पञ्चब्रह्ममन्त्रनिरूपणप्रसङ्गेन[४] तत्सजातीयान्तरङ्गमन्त्रात्मकषडङ्गमन्त्रान् निरूप्य इदानीं पूर्वोद्दिष्टहारिण्यादिशक्तित्रयस्य तत्तच्छब्दव्यपदेश्यत्वे निमित्तमाह–

(वृत्तिः) कार्यशरीरस्वरूपशक्तीनां वीर्यविभागोक्तिं कृत्वा करणात्मिकानां तदुक्तिं तनोति–

हारिणी या शिवस्योक्ता सर्वाहरणशक्तिका।।७३।।
अथवापरसंस्थानं नयेदाहृत्य पुद्गलम्।
यस्मात् तस्मादियं शक्तिः हारिणीत्युच्यते बुधैः।।७४।।
जननी जगतो जन्मस्वभावस्यामितद्युतिः।

(व्याख्या) सर्वस्य जगतः या हरणशक्तिः[५] संहारशक्तिः सा तथोक्ता। स्वार्थे कप्रत्ययः। एवं च सर्वसंहरणसमर्था हारिणीत्युच्यत इत्यर्थः। हारिणीशब्दस्यैव निमित्तान्तरमाह–अथवेति। पुद्गलमणुं पाशेभ्यः आहृत्य परसंस्थानं मोक्षं यस्मात् नयेत् तस्मादपीत्यर्थः। जन्मस्वभावस्य जगतः अमितद्युतिः या जननी उत्पादिका सा जननीत्युच्यते। सर्वजगदुत्पादकत्वं न सम्भवतीत्यत उक्तं जन्मस्वभावस्येति।

---

१. अणव एव] मु,क२;एव- क१;
२. एवं प्रतिमन्त्रं] क१; प्रतिमन्त्रं-मु,क२
३. सात्मकाः] मु;सात्मिकाः- क१,क२
४. पञ्चब्रह्ममन्त्रनिरूपणप्रसङ्गेन] क१,क२; पञ्चब्रह्मनिरूपणप्रसङ्गेन-मु
५. हरणशक्तिः, क१; आहरणशक्तिः- मु,क२

(वृत्तिः) शिवस्य मायासर्गोपसंजिहीर्षोः या हारिणी हारिणी इत्यभिहिता सर्वाहरणशक्तिका सर्वसूक्ष्मदेहतद्धेतुकचिद्व्यक्त्यात्मभोगादिकस्याहरणम् उपसंहृतिरनन्तशक्तिद्वारा यस्याः शक्तेः सा तथोक्ता। अथवा यद्वा पुद्गलं परिपक्वमलात्मानं दीक्षाकर्मण्यभिव्यक्ता सती मायामण्डलस्थं सकलं तत्रानभिव्यक्ता सती तन्मध्यस्थं प्रलयाकलं तदुपरिस्थं विज्ञानाकलं वा शुद्धभुवनोपसंहृतिं कुर्वती सत्यकुर्वती वा ऽनन्तादीनपि समस्तान् काश्चिद्विरक्तान् वा ऽऽहृत्य शुद्धविद्याधस्त्रिपशुभिः त्रिमलातिविच्छक्तिमद्भिः[१] सह तदुपरि क्रमिकवर्तिनां तरतमाद्युपबृंहितस्थूलसूक्ष्ममलवासनोत्थाधिकारमलादिस्वोचितपाशोपसंहृतिद्वारा[२] उपर्युपरि स्वोचितसोपाधिकशिवत्वाभिव्यक्तिमधोऽधः[३] स्वानुचितसोपाधिकशिवत्वाभिव्यक्तिगलितिं च कृत्वा क्रमतः समुद्धृत्य परसंस्थानं निरुपाधिक-परशिवताभिव्यक्तिदपरशिवलक्षणपदं नयेत् गमयेत्। यस्मात् तस्मात् बुधैः शिवशास्त्रदृग्भिः सेयं शक्तिः हरसंबन्धिनी हारिणीत्युच्यते। आगमान्तरे पुनरियमेवोक्तव्यापारानुक्रमतः ज्येष्ठा रौद्रीति च द्विशब्दशब्दिता स्यात्। अथ जनन्या व्याव्यापारः। सर्गारम्भे विचित्रसर्गनिर्माणाधिकारं[४] निर्वर्तयतः शिवस्य तदुपयोगिनी अमितद्युतिः अखण्डितप्रकाशा या शक्तिः सा जन्मस्वभावस्य व्यक्तियोग्यस्य जगतः चिदचिदात्मनः साक्षाद्विचित्ररूपबिन्दुकार्याचितस्तदुपाधिकचितश्चानन्तशक्तिद्वारा मायात्मकाचितस्तदुपाधिकचितश्चाभिव्यक्तिकरी सती जनयितृसम्बन्धिनी जननीत्यभिहिता। दीक्षायामपीयं प्रतिस्थानं चिदचितोर्जननीत्यवगमनीया।

—•—

(वृत्तिः) अथ रोधयित्र्या व्यापारः-

रोधयित्र्यणुसङ्घस्य प्रलये नियमस्थितिम्।। ७५।।
भोगेष्वपि च तस्यापि विदधाति यतस्ततः।

(व्याख्या) अणुसङ्घस्य जीवसङ्घस्य प्रलये रोधयित्री स्थूलसूक्ष्मदेहद्वयवियोजनपूर्वकम् अञ्जनस्थमणिवत् स्वरूपेणावस्थानं कुर्वाणा। अपि च तस्याणुसङ्घस्य भोगेषु मलीमसेषु नियमस्थितिं हेयांशतिरोधानपूर्वकं नियमेन भुक्तिं विदधाति यतः ततो रोधयित्रीत्यर्थः।

(वृत्तिः) रोधनाय प्रसृतस्य[५] शिवस्य संबन्धिनी या शक्तिः सा अणुसंघस्य प्रलये साक्षात् प्रलयकेवलात्मनः कर्मपाकान्तं मायोदरस्वस्थाने[६] अनन्तशक्तिद्वारा स्वार्जितकर्मानुरूपतः स्थितिकाले भोगेष्वपि चाकुत्सिततया मायामण्डलस्वस्थाने दीक्षायामपि प्रतिस्थानं तस्यापि

---

१. त्रिमलातिविच्छक्तिमद्भिः] ज१,ज२,ज३;त्रिमलातिविच्छित्तिमद्भिः-ज४
२. तरतमाद्युपबृंहितस्थूलसूक्ष्ममलवासनोत्थाधिकारमलादिस्वोचितपाशोपसंहृतिद्वारा] ज३, ज४; तरतमाद्युपबृंहितस्थूलसूक्ष्ममलवासनार्थाधिकारमलादिस्वोचितपाशोपसंहृतिद्वारा-ज१,ज२;
३. स्वोचितसोपाधिकशिवत्वाभिव्यक्तिमधोऽधः] ज२,ज३,ज४;स्वोचितसोपाधिकशिवत्वाभिव्यक्तिमयोऽयं- ज१;
४. विचित्रसर्गनिर्माणाधिकारं] ज२,ज३,ज४;विचित्रसर्गे निर्माणाधिकारं- ज१;
५. प्रसृतस्य] ज२,ज३,ज४;प्रसक्तस्य- ज१;
६. मायोदरस्वस्थाने] ज२,ज३,ज४;मायोदरं स्वस्थाने- ज१;

सकलाणुसंघस्यापि पुनश्चशब्दाद्विज्ञानकेवलिनश्च साक्षान्मलपाकान्तं मायान्तस्वस्थाने[१] दीक्षायां प्रतिस्थानं शुद्धाध्वनियोजितस्य च नियमस्थितिं तिरोभावलक्षणाच्युतिस्थितिं पुनः स्थितिकाले अशुद्धाध्वन्यनन्तशक्ति-द्वारा दीक्षायां च प्रतिस्थानं साक्षाच्च शुद्धाध्वनि स्वस्वार्थक्रियात्मिकां[२] स्थितिं चार्थात् सिद्धां विदधाति करोति यतस्ततः। रोधयितृसम्बन्धिनी रोधयित्रीत्यभिहिता। जननी रोधयित्रीति इमे द्वे शक्ती आगमान्तरे सृष्टिस्थितितिरोभावत्र्यर्थक्रियावत्यौ एकरूपे सत्यौ सूक्ष्मवामदेवनाथसम्बन्धिनी वामेत्युच्येते।

—•—

(व्याख्या) उक्तानां तिसघ्णां शक्तीनां शरीरेन्द्रियकत्वं हेतुपूर्वकं स्मारयति-

(वृत्तिः) उपसंहरति -

एतास्तु शक्तयस्तिस्त्रः शरीरकरणात्मिकाः[३] ।। ७६ ।।
नित्यसिद्धा विभोर्विप्रा यत एव स्वकं बलम्।

(व्याख्या) एता उक्तरूपाः तिस्त्रः शक्तयः तु शब्दश्चार्थः। अन्याश्चेशान्यादिशक्तय इत्यर्थः। विभोः शिवस्य शरीरं करणानि तदात्मकानि[४] यतः यस्मात् कारणात् शिवस्यात्मीयं बलम्।

(वृत्तिः) एतास्तु हारिणीजननीरोधयित्रीत्यभिहिताः तिस्त्रः त्रिसंख्यायाः शक्तयः शरीरे ईशान्याद्यात्मकस्थूलवपुषि[५] करणात्मिकाः सूक्ष्मतनुस्वरूपिण्यः वरैः पुमर्थैः पुष्णातीति वपुः तनोति सर्वं जगत् विस्तारयतीति तनुः तत्स्वरूपिण्यः शक्तयः हे विप्राः ताश्च विभोः शिवस्य नित्यसिद्धाः। कुतः तत यतः स्वकं बलमेव स्वकीयसामर्थ्यस्वरूपिण्य एव।

—•—

(व्याख्या) उक्तानां शक्तीनां शक्तिकत्वेन[६] अवस्थानमधिकारावस्थापन्ने शिवे इति सहेतुकमाह-

(वृत्तिः) अथ तासां स्थितिं दर्शयति-

शक्तीनां वस्तुतस्तासां स्थितिरीश्वरतत्त्वके।। ७७।।
ईशः प्रवर्तको यस्मात् प्रवृत्तिः शक्तिभिर्यतः।

(व्याख्या) ईश्वरतत्त्वके ईश्वरतत्त्वाभिधाने शिवे पत्युः लयभोगाधिकाराणां मध्ये अधिकारावस्थापन्न ईश एव प्रवर्तकः[७] प्रवृत्तिश्च शक्तिभिरेव यतः अतः तत्रैव ताः शक्तित्वेन अवतिष्ठन्त इति भावः।

---

१. मायान्तस्वस्थाने] ज३,ज४;मायान्तं स्वस्थाने-ज१,ज्छ;
२. स्वस्वार्थक्रियात्मिकां] ज१,ज२,ज४; स्वक्रियात्मिकां-ज३
३. शरीरकरणात्मिकाः] मु,क२;शरीरकरणात्मकाः-क१;
४. तदात्मकानि] क१; तदात्मिकाः- मु,क२
५. ईशान्याद्यात्मकस्थूलवपुषि] ज१,ज२,ज३;ईशानाद्यात्मकस्थूलवपुषि-ज४
६. शक्तिकत्वेन] क१,क२; शक्तित्वेन- मु
७. प्रवर्तकः] मु;यतः प्रवर्तकः- क१; प्रयतः प्रवर्तकः-क२

(वृत्तिः) तासां शक्तीनामीशान्यादिरोधयित्र्यन्तानां वस्तुतः स्वभावतः स्थितिरीश्वरतत्त्वके ईश्वरतत्त्वसंज्ञिते शिवे कुतः तस्मात् यस्मादीशः ईशाख्यः शिवः प्रवर्तकः कार्यप्रयोगदशां गच्छन् तदुत्पत्त्यर्थं तद्विचित्रगुणसंक्लृप्तिमान्। अस्तु किमनेनेति न वाच्यम्। ततः यतः यस्मात् प्रवृत्तिः बिन्दुकार्यविचित्रगुणाभिध्यानं शक्तिभिरन्यथा न घटते। यदैव कार्याय नियोजिताः तदैव लब्धोन्मीलनाः सत्यः तत्राधिकाराख्ये शिवे स्वमात्मानं तदपृथक्सिद्धतया दर्शयन्तीति भावः। तदुक्तं मतङ्गे–

संलब्धोन्मीलनाः[१] सत्यः तत्त्वेऽस्मिन्नीश्वराह्वये।
दर्शयन्ति स्वमात्मानमधिकारे नियोजिता।। इति।

ननु सादाख्यतत्त्वाधिष्ठातरि सदाशिवनाम्नि शिवे कार्यप्रयोगदशांगतसमस्तशक्तयः समष्टिरूपत्वेन संस्थिताः स कथमत्र भोग इति वर्णितः श्रीमन्मतङ्गादौ। तस्याधिकारित्वं समुदितं सत्यम्। स्वकार्यकलाविभक्तौ स्वोद्योगविधुरबिन्द्वधिष्ठातरि सति निष्कले सत्यपि समागतव्यक्तियोग्यस्वशक्तिकविनिर्गमनोद्युक्तचतुष्कलसकलनिष्कलबिन्द्वधिष्ठातृत्वात्[२]। सकलनिष्कलसंज्ञितः शिवः सर्गारम्भकाले बिन्दुपालनात्मकतादृग्भोगावस्थापरिच्युतिं वितन्वत् सकलीकृतविचित्रसर्गनिर्माणाधिकारदशाम् अनुप्रविशन्नीश्वराभिधानं लभन् बिन्दुतत्कार्यकलासु पञ्चसु पठितशान्त्यतीतादिभुवननिर्माणं शान्त्यादिकलाचतुष्कमधिकृत्य समधिकुर्वन् अधोयोनिर्मितनिर्मितकार्यस्थले तत्तदुपरि तदुद्योगभोगावस्थां[३] क्रमतः परित्यजन् अधिकारमनुप्रविशन् तदधस्तनकार्योद्युक्तावस्थासम्मेलनाद्धेतोस्तत्रापि सकलनिष्कलत्वात् शान्त्यतीतभुवनस्य लयतात्त्विकत्वेऽपि भोगतात्त्विकशान्तिमस्तकस्थत्वात्। तत्र लयसंज्ञितोऽपि शान्त्यतीतादि- भुवनपञ्चकेषु भोगाह्वयं भजन्[४] तदीशानादिभुवनप्राप्तिकामैरीशानमूर्त्याद्याकारतया ध्यातव्यः। फलप्रदो भवन् तदनन्तरं सादाख्यभुवनसमुत्पत्तिं समधिकुर्वन् सदाशिवसंज्ञितः समष्टिरूपपञ्चमूर्तिमयतनुः[५] स तत्र ध्यातव्यः समष्टिरूपत्वात् सकलत्वससमृद्धाधिकारित्वे स्तोऽपि तदधस्तनैश्वरतत्त्वतात्त्विकनिर्माणानन्तप्रेरणादिलक्षणकार्यप्रयोगदशाम् अनुप्राप्तेरसम्भवात् तदुद्योगः सम्भवतीति स तत्र सदाशिवसंज्ञितेश्वरभट्टारक एवात्र[६] भोग इति वर्णितः। मतङ्गसर्वज्ञानोत्तरयोस्तु सदाशिवतत्त्वे तदधस्तनकार्यं सर्वमन्तर्भावयित्वा स भोग इति न वर्णित इति न किञ्चिदसमञ्जसम्। ऋषयः सांख्यसौगतजैमिनीयार्हतचार्वाकादिभिः समधिगतस्वकीयशास्त्रैरीश्वरसिद्धिर्न गीता।

—•—

१. संलब्धोन्मीलनाः] ज१,ज३; सम्बन्धोन्मीलनाः- ज२
२. समागतव्यक्तियोग्यस्वशक्तिकविनिर्गमनोद्युक्तचतुष्कलसकलनिष्कलबिन्द्वधिष्ठातृत्वात्] ज१,ज३,ज४; समागतव्यक्तियोग्यस्वशक्तिकनिर्मनोद्युक्त०- ज२
३. तदुद्योगभोगावस्थां] ज१,ज३,ज४; तद्योगभोगावस्थां- ज२
४. भजन्] ज१,ज३; सम्भजन्- ज२,ज४
५. सदाशिवसंज्ञितः समष्टिरूपपञ्चमूर्तिमयतनुः] ज१,ज२,ज४; सदाशिवसंज्ञितसमष्टिरूपपञ्च-मूर्तिमयतनुः-ज३
६. एवात्र] ज१,ज२,ज४; एव-ज३

(व्याख्या) इयता प्रबन्धेन उद्देशलक्षणपरीक्षाभिः पतिपदार्थे निरूपितेऽपि प्रमाणोपन्यासं विना अनिरूपितप्रायम् इत्यनुमन्यमानाः[१] वृत्तानुवादपुरःसरं पृच्छन्ति–

(वृत्तिः) तदितरैः पाञ्चरात्रादिभिः गीतापि[२] शिवेतरसिद्धिरिति तत्सक्ता संशयालिंगिता[३] भगवन्तमभिमुखीकृत्य भाषन्ते –

ऋषयः–

भगवन् कथितः सम्यक् पदार्थः पतिसंज्ञितः।। ७८।।
प्रमाणैरपि वक्तव्यो युक्तिबोध्या हि साधवः।

(व्याख्या) पतिरिति संज्ञा अस्य संजातेति पतिसंज्ञितः[४]। तदस्य संजातमिति इतच्[५]। पदार्थः सम्यक् कथितः लक्षणपरीक्षापूर्वकमित्यर्थः। तस्मिन्[६] निरूपिते सपरिकरे पतिपदार्थे किमपरम्[७] अवशिष्यत इत्यत आह– प्रमाणैरपीति। वक्तव्यः साधनीयः। अपिशब्दः तत्समुच्चयार्थः[८]। तमिममर्थं लोकन्यायेन उपपादयति –युक्तिबोद्ध्या हि इति। साधवो विवेकिनः।

(वृत्तिः) हे भगवन् पतिपदार्थः सम्यक् लयादिस्वरूपोक्तिभिः कथितः। तथापि तत्र विविधवादिविप्रतिपत्तितः संजनितसक्तासंशयोन्मूलनार्थं प्रमाणैरनुमानाख्यैरपि वक्तव्यः तदुक्तिभिः साधनीयः। युक्तिबोध्या हि साधवः युक्तिभिरनुमानैः बोध्या हि बोधनीया हि अर्थाः साधवः सिद्धसत्ताकाः। अथवा साधवः आस्तिकाः श्रोतारः अतीन्द्रियवस्तुसाधनेऽनुमानस्य चार्वाकव्यतिरिक्तसमस्तवादिभिः स्वीकरणाद् अनपह्नवनीयत्वात्।

—•—

(व्याख्या) इन्द्रियायोग्ये पतिपदार्थे प्रत्यक्षासम्भवात् अनुमानं प्रमाणम्[९] आह–

(वृत्तिः) एतदुपश्रुत्य भगवान् तत्र सांख्यं प्रत्यनुमानवाक्यं तत्सिद्धौ प्रयुनक्ति –

ईश्वरः–

अचेतनं जगद् विप्राश्चेतनप्रेरणं विना।। ७९।।
प्रवृत्तौ वा निवृत्तौ वा न स्वतन्त्रं रथादिवत्।

---

१. अनिरूपितप्रायम् इत्यनुमन्यमानाः] क१; अनिरूपितप्रायत्वं मन्यमानाः– मु;अनिरूपितप्रायतां तस्य मन्वानाः–क२
२. गीतापि] ज२,ज३;गीता– ज१,ज४;
३. संशयालिंगिता] ज१,ज३,ज४; संशयालिंगवन्तम्– ज२
४. सञ्जातेति पतिसंज्ञितः] मु;सञ्जाता पतिरिति संज्ञितः– क१,क२;
५. इतच्] मु,क२;इत च– क१;
६. तस्मिन्] क१; तर्हि– मु,क२
७. किमपरम्] क१; किम् परम्– मु,क२
८. तत्समुच्चयार्थः] क१,मु;तर्कसमुच्चयार्थः–क२
९. अनुमानप्रमाणम्] मु;अनुमानं प्रमाणम्– क१,क२;

(व्याख्या) इत्थमनुमानप्रयोगो विवक्षितः। प्रवर्तमानं सर्वमचेतनं चेतनाधिष्ठितमचेतनत्वात् रथादिवत्। अचेतनेति पदानुपादाने चेतनकोटेरपि पक्षान्तर्भूतत्वेन भागासिद्धिः। साध्यमानेश्वरस्यापि चेतनाधिष्ठितत्वाद्रथादिवदचेतनत्वप्रसङ्गेन[१] ईश्वरासिद्धिप्रसङ्गश्च। अत उक्तमचेतनेति। तावत्युक्ते दण्डादीनां कुलालादिप्रेर्यत्वेन सिद्धसाधनम्। अत उक्तं सर्वमिति। यद्वा शरीर्यनधिष्ठितमिति वा पक्षविशेषेणम् अतो न दण्डादौ[२] कुलालादिकमादायांशतःसिद्धसाधनम्। एवमपि उत्पन्न-विनष्टानामप्रवर्तमानानां चेतनप्रेर्यत्वाभावेनांशतो[३] बाधः। अत उक्तं प्रवर्तमानमिति। अत्र हेतोः अप्रयोजकत्वमाशङ्क्य निराकरोति–चेतनप्रेरणं विनेति। अचेतनस्य चेतनप्रेरणं विना प्रवृत्तौ वा निवृत्तौ वा न स्वातन्त्र्यम्[४] इति हेतोः नाप्रयोजकत्वमिति भावः। रथादिवदिति–सर्वमिति[५] विशेषणपक्षेऽपि पक्षान्तर्भूतस्यापि रथादेः निश्चितसाध्यत्वेन[६] दृष्टान्तता।

(वृत्तिः) हे विप्राः अचेतनं जगत् कलादिक्षित्यन्ततत्त्वतात्त्विकजातं[७] चेतनप्रेरणं निना प्रवृत्तौ स्वार्थक्रियाकारित्वप्राप्तौ वा निवृत्तौ तदप्राप्तौ वा न स्वतन्त्रं न तदनपेक्षं रथादिवत्। रथिनः प्रेरणं विना रथः तदर्थक्रियालक्षणगमनतन्निवृत्तिकरणेऽशक्तः[८]।

—•—

(वृत्तिः) तर्हि कः प्रवर्तक इत्यत आह –

योऽत्र प्रवर्तकः शक्तः स पतिः परिपठ्यते।।८०।।

(व्याख्या) अस्तु चेतनप्रेर्यत्वमपि तावता किमायातमित्यत आह– योऽत्रेति।

(वृत्तिः) योऽत्र तदर्थक्रियाकरणे तदकरणे वा चेतनस्य शक्तः समर्थः प्रवर्तकः प्रयोजकः स पतिः परिपठ्यते।

—•—

(व्याख्या) ननु वत्सवृद्धिनिमित्तं यथा प्रवृत्तिरज्ञस्य क्षीरस्य पुरुषस्य विमोक्षार्थं तथा प्रवृत्तिरज्ञस्येति मतावलम्बनेन वत्सवृद्ध्यर्थं स्वतः प्रवर्तमाने क्षीरे व्यभिचारमाशङ्क्य परिहरति–

नानैकान्तिकता हेतोः क्षीरे वत्सविवृद्धिदे।

(वृत्तिः) क्षित्यादिकं चेतनप्रेरणं विना न धारणादिलक्षणस्वार्थक्रियां करोति अचेतनत्वात् यथा रथादिकमिति प्रयोगः। यथाऽचेतनमपि क्षीरं स्वतो वत्सविवृद्धिदानात्मिकां स्वार्थक्रियां

---

१. चेतनाधिष्ठितत्वाद्रथादिवदचेतनत्वप्रसङ्गेन] मु;चेतनाधिष्ठितत्वप्रसङ्गेन– क१,क२
२. दण्डादौ] क१,मु; दण्डादेः– इति ' क२ कोशे शोधितः पाठः।
३. चेतनप्रेर्यत्वाभावेनांशतो] मु;चेतनप्रेर्यत्वाभावे नांशतो– क१,क२;
४. न स्वातन्त्र्यम्] क१,क२; रथादिवत् न स्वातन्त्र्यम्– मु
५. रथादिवदिति सर्वमिति] क१,क२; सर्वमिति– मु
६. निश्चितसाध्यत्वेन] क१; निश्चितसाध्यवत्वेन– मु,क२
७. कलादिक्षित्यन्ततत्त्वतात्विकजातं] ज२,ज३,ज४;कालादिक्षित्यन्ततत्त्वतात्विकजातं– ज१;
८. रथः तदर्थक्रियालक्षणगमनतन्निवृत्तिकरणेऽशक्तः] ज१,ज३; न रथः तदर्थक्रियालक्षणगम-नतन्निवृत्तिकरणे शक्तः–ज२,ज४

करोति तथा प्रकृतिः पुरुषभोगमोक्षदानात्मिकां स्वार्थक्रियां करोतीति सांख्याः। प्रकृतिः स्वतः प्रवर्तते अचेतनत्वात् क्षीरवदित्यत्र परोद्धृतदृष्टान्ते साध्यविपर्ययेण सह सिद्धव्याप्तिकत्वं प्रदर्शयन् पुनस्तद्धेतोर्विरुद्धत्वं विनिवेदयन् स्वप्रयुक्तहेतौ तदेतत् क्षीरनिदर्शनं स्यात् ततो नानैकान्तिकत्वमिति कथयति नेत्याह- अचेतनत्वादिति अस्मत्प्रयुक्तस्य[1] हेतोर्वत्सविवृद्धिदे वत्सवपुःपुष्टिकरे क्षीरे नानैकान्तिकता।

—•—

(वृत्तिः) कुत इत्यत आह-

चेतनेन गवा यस्मात् प्रवृत्तं वत्सवृद्धिदम्।।८१।।

(व्याख्या) अचेतनत्वादिति हेतोः वत्सविवृद्धिजनके क्षीरे[2] नानैकान्तिकता यस्मात् कारणात् चेतनेन गवा प्रेरितं सदेव प्रवृत्तं न स्वतः। अतो न व्यभिचार इत्यर्थः।

(वृत्तिः) यस्मात् क्षीरं चेतनेन गवा प्रवृत्तं स्वार्थक्रियायुक्तं वत्सविवृद्धिदं भवति।

—•—

(व्याख्या) ननु तत्रापि स्वभावप्रवृत्तिः अस्तु[3]। एवं च व्यभिचारस्तदवस्थ एवेत्याशङ्क्य साधकबाधकं तर्कम्[4] आह-

मृताद्देहात् प्रवर्तेत प्रवृत्तं चेत्[5] स्वतः पयः।
न च प्रवर्तते यस्मात् चेतनापेक्षिता स्थिता।।८२।।

(व्याख्या) यदि क्षीरं स्वतः चेतननिरपेक्षकं सत् प्रवर्तेत तर्हि मृतात् गवादिदेहात् प्रवर्तेत[6]। उक्ततर्कस्य विपर्ययपर्यवसानमाह- न चेति। यस्मात् कारणात् मृतात् देहात् क्षीरं न प्रवर्तते तस्मात् चेतनापेक्षिता स्थिता चेतनप्रेर्यत्वं स्थितमित्यर्थः। अचेतनत्वं परप्रेरितत्वव्याप्तं न तु चेतनप्रेरितत्वव्याप्तं गौरवात्। अन्यत्र तथैव दर्शनाच्च।

(वृत्तिः) यस्मात् क्षीरं चेतनेन गवा प्रवृत्तं स्वार्थक्रियायुक्तं वत्सविवृद्धिदं भवति। पयः स्वतः चेतनानधिष्ठानात् प्रवृत्तं चेद् यदि स्वार्थक्रियायुक्तं तर्हि मृतात् प्राणवियुक्ततिरकृतचितो गोर्देहात् प्रवर्तेत प्रवृत्तं भवेत्। यस्मान्न च प्रवर्तते तस्मादचेतनस्य प्रवृत्तिनिवृत्त्यर्थं चेतनापेक्षिता स्थिता निश्चिता। अयं बाधकतर्कः।

—•—

(व्याख्या) तथा च नाभिलषितेश्वरसिद्धिरित्याशङ्क्य परिहरति-

---

१. अस्मत्प्रयुक्तस्य] ज३,ज४;अस्मात् प्रयुक्तस्य-ज१,ज२;
२. वत्सविवृद्धिजनके क्षीरे] मु,क२;वत्सवृद्धिजनके- क१;
३. अस्तु] मु,क२;असौ- क१;
४. साधकबाधकं तर्कम्] क२;साधकबाधकं तत्त्वम्- क१; बाधकं तर्कम्- मु
५. चेत्] क१,क२; स्यात्- मु
६. प्रवर्तेत] क१,क२; क्षीरं प्रवर्तेत- मु

(वृत्तिः) नन्वत्रायस्कान्ततृणमणिखण्डानां स्वतो यस्तृणभ्रमणादिप्रवृत्तिहेतुत्वेन दर्शनात् कुतो अस्माद्धेतोर्विरुद्धत्वं कुतो युष्मद्धेतोरनैकान्तिकत्वासत्त्वम्। तन्नेत्याह[१]–

नाप्ययस्कान्तदृष्टान्तः साधकोऽचित्प्रवर्तने।
अयस्कान्तोऽपि योक्तारमपेक्ष्यैव प्रवर्तकः।।८३।।

(व्याख्या) अचित्प्रवर्तने अचेतनस्य प्रवर्तने प्रवृत्तिहेतुतायाम् अयस्कान्तो मणिविशेषो दृष्टान्तो न। कुत इत्याह- अयस्कान्तोऽपीति। यस्मात् कारणात् अयस्कान्तोऽपि योक्तारं स्वप्रयोक्तारमपेक्ष्यैव लोहप्रवर्तकः।

(वृत्तिः) अचित्प्रवर्तने अचितः स्वतः प्रवृत्तिसाधने अयस्कान्तलक्षणदृष्टान्तो यस्य हेतोः सोऽयस्कान्तदृष्टान्तः सोऽपि तु न साधकः। न सद्धेतुत्वेन परिगृहीतव्यः। कुतः अयस्कान्तोऽपि क्षीरमिव योक्तारं चेतनात्मदेवदत्तादिप्रयोजकमपेक्ष्यैव तत्परिग्रहो भूत्वैव प्रवर्तकः अयः समाकर्षणात्मस्वार्थक्रियायुक्तो भवति। तृणमणिखण्डादिकमपि न स्वयमेवेति सोऽयमस्मद्धेतौ दृष्टान्तः सम्भवतीति न ह्यनेनानैकान्तिकत्वम्। ननु वायोः प्रवहनमग्नेः प्रदहनमित्यादिकं स्वाभाविकं दृश्यते अस्ति हि पुनः कर्मणः स्वतो भोगदातृत्वम् इत्यपि वदन्ति जैमिनीयाः।

—•—

(व्याख्या) तथा च[२] साक्षात् परम्परया वा[३] चेतनप्रेर्यत्वाभावेन हेतोः व्यभिचार इत्याशङ्क्य परिहरति–

(वृत्तिः) तन्निरासार्थमाह –

किञ्च पक्षीकृतः सोऽपि जडः सन् यः प्रवर्तते।
स्वप्रवृत्तौ परापेक्षमचेतनम् अतः स्थितम्[४]।।८४।।

(व्याख्या) जडः सन् यः प्रवर्तते समुद्रतरङ्गादिः सोऽपि पक्षीकृतः पक्षतावच्छेदकधर्मेण[५] क्रोडीकृतः। तथा च पक्षे पक्षसमे वा व्यभिचारो नाशङ्कनीयः। पक्षीयसाध्यसन्देह-स्यानुमित्यनुकूलत्वात्[६]। अन्यथा अनुमानमात्रोच्छेदप्रसङ्ग इति भावः। एवं चोक्तानुमानेन न कश्चित् दोष इत्युपसंहरतिस्वप्रवृत्ताविति। अत उक्तदोषनिराकरणात् परापेक्षं चेतनापेक्षम्[७] इति स्थितं सिद्धमित्यर्थः।

(वृत्तिः) किञ्च पुनरपि पुरोक्तं विना जडः सन् यः प्रवर्तते स समस्तोऽपि पक्षीकृतः

---

१. तन्नेत्याह] ज१,ज२; तदेत्याह–ज३;तेनेत्याह–ज४
२. तथा च] मु,क२;तथापि- क१
३. वा] क१,क२; वा सर्वं चेतनप्रेरितमेव प्रवर्तत इति व्याप्तौ न को ऽपि दोष इति भावः। नन्वेवमपि समुद्रतरङ्गादौ साक्षात् परम्परया वा- मु
४. अतः स्थितम्] ज१,ज२,ज४; अवस्थितम्–ज३
५. पक्षतावच्छेदकधर्मेण] मु,क२;पक्षतावच्छेदकेन- क१
६. पक्षीयसाध्यसन्देहस्यानुमित्यनुकूलत्वात्] मु;तथा च पक्षीयसाध्यसन्देहस्यानुमित्यनुकूलत्वात्–क१,क२;
७. चेतनापेक्षम्] मु,क२;चेतनापेक्षितम्- क१;

पक्षत्वेनावच्छिन्नः। अयमाशयः। वायोः प्रवहनमग्नेः प्रदहनं यदि स्वाभाविकं दृष्टं तर्हि निश्चलत्व-निर्वाणलक्षणस्वभावविपर्यासः। कुतः प्रवहनप्रदहनादिकं कदाचिद् दृश्यते। ततः केनापि नुन्नस्तत्स्वभाव इति कारणान्तरेण भवितव्यमिति ईश्वरः प्रेरकोऽनुमीयते आन्तरप्राणादिवायु-प्रवहनाप्रवहनहेतुतयापि ह्यात्मानुमीयते। कर्मणः फलजनकत्वेऽपि तदस्मै पुरुषायाहमनेन साधनेन पुनरियन्तं कालमद्येदं फलमनेन फलान्तरेण सह पृथक् वा प्रदास्यामीत्येवंविधसमस्तज्ञानशून्यत्वात् कृष्यादिकर्मण इव प्राधान्यं कर्तृत्वं न युक्तं। ततः कर्तृत्वस्य कर्मानुसारित्वात् न स्वातन्त्र्यविहीनम्। तदुक्तं सिद्धगुरुणा–

स्वतन्त्रस्याप्रयोज्यत्वं करणादिप्रयोक्तृता।
कर्तुः स्वातन्त्र्यम्[1] एतद्धि न कर्माद्यनपेक्षिता।। इति।

अतोऽस्मात् कारणात् अचेतनं स्वप्रवृत्तौ परापेक्षं चेतनापेक्षं स्थितं निश्चितम्।

—•—

(व्याख्या) नन्वचेतनं सर्वं चेतनप्रेर्यं तथापि नेश्वरसिद्धिः। जीवानामेव तत्प्रेरकत्वसम्भवादिति सिद्धसाधनमाशङ्कन्ते ऋषयः –

(वृत्तिः) जैमिनीयाः पुरुष एवेदमित्यादिश्रुतितः तत्र पुरुष एवायं स्वात्मनः सुकृतदुष्कृतात्मकं बन्धम् आत्मा[2] ज्ञातव्य इत्यादियोगेन च तन्मोक्षमारचयन्नीश्वरो नान्य इत्याहुः। तदिदं हृदि निधाय ऋषयश्चोदयन्ति–

एवं चेच्चेतनाः सन्ति पुरुषाः सर्वसम्मताः।
तेषामेवास्तु कर्तृत्वं किमन्येन वदेश्वर।। ८५।।

(व्याख्या) एवं चेत् पूर्वोक्तप्रकारेण जगतश्चेतनप्रेर्यत्वनियमश्चेदपि सर्वसम्मताः[3] चेतनाः पुरुषाः सन्त्येव। तेषामेव जगत्कर्तृत्वमस्तु। तेभ्योऽन्येन पुरुषेण किम्, न कश्चित् प्रयोजनमित्यर्थः।

(वृत्तिः) हे ईश्वर। एवं चेत् यदि चेतनापेक्षमचेतनं प्रवर्तकं तर्हि सर्वसम्मताः सर्ववादिभिः स्वीकृताश्चेतनाः पुरुषाः सन्ति तेषामेव कर्तृत्वं शरीरादिप्रेरणेन सह तन्निर्मातृत्वमस्तु वद कथयस्व किमन्येन अत्यन्तमप्रसिद्धेन ईश्वराख्येन।

—•—

(व्याख्या) बाधेनार्थान्तरवारणमभिप्रेत्य परमेश्वर उवाच[4]–

ईश्वरः–

अज्ञो जन्तुरनीशोऽयमात्मा यस्माद्द्विजर्षभाः।
सोऽपि सापेक्ष एव स्यात् स्वप्रवृत्तौ घटादिवत्।। ८६।।

---

१. कर्तुः स्वातन्त्र्यम्] ज२,ज३,ज४;कर्तृस्वातन्त्र्यम्- ज१;
२. आत्मा]ज१,ज२,ज४; आमूलात्-ज३
३. सर्वसम्मताः] क१;सर्वसम्मता उभयवादिसम्मताः-क२; उभयवादिसम्मताः- मु
४. उवाच] क१,क२; परिहरति- मु

इष्यते स कथं कर्ता कर्ता तस्मान्महेश्वरः।

(व्याख्या) अज्ञः सङ्कुचितज्ञानवान् जन्तुर्जननशीलः अनीशः अस्वतन्त्रः सङ्कुचितक्रियाशक्तिः तादृशो जीवः स्वप्रवृत्तावपि घटादिवत् प्रेरकान्तरसापेक्ष[१] एव। अतः कारणात् स कथं कर्ता? न कथमपीत्यर्थः। अयं भावः–सर्वस्यापि अचेतनजालस्य पक्षीकृतत्वात् सर्वगोचरज्ञानक्रियाशक्तिमत एवानादिकार्यकारणप्रवाहनिर्वाहकत्वात् अनाद्यसङ्कुचितज्ञानादिमत एव प्रेरकत्वं वाच्यम्। नानीदृशस्याणोस्तत्त्वं सम्भवतीति।

(वृत्तिः) हे द्विजर्षभाः। यस्मात् आत्मा विज्ञानकैवल्यदशायामज्ञः अनभिव्यक्तदृक्क्रियः। वस्तूनां तदगोचरत्वादज्ञातानां प्रेरणमशक्यमिति भावः। स तु पुनः प्रलयकैवल्यदशायां जन्तुः[२] कलादियोगात् पूर्वमहमधुना इदं निर्माय तद्योगप्रेरणादिकं करोमीति ज्ञानाभावात् जनित्रन्तरेण स्वशरीरसहकृतचिद्व्यक्त्यात्मना जनितुं योग्यः। स तु पुनः सकलदशायामनीशः स्वदेहप्रेरणादिकमस्त्यपि[३] अस्वतन्त्रः न ह्यनेन स्वशरीरवियोगशरीरान्तरनिर्माणतत्स्ववशप्रेरणादिकं क्रियते। यद्यस्ति सदा[४] सर्व एव पुरुषा अप्राकृतशरीराः सुखिनः स्युः। सोऽपि स पुरुषोऽपि स्वप्रवृत्तौ स्वकीयभोगमोक्षात्मस्वार्थक्रियाकारित्वप्राप्तौ अस्वतन्त्रत्वात् घटादिवत् सापेक्षः। जलाहरणलक्षणक्रियाकारित्वप्राप्तौ देवदत्तादिसापेक्षघटादिवद् ईश्वरसापेक्ष एव स्यात्। तथा हि सर्व एव हि प्रेक्षावन्तो हितसाधने दृष्टेऽदृष्टे वा कर्मणि प्रवर्तमानाः तत्स्वभावसिद्धाः ते कदाचिदक्षक्रीडाब्रह्महत्यादिष्वप्यहितसाधनेषु प्रवर्तमाना दृश्यन्ते। स स्वभावविपर्यासः तेषां नाहेतुकः। यस्तस्य हेतुः स ईश्वरः।

तथाहुः–

ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा। इति।

ननु यद्येवं कर्मान्तरफलालम्बनात् ईश्वरप्रेरिताः तेऽश्वमेधब्रह्महत्यादीनि कुर्वन्तीति। तत्र स्वतन्त्राभावात् कथं तेषां कर्तृत्वम्। सत्यम्। प्रयोज्यानामपि कर्तृत्वात् तीव्रतरभावात्मना[५] स्वाराज्यादिफलविषयेण गर्वेण भयरागादिवशेन चाविष्टा। अश्वमेधब्रह्महत्तिपरद्रव्यापहृतिकर्तारः ते तादृक्कर्तृरूपा एव स्वतन्त्रा लक्ष्यन्त इति न किञ्चिदसमञ्जसम्। तदुक्तं श्रीमतङ्गे–

यो येनाशयभावेन वशीकृत्य शिवेच्छया।
नियुज्यतेऽसौ भोगेन कर्म त्वथ तदात्मकम्। इति।

तस्माद्धेतोर्महेश्वरः कर्ता स उक्तलक्षणपुरुषः कर्ता जडप्रेरक इति कथं केन प्रकारेण इष्यते स्वीक्रियते न कथञ्चिदपीत्यर्थः।

—•—

१. प्रेरकान्तरसापेक्ष] मु,क२;प्रेरकान्तरस्य अपेक्ष- क१;
२. प्रलयकैवल्यदशायां जन्तुः] ज२,ज३,ज४;प्रलयकैवल्यदशायामजन्तुः- ज१;
३. स्वदेहप्रेरणादिकमस्त्यपि] ज२,ज४;स्वदेहप्रेरणादिकमसत्यपि- ज१,ज३;
४. सदा] ज१,ज३; तदा- ज२,ज४
५. तीव्रतरभावात्मना] ज२,ज३,ज४;तीव्रतराभावात्मना- ज१

(व्याख्या) ननु पशूनां सङ्कुचितज्ञानादिमत्वेन सर्वजगत्प्रेरकात्वासम्भवेऽपि मुक्तात्मनां तत्सम्भवेन तैरर्थान्तरमाशङ्क्य विकल्पासहत्वेन दूषयति–

(वृत्तिः) उक्तलक्षणविधुरत्वादचेतनप्रेरका मुक्ता भवन्त्वित्याशंकायामाह –

विमुक्तास्तर्हि कर्तारो भवेयुरिति चेन्मतिः।।८७।।
किमादिमुक्तः स्यात् कर्तानादिमुक्तोऽथ वा द्विजाः।

(व्याख्या) तर्हि विमुक्ताः परममुक्ताः एव[1] जगत्प्रेरणे कर्तारः भवेयुरिति भवतां मतिश्चेदिति शङ्कमानानां[2] शङ्कां द्वेधा विकल्प्य दूषयति– किमादिमुक्त इत्यादिना। आदिमुक्तः आगन्तुकमोक्षयुक्तः अनादिमुक्तः निसर्गसिद्धमलत्रयसम्बन्धाभाववान्[3]।

(वृत्तिः) हे द्विजाः विमुक्ताः पाशत्रयविमोचनशिवत्वाभिव्यक्तियुक्ताः अयोगान्ययोग-व्यवच्छेदेनेति तु हि शब्दार्थः। तहह्नति पाठे तदेत्यर्थः। कर्तारो चेतनप्रवर्तका भवेयुः स्युरिति मतिश्चेत् बुद्धिर्यद्यस्ति तर्हि किमादिमुक्तः कर्ता स्यात्। अथवा अनादिमुक्तः कर्ता स्यात्।

—•—

(वृत्तिः) तत्र फलितमाह–

अनादिमुक्तश्चेत् कर्ता सिद्धसाधनता तदा।।८८।।
आद्यश्चेत् मुक्तिदस्तस्य कर्ता प्रागेव सिद्ध्यति।
अन्यथायं कथं मुक्तो बद्ध एव सदा भवेत्।।८९।।

(व्याख्या) तत्र सूचीकटाहन्यायेन द्वितीयकल्पनमनूद्य इष्टापत्त्या परिहरति– अनादिमुक्तः। नित्यमुक्तः[4] स चेत् कर्तृत्वेन अभ्युपगम्येत तदा सिद्धसाधनाता। पूर्वोक्तहेतोः अभिमतसाध्यसाधकता सिद्धा। त्वदुक्तस्य[5] अर्थान्तरस्य अभावादिति भावः। अथ वा असिद्धसाधनेति पदच्छेदः। अर्थान्तरता नास्तीत्यर्थः। नित्यमुक्तस्यैव ईश्वरत्वात् तस्यैव[6] सिषाधयिषितत्वादिति भावः। प्रथमविकल्पं दूषयति – आद्यश्चेदिति। आदिमुक्तः कर्तेत्यङ्गीक्रियते चेत् तदा तस्य मुक्तिप्रदो जगत्कर्ता तदा तन्मुक्तिप्रदत्वेन[7] प्रागेव पूर्वमेव सिद्ध्यतीत्यर्थः। मुक्तिप्रदत्वेन ईश्वरं विपक्षबाधकतर्कमुखेन[8] साधयति–अन्यथेति। मुक्तिप्रदेश्वरानङ्गीकारे अयं कथं केन प्रकारेण मुक्तो भवतीत्यर्थः।

(वृत्तिः) अनादिमुक्तः कर्ता चेत् तदा जगत्कर्तृत्वेन प्राक्सिद्धस्य निणह्नतस्य साधनं गमकं

---

१. एव] मु;त एव- क१,क२
२. शङ्कमानानां] सम्पादकीयः पाठः; शङ्कमानां- मु;शङ्कताम्- क१,क२;
३. निसर्गसिद्धमलत्रयसम्बन्धाभाववान्] मु,क२;निसर्गसिद्धमलत्रयसम्बन्धाभावात्- क१;
४. नित्यमुक्तः] क१; अनादिमुक्तः नित्यमुक्तः- मु,क२
५. त्वदुक्तस्य] क१,क२; उक्तस्य -मु
६. तस्यैव] क१; तस्यैवासिद्धस्य- मु,क२
७. तन्मुक्तिप्रदत्वेन] मु,क२;मुक्तिप्रदत्वेन- क१
८. विपक्षबाधकतर्कमुखेन] मु,क२;विपक्षबाधकतत्वमुखेन- क१;

सिद्धसाधनं तत्त्वं सिद्धसाधनता स्यादित्यनुषङ्गः। आदौ भव आद्यः। स मुक्तः कर्ता चेत् तस्यादिमुक्तस्य मुक्तितः मुक्तिहेतोः कर्ता प्रागेव पूर्वमेव सिध्यति भवति। तत्रापि तथापि विकल्याद्यस्वीकारे तस्य तस्य मुक्तितः स सिध्यतीत्यनवस्था। तन्निरासार्थम् अनाद्यस्सिध्यति। तदुक्तं च मृगेन्द्रे–

तेन स्वभावसिद्धेन भवितव्यं जगत्कृता।
अर्वाक्सिद्धेऽनवस्था स्यान्मोक्षो निर्हेतुकोऽपि वा।। इति।

अन्यथा अन्यत्प्रकारेणानादिसिद्धकर्तारमनपेक्ष्य कथं केन प्रकारेण अयमाद्यो मुक्तः सिद्धः स्यात्। अनादिमुक्तमनपेक्ष्य तदस्तित्वे प्रमाणाभावात्। सदैव बद्धो भवेत्।

—•—

(वृत्तिः) ननु स्वयमेव पाशाद्विमुक्तः कर्ता भवतु। तन्न। मेषादिपशुवर्गाद्[१] अनैकान्तिकत्वात् पुरा अज्ञो जन्तुरिति निषिद्धत्वादपीति हृदि निधायाह–

न मोक्षं यान्ति पुरुषाः स्वसामर्थ्यात् कदाचन।
मुक्त्वा प्रसादं देवस्य शिवस्याशिवहारिणः।। ९०।।

(व्याख्या) ननु सञ्चितागामिकर्मणां ज्ञानादिना विनाशे प्रारब्धस्य च भोगेन नाशे[२] सति पुरुषः स्वयमेव मुच्यते। किम् मुक्तिप्रदेनान्येनेत्यत आह– न मोक्षमिति। पुरुषा जीवा अशिवहारिणः मलत्रयहरणशीलस्य[३] शिवस्य प्रसादं शक्तिपातादिलक्षणं प्रसादं मुक्त्वा स्वसामर्थ्यात् मोक्षं न यान्तीति सम्बन्धः। अज्ञो जन्तुरनीशोऽयमित्याद्युक्तेः। ईश्वरानुग्रहं विना स्वसामर्थ्यस्यासम्भवात् कर्मणां च अचेतनानां विचित्रभोगं प्रति चेतनाधिष्ठानं विना करणत्वासम्भवाच्चेति[४] अवश्यम् ईश्वरो भगवान् अखिलविचित्रभोगनिर्वाहकोऽ कामेनापि अभ्युपगन्तव्य इति भावः।

(वृत्तिः) देवस्य शिवत्वलक्षणतेजसा देवनशीलस्य अशिवहारिणः शिवं सर्वज्ञत्वसर्वकर्तृत्वरूपं बलं तद्विरुद्धोऽशिवो मलस्तमशिवं परिपक्वमवलोक्य दीक्षाकर्मण्यभिव्यक्तस्वशक्त्या हरतीत्यशिवहारी तस्याशिवहारिणः। शिवस्य प्रसादो दीक्षारूपानुग्रहः। तं मुक्त्वा विहाय पुरुषाः स्वसामर्थ्यात् स्वकीयबलात् न कदाचन मोक्षं यान्ति। तथाहि– पशवो ह्यनादिसिद्धप्रकृष्टतरज्ञानक्रियायुक्तमीश्वरमन्तरेण शरीरादिपाशवियोगार्थं[५] वा सुखसंवेदनप्राप्त्यर्थं वा स्वत एव न प्रवर्तन्ते। दुःखमोहवेदनाभ्यां वा स्वत एव न निवर्तन्ते। अस्वतन्त्रत्वान्मेषादिपशुवत् पाशाः शरीरादयः कारकान्तरनिरपेक्षाः पशुषु स्वत एव न प्रवर्तन्ते। न तेभ्यः स्वत एव निवर्तन्ते वा। अचेतनत्वान्मेषादिपशुषु रज्ज्वादिपाशवत्।

—•—

१. मेषादिपशुवर्गाद्] ज२,ज३,ज४;मेषादिपशुवर्गादिरपि– ज१;
२. भोगेन नाशे] मु;भोगनाशे– क१,क२;
३. मलत्रयहरणशीलस्य] क२,मु;मलत्रयहारिणः– क१;
४. कारणत्वासम्भवाच्चेति] मु,क२;करणत्वासम्भवाच्चेति– क१
५. शरीरादिपाशवियोगार्थं] ज३;शरीरादिपाशवियोगार्थमयोगार्थं–ज१,ज२,ज४;

(व्याख्या) एवं सर्वस्य जगतः प्रेरकत्वेन ईश्वरसिद्धावपि बहुप्रमाणसम्पादनस्य[1] विषयदार्ढ्यार्थत्वात् ऋषीणां च प्रमाणैरपि वक्तव्य इति बहुप्रमाणजिज्ञासुत्वावगमाच्च अनुमानान्तरं कार्यपक्षकं वक्तुकाम आह–

(वृत्तिः) मीमांसकादीन् न कदाचिदनीदृशं जगदिति वदतः प्रति युक्त्यन्तरं प्रदर्शयति–

किं चानुमानमत्रान्यच्छ्रूयतां द्विजसत्तमाः।

(व्याख्या) अत्र पत्यौ अन्यत् पूर्वोक्ताद्विलक्षणं तदेवानुमानमाह–

(वृत्तिः) हे द्विजसत्तमाः। किञ्च पुनरपि अत्रेश्वरसिद्धौ अन्यदितरदनुमानं सावयवं निगद्यते श्रूयतां श्रोतव्यम्।

विवादाध्यासितं विश्वं विश्ववित्कर्तृपूर्वकम्।। ९१।।
कार्यत्वादावयोः सिद्धं कार्यं कुम्भादिकं यथा।

(व्याख्या) इति। विवादाध्यासितं सकर्तृकत्वविप्रतिपत्तिजन्यसंशयविषयम्[2]। विश्ववित्कर्तृपूर्वकं सर्वज्ञकर्तृपूर्वकमित्यर्थः। इदं च पक्षधर्मताबलपर्यवसितसाध्याभिप्रायेण। पक्षदृष्टान्तसाधारणसाध्यं तु स्वोपादानाभिज्ञपूर्वकत्वम्। स्वपदस्य समभिव्याहृतपरत्वात् नाननुगमो दोषः। कार्यत्वादिति हेतुः कुम्भादिकं यथेति दृष्टान्तः। कार्यपदं तु दृष्टान्ते साधनवैकल्य-शङ्कापरिहाराय। आवयोः सिद्धमिति विशेषणं च यत्र वादिनां सम्प्रतिपत्तिः स दृष्टान्त इति लक्षणसूचनाय।

(वृत्तिः) विवादाध्यासितं विश्वमिदं सकर्तृकमकर्तृकमिति विरुद्धवादास्पदीकृतं महीमहीरुहमहीधरजलधरजलधिनद्यनलानिलादिकं विचित्ररूपं जगत्। ततस्तदानीं सन्दिग्धकर्तृ-विषयप्रकृतविचारानुकूलविवादानास्पदीकृतत्वाद् दृष्टान्तावलोकनविषयदृष्टासन्दिग्धकर्तृघटादिकं न पक्षकोट्यन्तः प्रविशति। न हि न प्रविशतीति न तत्र कर्तृकेति तत्रेश्वरस्यानीश्वरत्वमापादनीयम्। तत्र घटादिकेऽपि प्रयोजकत्वलक्षणकर्तृत्वं शिवस्य सिध्यतीति विश्ववित्कर्तृपूर्वकम्। विश्वं वेत्तीति विश्ववित् विश्वं करोतीति विश्वकर्ता विश्ववित्चासौ कर्ता च विश्ववित्कर्ता विश्ववित्कर्ता पूर्वः स्वनिमित्तकारणत्वेन पूर्वभावी यस्य तत्तथोक्तम्। तदिदं प्रतिज्ञा कुतः कार्यत्वात्तदिदं हेतुः। यद्यत्कार्यं तत्तत्तद्वित्कर्तृपूर्वकम्। यथाऽऽवयोरुभयवादिनोः सिद्धं स्वीकृतं कार्यं कुम्भादिकं तदिदं दृष्टान्तः। ननु कार्यत्वं जगतः सिद्धं न[3] हि क्वचित् कदाचित् केनचित् देहादयो दृष्टवैनश्वर्या अपि क्रियमाणा दृष्टाः। तन्न। देहादीनां क्रियमाणत्वमदृष्टमपि[4] कथं न दृष्टं दृष्ट्यविषयत्वेऽप्यभूत्वा भावित्वात्

---

१. बहुप्रमाणसम्पादनस्य] क१; बहुप्रमाणसंवादस्य- मु,क२
२. सकर्तृकत्वविप्रतिपत्तिजन्यसंशयविषयम्] क१; सकर्तृकत्वाकर्तृकत्वविप्रतिपत्तिजन्य-संशयविषयः-मु,क२
३. तत्तत्तद्वित्कर्तृपूर्वकम्। ... कार्यत्वं जगतः सिद्धं न -ज१,ज२,ज४; ज३ कोशे न दृश्यते।
४. देहादीनां क्रियमाणत्वमदृष्टमपि] ज१,ज२,ज४; कदाचिदनीदृशं जगदितिजैमिनीयोक्तदेहादीनां क्रियमाणत्वमदृष्टमपि-ज३

प्रत्यक्षीभूतवैनश्वर्याद्वा कार्यमित्यनुमितत्वात्। ननु दृष्टमपि देहादिषु न कदाचिदनीदृशं जगदिति जैमिनीयोक्तिनयेन क्षित्यादिषु न दृष्टमभूत्वा भावित्वं वैनश्वर्यं वा। सत्यमित्यत्राह भगवान्।

(व्याख्या) हेत्वसिद्धिं वारयति–

कार्यता चास्य विश्वस्य सभागत्वात् घटादिवत्।। ९२।।

(व्याख्या) विवादाध्यासितं विश्वं कार्यं सांशत्वात् घटादिवदित्यनुमानं बोध्यम्।

(वृत्तिः) अभूत्वा भावित्वं वैनश्वर्यं चागमसिद्धमपि क्षित्यादीनां घटादिवत् कुम्भादेरिव सभागत्वात् सावयवांशत्वात् कार्यता दृश्यते। चस्त्वर्थः। ननु सूक्ष्मक्षित्यादीनां सांशत्वं वा कुतः सिद्धं विशिष्टाकाशादेर्निरंशत्वं न्यायवादिन ब्रुवन्ति। तन्न।

—•—

(व्याख्या) सांशत्वं[१] सावयवत्वं च[२] गगनादौ भागे असिद्धमित्याशङ्क्य तत्रापि सगुणत्वेन सांशत्वं साधयति–

व्योमादिरपि सांशोऽपि सगुणत्वात् यथा घटः।

(वृत्तिः) व्योमादिरपि सांशः सावयवः कुतः सगुणत्वात्। अस्मदादिबाह्येन्द्रिय-परिच्छेद्यगुणसहितत्वात्। यथा घटः सगुणत्वेन सिद्धसावयवत्वात्। व्योमादेः प्रतिलिङ्गशरीरं प्रतिस्रोतः पृथक्सिद्धेः कालमनसीत्यचौतन्ये सत्यनेकत्वात्। परमाणोरपि पांसुवन्मूर्तत्वात् कालादेश्च कार्यत्वसिद्धेः घटादिवदिदमपि विश्वं कार्यत्वं न व्यभिचरति।

—•—

(व्याख्या) अपिशब्दद्वयात् गुणकर्मादौ सर्वत्र क्षित्यादौ च जडत्वे सत्यनेकत्वेन कार्यत्वं साध्यमिति सूचितं निगमयतिविवादेति[३]–

विवदाध्यासितं तस्मात् जगत् कर्तृपुरःसरम्।। ९३।।

(व्याख्या) ननूक्तानुमाने दृष्टान्ते साध्याप्रसिद्धिः दृष्टान्तीकृते घटादौ सकर्तृकत्वस्याभावात्[४]। तथा हि – कुलालादेरपि तत्तत्कालविशेषसहकृतस्यैव जनकत्वं वक्तव्यम्। तत्तत्कालविशेषाभावे इतरकारणसमवधाने सत्यपि कार्योत्पत्त्यदर्शनात्। न च तदसिद्धम्। पुष्पविशेषाणां तत्तदृतुविशेष एव निष्पत्तिदर्शनात् बीजविशेषादेश्च तत्तत्कालविशेष एव सस्याद्युत्पत्तिदर्शनात्। एवं चावश्यक-कालविशेषस्यैव[५] घटादिकं प्रति जनकत्वेन कुलालादेः न घटं प्रति जनकत्वम्। न च कालसद्भावेऽपि दण्डाद्यभावे घटादिकार्योत्पत्तिः न दृष्टेति दण्डकुलालादीनामपि कारणत्वमस्त्येवेति वाच्यम्। तदा कालविशेष एव नास्तीति वक्तुं शक्यत्वात्। तदुक्तं मूले–

---

१. सांशत्वं] क१,क२; ननु सांशत्वं च- मु
२. च] क१,क२; तच्च- मु
३. निगमयति विवादेति] मु;निगमयति- क१,क२;
४. सकर्तृकत्वस्याभावात्] क२;सकर्तृकस्याभावात्-क१; सकर्तृकस्यासम्भवात्-मु
५. चावश्यककालविशेषस्यैव] मु,क२;चावश्यकालविशेषस्यैव- क१

घटः संजायमानोऽयं जातो नेतः पुरा क्वचित्।
सति मृद्दण्डचक्रादौ कुम्भकर्तरि सत्यपि।
यत्तत्र[1] कारणं कालः पदार्थानां प्रवर्तकः।
काले तु सति जायेरन् सर्वे भावाश्च सर्वदा। इति।

तथा पुराणेऽपि–

कालः सृजति भूतानि कालः संहरति प्रजा इति।

तथा च कालस्यैव घटजनकत्वेन न कुलालादेः घटजनकत्वमिति साध्याप्रसिद्धिरेव।

एवं च कालस्यैव पक्षीकृतक्षित्यादावपि ॰नकत्वमित्यलं चेतनाधिष्ठितत्वानुमानेन।

यद्वा तत्तदर्थप्रापकादृष्टाभावे तत्तत्कार्यादर्शनेन आवश्यकादृष्टविशेषस्यैव कार्यमात्रे जनकतया न कुलालादेः जनकत्वमिति चेन्मैवम्। कालमात्रस्यादृष्टमात्रस्य वा जनकत्वे घटार्थिनां दण्डादौ प्रवृत्तिः न स्यात्। अतो दण्डचक्रकुलाल॰दीनामपि[2] कारणत्वमभ्युपगन्तव्यम्। यदि तु कालव्यतिरेकेण[3] कार्यव्यतिरेकदर्शनं[4] तदा कालस्यापि हेतुत्वमस्तु। नह्येतावता क्लृप्तहेतुभावस्य[5] दण्डादेः हेतुता त्यक्तुमुचिता। अतो दृष्टान्तीकृते घटादौ कुलालादीनामपि जनकत्वेन न साध्याप्रसिद्धिः। न वा कालस्य जनकत्वमादाय पक्षे बाध इति नाचेतनकालादीश्वरवादः सङ्गच्छते।

नन्वेवं साध्यसिद्धावपि जगच्छब्देन घटादेरपि पक्षीकृतत्वेन तत्र च[6] कुलालादिकर्तृत्वस्य सिद्धतया अंशतः सिद्धसाधनम्। न च विवादास्पदत्वेन पक्षता क्षितिः सकर्तृका न वेत्येवंरूप-विवादस्यानुगतरूपापरिचये असम्भवात् तत्तद्व्यक्तीनामनुपस्थितत्वेन विशिष्य विवादस्या-सम्भवाच्च। यदि च घटादिव्यावृत्तः क्षित्याद्यनुगतः कश्चन विवादविषयतावच्छेदकः स्वीक्रियते तर्हि तस्यैव पक्षतावच्छेदकत्वसम्भवे किं विवादाध्यासितत्वेनेति चेत्, न। क्षितेरेव पक्षत्वात् न चाङ्कुरादौ सन्दिग्धानैकान्त्यम्। तस्य पक्षसमत्वेन सन्दिग्धानैकान्त्यस्यादूषणत्वात् न हि पक्षे पक्षसमे वा व्यभिचारसन्देहः प्रतिबन्धकः। तथात्वे अनुमानमात्रोच्छेदापातात्[7]।

यद्वा विश्वशब्देन कार्यत्वावच्छिन्नं[8] पक्षीकृतम्। न च घटादावंशतः सिद्धसाधनम्। उद्देश्यायाः पक्षतावच्छेदकावच्छिन्ने सर्वत्र साध्यसिद्धेः अजातत्वेन अंशतः सिद्धसाधनानवकाशात्। न च पक्षतावच्छेदकाश्रये सर्वत्र साध्यसिद्ध्यैव सिद्धसाधनाङ्गीकारेऽशतः सिद्धसाधनत्वव्यवहार[9] एव

---

१. यत्तत्र] मु,क२;अत्र- क१;
२. दण्डचक्रकुलालादीनामपि] मु;दण्डचक्रकुलालादेरपि- क१,क२
३. कालव्यतिरेकेण] मु;कालव्यतिरेके वा- क१; पदमिदं श्क२श कोशे नास्ति।
४. कार्यव्यतिरेकदर्शनं] क१,मु; कालव्यतिरेकदर्शनं-क२
५. कघ्प्तहेतुभावस्य] मु,क२;त्यप्रहेतुभावस्य- क१;
६. तत्र च] क१,क२; तत्र- मु
७. अनुमानमात्रोच्छेदापातात्] मु;अनुमानमात्रोच्छेदकत्वसम्भवात्-क१; अनुमानमात्रोच्छेदकत्वाभावात्-क२
८. कार्यत्वावच्छिन्नं] मु;कार्यत्वावच्छिन्नं कार्यं- क१,क२;
९. सिद्धसाधनत्वव्यवहार] मु;सिद्धसाधनव्यवहार- क१,क२;

हस्तादिजन्ये शरीरजन्यत्वस्य[१] अभावात् न साध्यव्यापकत्वमिति वाच्यम्। शरीरपदस्य चेष्टाश्रयपरत्वेन उक्तदोषाभावात् प्रतिकूलतर्काहतं च सकर्तृकत्वानुमानम्। तथा हि यदीश्वरः कर्ता स्यात् मलावृतज्ञानादिमान्[२] स्यात् शरीरी स्यात् सुखदुःखादिभाक्[३] स्यात्[४] प्रयोजनवान् स्यात्। किञ्चास्य क्षित्यादिकर्तुः कथं सार्वज्ञ्यं सिद्ध्यति[५] पक्षधर्मताबलात्। पक्षीकृतसर्वविषयक-ज्ञानसिद्धावपि घटाद्यात्मव्यावृत्तधर्मावच्छिन्नक्षित्यादीनाम्[६] एव पक्षत्वेन घटादिविषयक-ज्ञानानुपपत्तेः। एवं क्षित्यादावेव ईश्वरकर्तृतासिद्धेः न घटादिविषयकर्तृतासिद्धिः। किञ्च ईश्वरस्य सर्वज्ञत्वाङ्गीकारेऽस्मदादिभ्रान्तिज्ञत्वेन भ्रान्तत्वापत्तिः असद्वैशिष्ट्यावगाहिज्ञानवत्वात्[७]। एवं कर्तृत्वे[८] चास्मदाद्यनुष्ठीयमानविहितनिषिद्धयोरपि[९] कर्तृत्वेन धर्माधर्मजननद्वारा स्वर्गनरकावपि स्याताम्। अपि च क्षित्यादिकर्तुरेकत्वं न सिद्ध्येत्। अनुमितेः व्यापकतावच्छेकप्रकारकत्वनैयत्यात्[१०] एकत्वमपि व्यापकतावच्छेदककोटौ[११] प्रवेश्यते इति चेत् न। नानाकर्तृकरथगोपुरादौ व्यभिचारात्। न च नानात्वे प्रमाणाभावादेवैकत्वसिद्धिरिति वाच्यम्। एकत्वे प्रमाणाभावेन नानात्वस्यापि सिद्ध्यापातात्। अथ यद्विना क्षितेः कार्यत्वमनुपपन्नं[१२] तदेव पक्षधर्मताबलात्[१३] सिद्ध्यति। एवं च नानाकर्तृकत्वं विना पक्षधर्मताया अनुपपत्त्यभावात् एककर्तृकत्वमेव सिद्ध्यतीति चेत् तर्हि एककर्तृकत्वं विनानुपपत्त्यभावात् नानाकर्तृकत्वमपि कुतो न सिद्ध्येदिति समानम्। न च लाघवादेकत्वमुपनीतं सिद्धमिति वाच्यम्। लाघवस्यानुमितिमात्रे व्यभिचारेण हेतुत्वायोगात् लाघवजन्यानुमितौ हेतुत्वे चात्माश्रयात्। रथगोपुरादौ सकर्तृकत्वानुमानेऽपि लाघवसहकारेण कर्त्रैकत्वविषयत्वानुपाताच्च। अथोच्यते- रथादिलक्षणकार्यस्यैकेन कर्तुमशक्यत्वात् नैककर्तृकत्व-सिद्धिरिति[१४]। तर्हि सुतरां महीधरादिलक्षणकार्यमपि एकेन कर्तुमशक्यमिति समानमिति चेत्[१५] अत्राभिधीयते - यत्तावदुक्तं कर्ता शरीर्येव ज्ञानं मलावृतमित्यादि बहुव्याप्तिविरोधात्

---

१. शरीरजन्यत्वस्य] क१,क२; शरीरिजन्यत्वस्य- मु
२. यदीश्वरः कर्ता स्यात् मलावृतज्ञानादिमान्] मु,क२;स्यालावृतज्ञानादिमान्- क१
३. सुखदुःखादिभाक्] मु,क२;सुखादिभाक्- क१;
४. स्यात्] क१; यदीश्वरः कर्ता स्यात्- मु,क२
५. कथं सार्वज्ञ्यं सिद्ध्यति] क२;कथं सार्वज्ञः सिद्ध्यति- क१; कठे सार्वज्ञ्यप्रतिपादनात्- मु
६. घटात्मादिव्यावृत्तधर्मावच्छिन्नक्षित्यादीनाम्] मु;घटाद्यात्मव्यावृत्तधर्मावच्छिन्नक्षित्यादीनाम्- क१,क२;
७. असद्वैशिष्ट्यावगाहिज्ञानवत्वात्] मु;असद्वैशिष्ट्यावगाहिज्ञानत्वात्-क१,क२;
८. कर्तृत्वे] मु;सकर्तृकत्वे- क१,क२
९. चास्मदाद्यनुष्ठीयमानविहितनिषिद्धयोरपि] मु;चास्मदाद्यनुष्ठीयमाने विहितनिषिद्धादावपि- क१,क२;
१०. व्यापकतावच्छेदकप्रकारकत्वनैयत्यात्] क१,क२; व्यापकतावच्छेदकप्रकारत्वनैयत्यात्-मु
११. व्यापकतावच्छेदककोटौ] मु,क२;व्याप्यतावच्छेदककोटौ- क१;
१२. क्षितेः कार्यत्वमनुपपन्नं] मु;क्षितिकार्यत्वमनुपपन्नं- क१,क२
१३. पक्षधर्मताबलात्] क१,क२; पक्षताबलात्- मु
१४. नैककर्तृकत्वसिद्धिरिति] मु,क२;नैककर्तृकत्वासिद्धिरिति-क१;
१५. समानमिति चेत्] मु,क२;चेत्- क१;

अशरीरत्वादिकं[१] न सिद्ध्यतीति तन्न। उक्तव्याप्तीनां विपक्षे बाधकतर्काभावेन[२] सहचारमात्र-रूपत्वात्। कार्यत्वसकर्तृकत्वव्याप्तौ तु प्रसिद्धकार्यकारणभावभङ्गप्रसङ्ग एव विपक्षे बाधकस्तर्क इति न व्याप्त्यसिद्धिः। वस्तुतस्तु इयमनुमितिः नेश्वरे तज्ज्ञाने वा शरीरित्वमलानावृतत्वगोचरा[३] अनुमितेः व्यापकतावच्छेदकमात्रप्रकारकत्वनियमात्। किन्त्वेतत् अनुमानान्तरमन्यैवानुमिति-स्तद्गोचरा तत्र च ईश्वरः शरीरी[४] ईश्वरज्ञानं च[५] मलावृतमित्येवमाकारं प्रतिबन्धकं ज्ञानं नास्त्येवेति न कापि अनुपपत्तिः। नापि सत्प्रतिपक्षस्यावसरः शरीराजन्यत्वरूपहेतौ शरीरपदस्य व्यर्थत्वेन व्याप्यत्वासिद्धत्वात्। न च रूपादिषु पञ्चसु मध्य इतिवदसिद्धिवारकत्वेन सार्थकत्वम्। यन्निष्ठा यन्निरूपिता व्याप्तिः येन विशेषणेन[६] विना ग्रहीतुं न शक्यते तत्तत्र सार्थकमिति न्यायेन तस्य असार्थकत्वात्[७]। प्रकृते च शरीरविशेषणं विनापि जन्यत्वाभावत्वेनैव उपस्थिते तदभावे अकर्तृकत्वनिरूपितव्याप्तेः ग्रहीतुं शक्यत्वात्। तथा च शरीराजन्यत्वादित्ययं हेतुः व्याप्यत्वासिद्ध एव। तत्परिहारार्थं शरीरविशेषणत्यागे च[८] स्वरूपासिद्धिरेव। तदुक्तम् – एकामसिद्धिं परिहरतो द्वितीयापत्तिः[९] इति। यद्यपि शरीरजन्यत्वप्रतियोगिकाखण्डभावनिष्ठव्याप्तेः[१०] तेन विशेषणेन विना दुर्ग्रहत्वमिति। तदपि सार्थकमिति वक्तुं शक्यते तथापि यद्विशेष्यतावच्छेदकावच्छिन्ननिष्ठा यत्साध्यनिरूपिता व्याप्तिः येन विशेषणेन विना ग्रहीतुं न शक्यते तत् तत्र सार्थकमित्येवं न्यायार्थस्य स्वीकारे[११] विशेष्यतावच्छेदकावच्छिन्नजन्यत्वाभावव्याप्तेः तेन विना ग्रहीतुं शक्यत्वात् व्यर्थमेव। अपि च शरीरजन्यत्वे कर्तृजन्यत्वस्य अवच्छेदकत्वे भवत्यकर्तृकत्वशरीराजन्यत्वयोरपि व्याप्तिः। न हि शरीरजन्यत्वे कर्तृजन्यत्वमवच्छेदकम् उपस्थितस्यैव तस्यावच्छेदकत्वे वाच्ये तदुपस्थितेरपि अवच्छेदकग्रहं विना असम्भवात् जन्यत्वमेव तत्रावच्छेदकमिति स्वीकर्तव्यम् अनुगतत्वात्। न तु घटत्वपटत्वादिकम्। जातिरूपत्वेऽपि तस्याननुगतत्वात्। एवं च जन्यत्वावच्छेदेन कर्तृजन्यत्वे सिद्धे न शरीरजन्यत्वे कर्तृजन्यत्वमवच्छेदकम्[१२] अतिप्रसङ्गात्। अनेनैव न्यायेन शरीरजन्यत्वस्य

---

१. अशरीरत्वादिकं] मु,क२;शरीरत्वादिकं- क१;
२. विपक्षे बाधकतर्काभावेन] मु;विपक्षबाधककर्ताभावेन- क१; विपक्षबाधकतर्काभावेन-क२
३. शरीरित्वमलानावृतत्वगोचरा] मु,क२;अशरीरित्वमलानावृतत्वगोचरा- क१
४. ईश्वरः शरीरी] क२;ईश्वरशरीरि- क१; ईश्वरः सशरीरः- मु;
५. च] मु,क२;तु- क१;
६. विशेषणेन] मु,क२;विशेषेण- क१;
७. असार्थकत्वात्] मु;सार्थकत्वात्-क१,क२;
८. शरीरविशेषणत्यागे च] मु,क२;शरीरविशेषणत्यागे- क१;
९. द्वितीयापत्तिः, मु;द्वितीयासिद्ध्यापत्तिः- क१,क२;
१०. शरीरजन्यत्वप्रतियोगिकाखण्डभावनिष्ठव्याप्तेः] मु,क२;शरीरजन्यत्वप्रतियोगिकाखण्डाभावनिष्ठव्याप्तेः- क१
११. तथापि यद्विशेष्यतावच्छेदकावच्छिन्ननिष्ठा यत्साध्यनिरूपिता व्याप्तिः येन विशेषणेन विना ग्रहीतुं न शक्यते तत् तत्र सार्थकमित्येवं न्यायार्थस्य स्वीकारे] मु,क२;तथापि यत्- क१
१२. कर्तृजन्यत्वमवच्छेदकम् उपस्थितस्यैव तस्यावच्छेदकत्वे वाच्ये तदुपस्थितेरपि अवच्छेदकग्रहं विना असम्भवात् जन्यत्वमेव तत्रावच्छेदकमिति स्वीकर्तव्यम् अनुगतत्वात्। न तु घटत्वपटत्वादिकम्।

व्यापकत्वं निरस्तमिति शरीरजन्यत्वम् उक्तानुमाने न उपाधिः। यदपि उक्तं पूर्वसाधनव्यतिरेकित्वात्[१] अजन्यत्वं नोपाधिरिति तदपि न। न हि पूर्वसाधनव्यतिरेकित्वमनुपाधित्वे प्रयोजकं तथा सति अग्नीषोमीयहिंसा अधर्मसाधनं न सम्भवति अनिषिद्धत्वादिति स्थापनावादिना प्रयुक्ते सा अधर्महेतुः हिंसात्वात् क्रतुबाह्यहिंसावदिति प्रत्यनुमाने च पूर्ववादिनोद्भाविते निषिद्धत्वादिरपि उपाधिः न भवेत्। किन्तु उपाधिलक्षणशून्यत्वमेव। तथा च प्रकृते अजन्यत्वरूपोपाधेः साध्यव्यापकत्व-साधनाव्यापकत्वयोः विद्यमानत्वात् स्यादेव उपाधित्वम्। यदप्युक्तं शरीरविशिष्टस्य अनुपलब्ध्या कर्तुरपि अनुपलम्भबाध इति तदपि न[२]। कर्तृत्वस्य शरीरित्वव्याप्तेः[३] निरस्तत्वेन शरीरबाधेन कर्तुः अनुपलम्भबाधस्य वक्तुमशक्यत्वात्। न चैवं शृङ्गत्वस्यापि योग्यत्वव्याप्यत्वे मानाभावेन अयोग्यमपि शृङ्गं कुतो न सिद्ध्येदिति वाच्यम्। पशुत्वस्य शृङ्गित्वं प्रत्यप्रयोजकत्वेन तस्य तदव्याप्यत्वेनासाधकत्वात् नापि प्रतिकूलतर्कपराहतिः[४]। तर्कस्य[५] ईश्वरतज्ज्ञानादिपक्षकत्वे तस्यासिद्धावाश्रयासिद्धेः। तत्सत्त्वे[६] धर्मिग्राहकप्रमाणविरोधेन[७] तर्कस्याप्रवृत्तेः। यदि क्षित्यादिकं सकर्तृकं स्यात् शरीरिकर्तृकं स्यात् किञ्चिज्ज्ञकर्तृकं स्यादित्येवं क्षितिपक्षकस्य[८] तर्कस्य सकर्तृकत्वं प्रति शरीरिकर्तृकत्वादेः[९] व्यापकतानिरासेनैव निरासः। यदपि उक्तं सर्वज्ञत्वं सर्वकर्तृत्वं[१०] च न सिद्ध्येदिति[११] तदपि न। कार्यत्वावच्छिन्नकार्यपक्षकत्वे सर्वकार्यत्वावच्छिन्नतत्पक्षकत्वे वा पक्षधर्मताबलात् तयोः सिद्धत्वात्। घटादिव्यावृत्तक्षित्यादिमात्रनिष्ठधर्मावच्छिन्नपक्षकत्वे तु तयोः सिद्धिः अनुमानान्तरादेव द्रष्टव्या न च[१२] ईश्वरस्य सर्वज्ञत्वे भ्रान्तत्वापत्तिः। भ्रमत्वे असद्विषय-कत्वस्यातन्त्रत्वात् भ्रमविषयाणां सर्वेषां सत्त्वेन भ्रमेऽपि एतस्यासम्भवात्। गगनकुसुममसदितिज्ञाने अतिव्याप्तेश्च। किन्तु तदभाववद्विशेष्यकत्वावच्छेदेन तत्प्रकारत्वम्। इदं च भ्रमविषयकज्ञाने

जातिरूपत्वेऽपि तस्याननुगतत्वात्। एवं च जन्यत्वावच्छेदेन कर्तृजन्यत्वे सिद्धे न शरीरजन्यत्वे कर्तृजन्यत्वमवच्छेदकम्] क२; कर्तृजन्यत्वमवच्छेदकम्- क१; कर्तृजन्यत्वमवच्छेदकम् उपस्थितस्यैव तस्यावच्छेदकत्वं वाच्यम्। तदुपस्थितेरपि अवच्छेदकग्रहं विना असम्भवात् जन्यत्वमेव तत्रावच्छेदकमिति स्वीकर्तव्यम् अनुगतत्वात्। न तु घटत्वपटत्वादिकम्। जातिरूपत्वेऽपि तस्याननुगतत्वात्। एवं च जन्यत्वावच्छेदेन कर्तृजन्यत्वे सिद्धे न शरीरजन्यत्वे कर्तृजन्यत्वमवच्छेदकम्-मु

१. पूर्वसाधनव्यतिरेकित्वात्] मु,क२;पूर्वसाधनत्वव्यतिरेकित्वात्-क१;
२. तदपि न] मु;तदपि- क१,क२;
३. शरीरित्वव्याप्तेः] क१; सशरीरत्वव्याप्तेः- मु; शरीरत्वव्याप्तेः-क२
४. प्रतिकूलतर्कपराहतिः] मु,क२;प्रतिकूलतत्त्वपराहतिः-क१;
५. तर्कस्य] मु,क२;तत्वस्य- क१;
६. तत्सत्त्वे] क१,क२; तत्स्थितौ- मु
७. धर्मिग्राहकप्रमाणविरोधेन] मु;धर्मिग्राहकं प्रमाणविरोधेन- क१; धर्मिग्राहकप्रमाणविरोधे-क२
८. क्षितिपक्षकस्य] मु;क्षितिपक्षस्य- क१,क२;
९. शरीरिकर्तृकत्वादेः] मु,क२;शरीरिकर्तृत्वादेः- क१;
१०. सर्वकर्तृत्वं] मु;सकर्तृकं- क१; सर्वकर्तृकत्वं-क२
११. सिद्ध्येदिति] क१,क२; सिद्ध्यतीति- मु
१२. न च] मु,क२;न- क१;

नातिव्याप्तमिति[१] न तस्य भ्रान्तत्वापत्तिः। इदं च प्रमाणपटले स्फुटं निर्दुष्टं[२] वक्ष्यामः। ईश्वरस्य सर्वकर्तृत्वेन विहितनिषिद्धयोः कर्तृत्वेऽपि मिथ्याज्ञानतद्वासनाद्यभावात् न धर्माधर्मादि[३] तदभावान्न स्वर्गनरकादिकमपि। एकत्वसिद्धिस्तु लाघवादेव। न च तज्जन्यतावच्छेदकं निर्वक्तुमशक्यम्। लाघवोपस्थितिसमानकालीनसम्भवल्लघुगुरुविषयताकानुमितित्वस्यैव[४] तदवच्छेदकत्वात्। न च नानाकर्तृकरथगोपुरादावपि लाघवोपनीतैकत्वभानापत्तिः[५]। बाधानवतारदशायामिष्टत्वात् तदवतारे तस्यैव प्रतिबन्धकत्वात्। वस्तुतस्तु अनुमितावुपनीतभानमेव नास्ति तत्र मानाभावात्। रथगोपुरादावेककर्तृकत्वनानाकर्तृकत्वसंशयानापत्तेश्च। प्रत्यभिज्ञादिप्रत्यक्षे तु[६] उपनीत-त्तादावुपनयनसन्निकर्षसत्त्वेन[७] प्रत्यक्षसामग्रीसत्त्वादुक्तम्[८] अक्षविषयत्वम्[९] उपनीततत्तादेः परामर्शस्य[१०] पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकसाध्यतावच्छेदकावच्छिन्नसाध्यविशेषणक-ज्ञानमात्रजननसामग्रीत्वेन अतिरिक्तविषयज्ञानजनने सामर्थ्याभावात्। न च परामर्शमात्रस्य अतिरिक्तज्ञानजनने सामर्थ्याभावेऽपि लाघवोपस्थितिसमानकालीनपरामर्शस्य तदुपस्थिति-समानकालीनसम्भवल्लघुगुरुविषयताकानुमितित्वावच्छेदेन जनकत्वात्[११] लाघवोपस्थितस्य भानमस्त्विति वाच्यम्। अनेनाकारेण जन्यजनकभावकल्पने मानाभावात्। पर्वतो वह्निमानित्यादौ प्रत्यक्षोपस्थिततृणादीनां वह्न्यनुमितिविषयत्वेनाननुभवात् नानुमितित्वावच्छेदेन उपनयनस्य[१२] सहकारित्वम्। एकत्वादिसिद्धिस्तु श्रुत्यागमादिनैव। अत एव शास्त्रयोनित्वाधिकरणे जगज्जन्मादिकारणं ब्रह्म शास्त्रैकगम्यम् उत प्रमाणान्तरेणापीति संशये जगतः सावयवत्वेन कार्यत्वात् स्वोचितकर्तृजन्यत्वानुमानेषु सर्वज्ञत्वाद्युपेतस्य कर्तुरधिगमसम्भवात्[१३] न शास्त्रैकगम्यं ब्रह्मेति प्रापय्य शास्त्रश्रवणमन्तरेण ब्रह्मणो बोधासम्भवस्य श्रुतिषु प्रतिपादनात् कार्यत्वेन[१४] कर्तृत्वानुमानेऽपि

---

१. नातिव्याप्तमिति] मु;नातिव्याप्तं- क१,क२;
२. निर्दुष्टं च] मु;निर्दिष्टं- क१,क२;
३. धर्माधर्मादि] मु,क२;धर्माधर्मादिः- क१
४. लाघवोपस्थितिसमानकालीनसम्भवल्लघुगुरुविषयताकानुमितित्वस्यैव] क१,क२; लाघवोपस्थिति-समानकालीनसम्भा अनुमितिः लघुगुरुविषयताकानुमितित्वस्यैव- मु
५. लाघवोपनीतैकत्वभानापत्तिः] मु,क२;लाघवोपनीतैकत्वभावनापत्तिः- क१;
६. प्रत्यभिज्ञादिप्रत्यक्षे तु] मु; प्रत्यभिज्ञादिप्रत्यक्षेषु- क१; प्रत्यभिज्ञादिप्रत्यक्षे-क२
७. उपनीततत्तादावुपनयनसन्निकर्षसत्त्वेन] मु,क२;उपनीततत्तदुपनयनसन्निकर्षसत्त्वेन- क१
८. प्रत्यक्षसामग्रीसत्त्वादुक्तम्] क२;प्रत्यक्षसामग्रीसत्त्वादित्युक्तम्- क१; प्रत्यक्षसामग्रीसत्त्वाद्युक्तम्- मु;
९. अक्षविषयत्वम्] मु,क२;अक्षविषयम्- क१;
१०. परामर्शस्य] मु;परामर्शस्य हि- क१,क२;
११. तदुपस्थितिसमानकालीनसम्भवल्लघुगुरुविषयताकानुमितित्वावच्छेदेन जनकत्वात्] मु; तदुपस्थितिसमानकालीनसम्भवल्लघुगुरुविषयताकानुमितित्वावच्छेदनजनकत्वात्- क१; तदुपस्थितिसमानकालीनत्वसम्भवाल्लघुगुरुविषयताकानुमितित्वावच्छेदेन जनकत्वात्- क२
१२. उपनयनस्य- क१,क२; उपनयस्य- मु
१३. कर्तुरधिगमसम्भवात्] क१,क२; कर्त्रधिगमसम्भवात्- मु
१४. कार्यत्वेन] मु,क२;कार्यत्वे- क१;

विचित्ररचनरथगोपुरादेः बहुकर्तृकत्वस्य[१] दर्शनेनैकत्वाद्यसिद्धेः उपादानत्वस्य कथंचिदपि असिद्धेश्च निमित्तोपादानशक्तियुक्तम् एकं जगत्कारणं ब्रह्म शास्त्रैकगम्यमिति राद्धान्तितम्। सूतसंहितायामपि शिवं प्रस्तुत्याम्नायते–

आम्नायान्तैकसंवेद्यमशेषक्लेशनाशनम् इति।

पराशरोपपुराणेऽपि–

धर्मेऽधर्मे शिवे चैव प्रमाणं वेद एव नः। इति।

शिवधर्मोत्तरेऽपि–

शैवागमैः शिवो वेद्यः। इति।

तस्मात् जगत्कारणैकत्वविशिष्टशिवसिद्धिः[२] श्रुत्यागमाभ्यामेव अवगन्तव्येति संक्षेपः। ननु सावयवत्वेन कार्यत्वं साधनीयमित्युक्तम्। तत्र सावयवत्वशब्दार्थस्य अवयवसंयोगित्वे घटावयवसंयोगिन्यात्मनि व्यभिचारः। अवयवसमवेतत्वरूपार्थत्वे परमते तन्तुत्वादौ व्यभिचारः। अवयवजन्यत्वे साध्याविशेषः सम्बन्धमात्रत्वे पूर्वोक्तात्मन्येव व्यभिचार इति चेन्न। अवयवावयविभावरूपसम्बन्धविशेषस्य विवक्षितत्वात्। तदेकं सर्वभूतानामनादि निबिडं महत् इति मलस्य निबिडत्वप्रतिपादकवचनानुसारेण तस्यापि सावयवत्वात् व्यभिचार इति चेत्, न। तस्य वचनस्य मलगतशक्तिदार्ढ्याभिप्रायकत्वेन[३] सावयवत्वप्रतिपादने तात्पर्याभावात्। अन्यथा तस्यापि कार्यत्वापत्तेः। ननु

तेन प्रदीपककल्पेन तदाच्छिन्नचितेरणोः।
प्रकाशयत्येकदेशं विदार्य तिमिरं घनम्।

इति मलैकदेशविदारणपरेण सावयवत्वं श्रुत्या अवगम्यते एकदेशस्यावयवार्थत्वादिति चेन्न। तत्तद्विषयावच्छिन्नात्मावारकमलशक्तिविदारणमात्रस्यैवैकदेशविदारणत्वात्। न चैकदेशशब्दस्य मुख्यावयवार्थत्वं कुतो न गृह्यत इति वाच्यम्। धर्मिग्राहकप्रमाणेन नित्यविभुत्वेन सिद्धे मले मुख्यस्यैकदेशस्य बाधितत्वेन गौणार्थस्वीकारात्।

एवं च सावयवत्वेन कार्यत्वं साधयितुं शक्यमेवेति न किञ्चिद्दूषणम्। किन्तु सृष्टिप्रतिपादकमन्त्रार्थ–वादेतिहासपुराणैश्च जगतः कार्यत्वमवगम्यते। न च तेषां विधेयस्तावकत्वेन स्वार्थे तात्पर्याभावः। विधिना त्वेकवाक्यत्वात् स्तुत्यर्थत्वेन विधीनां स्युरिति तेषां स्तुतिपरत्वस्य जैमिनिनाभ्युपगतत्वादिति वाच्यम्। तेषां विधिविशेषत्वेऽपि[४] प्रमाणान्तराविरुद्धेऽर्थे पूर्वं प्रमिते च अवान्तरतात्पर्यस्यापि[५] अङ्गीकारात्। तदुक्तम्–

---

१. बहुकर्तृकत्वस्य] मु,क२;बहुकर्तृकस्य- क१;
२. जगत्कारणैकत्वविशिष्टशिवसिद्धिः] क१,क२; जगत्कारणत्वैकत्वविशिष्टशिवसिद्धिः- मु
३. मलगतशक्तिदार्ढ्याभिप्रायकत्वेन] क१,क२; मलगतशक्तिदार्ढ्यार्थाभिप्रायकत्वेन- मु
४. विधिशेषत्वेऽपि] मु,क२;विधिविशेषत्वेऽपि- क१;
५. अवान्तरतात्पर्यस्यापि] मु,क२;अवान्तरतात्पर्यस्य- क१;

विरोधे गुणवादः स्यात् अनुवादोऽवधारिते।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः।

इति सिद्धार्थबोधः। तथा मन्त्रार्थवादेतिहासपुराणेषु प्रामाण्यात् सृष्टिप्रलयावपि इष्यते इत्यभिहितमिति सिद्धं जगतः कार्यत्वम्।

(वृत्तिः) तदिदं जगन्निविष्टतया विशिष्टकर्तृसिध्यर्थं कार्यत्वहेतोर्जगल्लक्षणपक्षधर्मताकर्घप्तिलक्षणोपनयः तस्मात् कार्यत्वात् विवादाध्यासितं जगत् कर्तृपुरस्सरम्। पुस्सरतीति पुरस्सरः। कर्ता पुरस्सरः स्वनिमित्तकारणत्वेन पूर्वभावी यस्य तत्तथोक्तम्। तदिदं जगल्लक्षणपक्षनिविष्टतया विशिष्टतया विशिष्टकर्तृकर्घप्तिलक्षणं निगमनम्। ननु स्थलोपलाचलमहीरुहजलधरजलधिसरिद्धिमकरार्कानलानिलादिगतसन्निवेशस्य वैशिष्ट्यात् असिद्धं तस्य कार्यत्वव्याप्तत्वम्। यथाकथञ्चिद् वैशिष्ट्यवति कार्ये[1] सिद्धेऽपि जगल्लक्षणकार्यव्यक्तेः कदाचिदपि कयाचित् जगत् कर्तृव्यक्त्या व्याप्तिर्दुरुपलब्धेति सिद्धम्। सिद्धत्वं कर्तृसाधनप्रवर्तकार्यत्वहेतोः। तन्न परस्यापि समानत्वात् महानसवर्तिनो धूमस्याग्निकार्यत्वसिद्धावपि यथाकथञ्चित् येन केनचित् विशिष्टदेशकालोत्पन्नतनुतरमहत्तररेखाद्याकारतया विशेषणधूमस्य पर्वतवर्तिनस्ततो महानसवर्तिनोऽन्यत्वात्। कथमिदमग्निकार्यमहानसवर्तिनोऽतिवैलक्षण्यादित्यग्निकार्यत्वासिद्धेः पुनरियदुक्त्या सर्वानुमानानामसाध्यधर्मिणि पक्षे व्याप्तिग्रहणे प्रसक्ते धूमव्यक्तेः कदाचिदपि पर्वतवर्तिन्या कयाचिद्वह्निव्यक्त्या सह व्याप्तिर्दुरुपलब्धेति कस्यचिदप्यतर्क्यत्वप्रथितधूमवत्वहेतोरपि सिद्धमसिद्धत्वमिति सर्वानुमानोच्छेदकरी सैषा बाधा सर्वानुमानवादीनां प्रसक्ता। नैकः पर्यनुयोज्यः। तदुक्तं –

यत्र स्यादुभयोर्दोषः परिहारोऽपि वा समः।
नैकः पर्यनुयोक्तव्यः तादृगर्थविनिश्चये।। इति।

ततस्तत्परिहाराय विशिष्टस्य ह्यहेतुत्वाद् इष्टघटादिषु[2] कार्यमात्रस्य कर्तृमात्रेण अविशिष्टमाहानसादिषु धूममात्रस्य वह्निमात्रेण उपलब्धा व्याप्तिरिति सर्वं समञ्जसम्। ननु वनतृणादेः कर्तारं विनोत्पत्तिदर्शनात् अनैकान्तिकत्वमस्य प्रसक्तम्। तन्न। सर्वस्यादृष्टकर्तृकस्य वनतृणादेरपि पक्षीकृतत्वात्। नन्वयं विरुद्धः। यदाहुः–

यथा सिद्धे च दृष्टान्ते भवेद्धेतोर्विरुद्धता।
अनीश्वरविनाश्यादिकर्तृत्वं च प्रसज्यते।। इति।

तदयुक्तम्। साध्यविपर्ययव्याप्तो हि हेतुर्विरुद्धः। न चायं दृष्टान्तस्तावद् अनीश्वरत्वाविनाभूतकर्तृव्याप्तः[3] सिद्धः कुम्भकारस्यापि स्वकार्यसर्वज्ञत्वसर्वकर्तृत्वसिद्धेः। तदेव हीश्वरत्वं यदि हि तत्र तु तदंशेनापि अदृक्शक्तिरकर्तृशक्तिरव्याप्तिः सम्भ्रान्तिर्वा भवेत्[4]। तदानीं

---

१. वैशिष्ट्यवति कार्ये] ज१,ज२,ज४; वैशिष्ट्ये कार्ये–ज३
२. इष्टघटादिषु] ज१,ज२; विशिष्टघटादिषु–ज३;विशिष्यघटादिषु–ज४
३. अनीश्वरत्वाविनाभूतकर्तृव्याप्तः] ज१,ज२;अनीश्वरत्वाविनाभूतकर्त्रा व्याप्तः–ज३,ज४
४. अदृक्शक्तिरकर्तृशक्तिरव्याप्तिः सम्भ्रान्तिर्वा भवेत्] ज३, ज४; अदृक्शक्तिरव्याप्तिसम्भ्रान्तिर्भावयेत्–ज१,ज२;

नैवासौ कुम्भं कुर्यात्। अपि त्वनिष्टमन्यदिष्टघटादिकं विकलावयवं कार्यानुरूपयोगिनं वा पुनरकुम्भाकारवदसौ कुर्यात्। व्याध्याद्युपहतकुम्भकारवद्वा न कुर्यात्। न हि तस्य विनाशित्वं चात्मनो नित्यत्वात्तस्यैव हि कर्तृत्वात्। तद्यथा सकलावयवं कुम्भं दृष्ट्वा कार्यपृथुबुध्नोदरभागेषु व्याप्नुवतस्तत्र पर्वतादादिव कर्तृत्वासिद्धेः कुम्भकारस्वकार्यव्याप्तिमद्बुद्धिसौष्ठवकर्तृशक्तिरनुमीयते। न ह्यदृक्शक्तिरकर्तृशक्तिरव्याप्तिः संभ्रान्तिर्वा। तथानुपमसौन्दर्यसकलावयवं विश्वं दृष्ट्वापीश्वर-कार्यविश्वव्याप्तिमद्बुद्धिसौष्ठवकर्तृशक्तिरनुमीयते। ननु कुम्भकारस्य स्वकार्यादन्यत्र पुनरज्ञत्वाकर्तृत्वाव्यापकत्वयुक्तत्वात् अनीश्वर इति घटेश्वरवज्जगदीश्वरोऽपि अनीश्वरकर्तृकं जगत् कार्यत्वाद्यथा घट इति अनीश्वरत्वेनानुमीयते। सत्यम्। यदि तत्कार्यभोगमोक्षसाधनविश्वव्यतिरेकेण यत्किञ्चिदस्ति तदा तथा सम्यगनुमीयताम्। ननु पुनरन्यन्नास्तीति कुतः उच्यते। अस्तु तद्वस्तु किं भोगमोक्षसाधनमसाधनं वा। तत्र तद्यदिसाधनं कार्यकरणादिवत्तत् कार्यमेव। यद्यसाधनं तर्हि तस्मिन्निष्प्रयोजनेन तत्राज्ञानं शशविषाणादाविव भूषणमेव। यथाहुः-

हेयोपादेयतत्त्वस्य साभ्युपेयस्य वेदकः।
यः प्रमाणमसाविष्टो न तु सर्वस्य वेदक।। इति।।

ततः कुम्भादिष्वपि प्रयोजकत्वरूपं कर्तृत्वं विद्यत इति तत्कार्यत्वमपि न व्यभिचरन्तीति। सन्निवेशादिमत् सर्वगतत्वाविनाभूतानवच्छिन्नत्वादिविशिष्टानुपमविश्वलक्षणकार्यत्वात्। तत्कार्या-त्तत्कार्यव्यतिरिक्तेतरस्यासम्भवात्। तदज्ञत्वेनानीश्वरत्वं न सम्पाद्यमिति सर्वविषयव्याप्ति-मन्निरतिशयज्ञानक्रियेच्छाशक्तियुक्तत्वेन जगदीश्वरोऽनुमीयते। न हि पुनर्दृष्टान्तधर्मिणि विद्यमानाः साध्यधर्मिणि सर्वे सुप्रकघ्प्तिमन्तः। तथात्वे शब्दोऽनित्यः कृतकत्वात् घटवदित्यत्र घटे विद्यमानाः कुम्भकारकार्यत्वलौहित्यवारिवर्तुल्यादयो धर्माः शब्देऽपि किमिति न भवन्तीति किलेयं क्लृप्तिः सर्वानुमानोच्छेदकरी स्यात्। ततः साधनधर्मानुरूपतः साध्यं सुसिध्यति। तथाहि- यत्कार्यं धूमादि यथा येन प्रकारेण गिरिगुहागतत्वेन तदुत्संगवर्तित्वेन तच्छिखरनिविष्टत्वेन तदपरपार्श्ववर्तित्वेन वोपलब्धं यादृशं तार्णपर्णादिना स्वरूपेण विशिष्टं यावत् परिमाणं तनुतररेखाकारमम्बुदनिवहबहुलं वा तेन तत्कारणं वह्निलक्षणम्। तथा तादृशं तावदनुमीयते। तदुक्तं मृगेन्द्रे-

वैशिष्ट्यं कार्यवैशिष्ट्याद्दृष्टं लोकस्थितावपि।
यद्यथा यादृशं यावत् कार्यं तत् कारणं तथा।। इति।

अन्यथात्र न पर्वतवर्तिवह्निः धूमत्वात् यत्र धूमस्तत्र न पर्वतवर्तिवह्निर्यथा महानस इति। सर्वत्र विरुद्धाव्यभिचारित्वं प्रसज्यते। ननु एककर्तृकलक्षणधर्मिस्वरूपस्यानेक-कर्तृकलक्षणविपरीतसाधनोऽयं विरुद्धः। रथादीनामनेकतक्षनिर्मितपरस्परोपकारकानन्तावयव-निर्मितत्वदर्शनात्। तथाहुः-

सन्निवेशादिकं सर्वं बुद्धिमध्ये तु यद्यपि।
प्रसिद्धसन्निवेशादेः[१] एककारणता कुतः।। इति।

---

१. प्रसिद्धसन्निवेशादेः] ज३,ज४;प्रसिद्धं सन्निवेशादेः-ज१, ज२;

तदयुक्तम्। रथाद्यवयवानामनेकतक्षनिर्मापितानामपि एकस्थपतिबुद्ध्या विना रथाकारं भवितुं परस्परोपकार्योपकारकभावेनैव समुत्थानां गमनार्थक्रियाकर्तृकधर्मिरथादिद्रव्यारम्भकत्वेनोपपद्यत[१] एव। तत्रैकस्थपतिबुद्ध्यस्तित्वे कदाचिदपि न नोपपत्तिरिति पुनरिहापि च–

कलोद्बलितचौतन्यो विद्यादर्शित गोचरः।

रागेण रञ्जितः

इत्यादिश्रुतिसिद्धानामनन्तादिद्वारा शिवसंकल्पैकसिद्धजगदवयवकलादीनां जगदाकारं भवितुं परस्परोपकार्योपकारकभावेनैव समुत्थानां स्वरचितजगल्लक्षणभोगमोक्षसाधनार्थक्रियाकर्त्रेकधर्मिणो विशेषाद्रथादेरिवैककर्तृत्वमेव सिध्यति नत्वनेककर्तृत्वमित्यविरोधः। ननु नाकरणिका कृतिरिति अकरणस्य जगत्कारणं नोपपद्यते। सत्यम्। योगिन इवेच्छालक्षणक्रियाशक्तिरेव करणम्। अशरीरस्य तदिच्छामात्रेण कृत्यकरणमिति साधितं प्रागेव मृगेन्द्रादिषु सविस्तरमिति विस्तरभयादत्र न लिख्यते। नन्वीश्वरः इन्द्रियादिकरणयुक्तः कर्तृत्वात् यो यः कर्ता स इन्द्रियादिकरणयुक्तः। यथा कुलाल इति। तदयुक्तम्। संकल्पार्थक्रियाविशिष्टशक्तियुक्तत्वात् तल्लक्षणसन्निधिमात्रेण कर्तृत्वं भवति। स्वदेहस्पन्दकर्तर्यात्मनीवेति प्रागेव साधितमिति। ननु न त्वात्मनि स्वदेहस्पन्देतरकार्यकर्तृत्वम्। सत्यम्। अत एव शुद्धाशुद्धसूक्ष्मस्थूलात्मकं विश्वं भगवतः शरीरमिवोपचर्यत इति पूर्वमपि क्लृप्तिः कृता। अतः किलानुलोम्येन स्वार्थक्रियामिलितगलित्यर्थं[२] पुनरनन्तशरीरादिलक्षण-तत्स्वसूक्ष्मदेहस्पन्दद्वारा ऽधोऽशुद्धविश्वलक्षणस्वस्थूलदेहमप्यात्मेव स्पन्दयति।

—•—

(व्याख्या) एवं पतिसद्भावे द्विविधम्[३] अनुमानमुपन्यस्य आगमानुभवावपि प्रमाणमित्याह–

(वृत्तिः) ननु अनुमानाख्यप्रमाणगम्यत्वमस्योदितं न किं तदितरगम्यत्वमस्तीत्याह–

पतिज्ञानैकगम्योऽयं पतिः।

(व्याख्या) पत्युः[४] ज्ञानं पतिज्ञानम्[५]। तत्र ज्ञप्तिः ज्ञानमिति भावव्युत्पत्त्या पतिज्ञानशब्देन शिवविषयकानुभवः ज्ञायतेऽनेनेति[६] करणव्युत्पत्त्या[७] वेदागमोभयरूपं शास्त्रमपि पतिज्ञान-शब्देनोच्यते। तथा चायं पतिः पतिज्ञानैकगम्यः। एकश्चासौ गम्यश्चौकगम्यः पतिज्ञानगम्यः

---

१. गमनार्थक्रियाकर्तृकधर्मिरथादिद्रव्यारम्भकत्वेनोपपद्यते] ज१, ज२; गमनार्थक्रियाकर्त्रेकधर्मिरथादिद्रव्यारम्भकत्वं नोपपद्यते–ज३,ज४

२. स्वार्थक्रियामिलितगलित्यर्थं] ज१,ज२; स्वार्थक्रियामिलितये प्रातिलोम्येन स्वार्थक्रियागलितये चोर्ध्वशुद्धविश्वलक्षणस्वसूक्ष्मदेहं भगवान् स्पन्दयति। तदर्थक्रियामिलितगलित्यर्थं–ज३,ज४

३. द्विविधम्] मु,क२;विविधम्– क१;

४. पत्युः] क१; पतिज्ञानैकगम्योऽयं पतिः पत्युः– मु,क२

५. ज्ञानं पतिज्ञानं] मु,क२;ज्ञानं– क१;

६. ज्ञायतेऽनेनेति] क१,क२; ज्ञायतेऽनेनेति ज्ञानमिति– मु

७. करणव्युत्पत्त्या] मु;व्युत्पत्त्या– क१,क२;

पतिज्ञानैकगम्यः[१]। तत्राद्यस्तु[२] साक्षाद्गम्यः द्वितीयस्तु[३] मलनिवृत्तिद्वारा तदुपयोगितया यथा आगमानुभवाभ्यां सपरिकरः पतिः साक्षात् ज्ञायते न तथा अनुमानेनेति एकशब्दं प्रयुञ्जानस्य भावः। ननु सिद्धे ईश्वरे आगमानां प्रामाण्यं नोपपद्यते। कार्यान्वित एव पदार्थानां[४] सङ्गतिग्रहणात् सिद्धबोधिवाक्यस्य प्रमाणत्वानुपपत्तेः। तथा हि- वृद्धव्यवहारादेव सर्वत्र सङ्गतिग्रहः प्रसिद्धार्थसमभिव्याहारव्याकरणादीनां शक्तिग्राहकाणामपि पदान्तरव्युत्पत्तिसापेक्षत्वेन व्यवहारमूलकत्वात्। व्यवहारश्च प्रवृत्तिरूपः कार्यान्वितगोचर इति तेन लिङ्गेन अनुमीयमानं ज्ञानं प्रवृत्तिसमानविषयकमेव अनुमीयते। भिन्नविषयकज्ञानस्याप्रवर्तकत्वात्। अनुमितौ च स्वसमानविषयकज्ञाने पदानां शक्तिग्रहः पश्चात् आवापोद्वापाभ्यां पदविशेषशक्तिग्रहसमयेऽपि[५] प्रथमगृहीतकार्यान्वितत्वापरित्यागेनैव तत्र तत्रार्थे तत्तत्पदानां शक्तिग्रह इति सर्वत्र कार्यान्वित[६] एव शक्तिग्रहः। न चानन्यलभ्यः शब्दार्थ इति न्यायेन कार्यवाचकपदसमभिव्याहारा-देवान्वितशक्तिमात्रेणैव कार्यान्वितार्थबोधसम्भवात् न कार्यान्विते शक्तिरिति वाच्यम्।

आवापोद्वापाधीनतत्तत्पदनिष्ठतत्तदर्थशक्तिग्रहात्[७] पूर्वमन्यलभ्यत्वप्रतिसन्धानाभावेन[८] प्रथमगृहीतायाः कार्यान्वितविषयकशक्तेः पश्चात् परित्यागायोगात्। न चैवं घटोऽस्ति पटोऽस्तीति वाक्यान्वयबोधो[९] न स्यादिति वाच्यम्। तत्रापि कार्यवाचकपदमध्याहृत्यान्वयबोधसम्भवात् अगृहीतसंसर्गकार्यान्वितपदार्थोपस्थितिमात्रेण[१०] अन्वयबोधाभिमानादिष्टापत्तेः वा कार्याभावे कार्यान्वितपदार्थस्मरणमपि कथं स्यादिति चेन्न। प्रकृते कार्यान्विताभावेऽपि[११] कार्यान्वितपदार्थस्य अन्यत्रानुभूतस्यात्र स्मृतिसम्भवात्। न चैवं सिद्धार्थानामाख्यानाख्यायिकादीनां वैयर्थ्यम्। तेषामप्येवं प्रवर्तितव्यं न त्वेवमिति प्रवृत्तिनिवृत्तिकार्यपरत्वात्। ननु पुत्रस्ते जात इत्यादिसिद्धबोधिवाक्येऽपि[१२] व्युत्पत्तिः गृह्यते। तथा हि पुत्रस्ते जात इति वाक्यप्रयोगानन्तरं व्युत्पित्सुः बालः श्रोतृमुख-प्रसादचिह्नेनानुमिते[१३] हर्षे तद्धेतुपुत्रजन्मज्ञाने जनकतया[१४] चानुमिते तद्वाक्ये आवापोद्वापाभ्यां

---

१. पतिज्ञानगम्यः पतिज्ञानैकगम्यः] क१,क२; पतिज्ञानैकगम्यः- मु
२. तत्राद्यस्तु] क१,क२; तत्राद्यस्य- मु
३. द्वितीयस्तु] क१,क२; द्वितीयस्य तु- मु
४. पदानां] मु;पदार्थानां- क१,क२;
५. पदविशेषशक्तिग्रहसमयेऽपि] क१,क२; पदविशेषे शक्तिग्रहसमयेऽपि- मु
६. सर्वत्र कार्यान्वित] मु,क२;सर्वकार्यान्वित- क१;
७. आवापोद्वापाधीनतत्तत्पदनिष्ठतत्तदर्थशक्तिग्रहात्] मु,क२;आवापोद्वापनं तत्तत्पदनिष्ठतत्तदर्थग्रहात्- क१
८. पूर्वमन्यलभ्यत्वप्रतिसन्धानाभावेन] क१,क२; पूर्वमनन्यलभ्यत्वप्रतिसन्धानाभावेन- मु
९. वाक्यान्वयबोधो] मु;वाक्यादन्वयबोधो क१,क२;
१०. अगृहीतसंसर्गकार्यान्वितपदार्थोपस्थितिमात्रेण] मु;गृहीता संसर्गकार्यान्वितपदार्थोऽपि स्थितिमात्रेण- क१; अगृहीतासंसर्गकार्यान्वितपदार्थोपस्थितिमात्रेण-क२
११. कार्यान्विताभावेऽपि] क१; कार्यान्वयाभावेऽपि- मु,क२
१२. इत्यादिसिद्धबोधिवाक्येऽपि] मु,क२;इत्यादिसिद्धबोधवाक्येऽपि- क१;
१३. श्रोतृमुखप्रसादचिह्नेनानुमिते] मु; श्रोतुः मुख्यप्रसादचिह्नेनानुमितेः-क१; श्रोतुर्मुखप्रसादचिह्नेनानुमिते-क२
१४. हर्षे तद्धेतुपुत्रजन्मज्ञाने जनकतया] मु;हर्षतद्धेतुपुत्रजन्मज्ञानजनकतया- क१,क२;

सिद्धार्थेऽपि सङ्गतिं गृह्णाति। अतः कथं कार्यान्वित एव व्युत्पत्तिग्रह इति चेन्न[१]। हर्षस्य कारणान्तरादपि सम्भवेन पुत्रजन्मज्ञानस्यानेन परिशेषयितुमशक्यत्वात्। नन्वस्तु वा तत्रापि सङ्गतिग्रहः तथापीश्वरबोधकागमानां सिद्धार्थेश्वरबोधकत्वे प्रयोजनाभावात्[२] प्रयोजनपर्यवसानाय कार्यान्वित एव तात्पर्य अङ्गीकर्तव्य इति चेदत्रोच्यते। यद्यपि उत्तमवृद्धप्रयुक्तवाक्यश्रवणसमनन्तरं मध्यमवृद्धप्रवृत्तिमुपलभमानो बालस्तदीयप्रवृत्तिसमानविषयकं ज्ञानं[३] पदसमुदायजन्य-मित्यनुमिनोति। तथापि कार्यान्वितज्ञानस्य सङ्गतिग्रहोपायत्वमेव अङ्गीक्रियते। न तूपेयभूतसङ्गतिग्रहविषयकोटिनिविष्टत्वमपि[४] तत्र प्रमाणाभावात्। न च तत्र कार्यान्वितप्रतीतिरेव मानम्। कार्यवाचकपदसमभिव्याहारादपि तदुपपत्तेः। न च प्रथममनन्यलभ्यत्वप्रतिसन्धानाभावात् तत्रापि शक्तिग्रहः किं न स्यादिति वाच्यम्। तथात्वे पुत्रमानयेति वाक्यप्रयोगे कार्यान्वितत्वोपहितपुत्र इव[५] आनयनान्वितत्वोपहितेऽपि घटे शक्तिः कथं न गृह्येत[६]। यदि चावापोद्वापाभ्यां तत्तत्पदशक्तिग्रहे[७] आनयनपदलभ्यत्वप्रतिसन्धानान्नानयनान्वितत्वोपहितेऽपि शक्तिग्रह इत्युच्येत। तदा कार्यवाचकपदलभ्यत्वप्रतिसन्धानादेव न कार्यान्वितेऽपि शक्तिरिति तुल्यम्।

अथोच्येत पुत्रमानयेति वाक्यस्यानयनान्वयज्ञानजनकत्वमात्रं गृह्यते न तु तज्जनकताप्रयोजकशक्तिरपीति। तर्हि कार्यान्वयज्ञानं प्रति तद्वाक्यस्य जनकत्वमेव गृह्यताम् न तु शक्तिरपीति तुल्यत्वात्। किञ्च प्रथममन्यलभ्यत्वप्रतिसन्धानदशायां तत्र शक्तिग्रहेऽपि अनन्तरं गौरवानन्यलभ्यत्वप्रतिसन्धानाभ्यां[८] तत्परित्यागस्यापि उचितत्वात्। यथा प्रथमं व्याप्यतावच्छेदक-प्रकारज्ञानत्वस्य[९] पक्षधर्मताज्ञाननिरूपितकारणतावच्छेदकत्वे[१०] गृहीतेऽपि[११] अग्रे लाघवावतारात् व्याप्यत्वप्रकारकज्ञानत्वं कारणतावच्छेदकमिति स्वीकृत्य प्रथमगृहीतमपि त्यज्यते[१२]। यदुक्तं हर्षेण पुत्रजन्मज्ञानस्य परिशेषान्न सम्भवतीति तदपि न हर्षहेतूनामानन्त्येऽपि पुत्रजन्मज्ञानस्यैव परिशेषेण हेतुत्वकल्पनमुचितम्। गृहे पुत्रजन्म दृष्ट्वा तादृशेन वार्ताहारेण चौत्रसमीपं यातस्य व्युत्पित्सोः

---

१. चेन्न] मु;चेत्- क१,क२;
२. प्रयोजनाभावात्] क१,क२; पदमिदं मु कोशे न विद्यते।
३. बालस्तदीयप्रवृत्तिसमानविषयकं ज्ञानं] क१;क२; बालस्तदीयप्रवृत्तिसमानविषयकज्ञानं- मु
४. न तूपेयभूतसङ्गतिग्रहविषयकोटिनिविष्टत्वमपि] मु,क२; नन्वभिधेयभूतसङ्गतिग्रहविषय-कोटिनिविष्टत्वमपि- क१
५. कार्यान्वितत्वोपहितपुत्र इव] मु;कार्यान्वितत्वावहित इव- क१; कार्यान्वितत्वोपहित इव- क२
६. गृह्येत] मु,क२;गृह्यते- क१;
७. तत्तत्पदशक्तिग्रहे] मु;शक्तिग्रहे- क१,क२;
८. गौरवानन्यलभ्यत्वप्रतिसन्धानाभ्यां] मु;गौरवान्यलभ्यत्वप्रतिसन्धानाभ्यां- क१,क२;
९. व्याप्यतावच्छेदकप्रकारज्ञानत्वस्य] मु;व्याप्यतावच्छेदकप्रकारकज्ञानत्वस्य- क१,क२
१०. पक्षधर्मताज्ञाननिरूपितकारणतावच्छेदकत्वे] मु; पक्षधर्मताज्ञाननिष्ठकारणतावच्छेदकत्वे- क१; पक्षधर्मताज्ञाननिष्ठकारणतावच्छेदके-क२
११. गृहीतेऽपि] क१,क२; गृहीतमपि- मु
१२. त्यज्यते] मु,क२;व्यज्यते- क१;

तादृशवाक्यं शृण्वतः तस्यैवोपस्थितत्वात् अनुपस्थितानां हेतुत्वकल्पने गौरवात् मानाभावाच्च। तदुक्तम्–

दृष्टचौत्रसुतोत्पत्तेः तत्पादाङ्कितवाससा।
वार्ताहारेण ग्रातस्य परिशेषविनिश्चितेः। इति।

उपस्थितपरित्यागेन अनुपस्थितस्य हेतुत्वकल्पने प्रवृत्तिहेतुत्वेन अनुमितकार्यान्वितज्ञानेऽपि वाक्यस्यास्यैव जनकत्वनियमो न स्यात्। अन्यतोऽपि कार्यान्वितज्ञानसम्भवात्। यदप्युक्तं प्रयोजनपर्यवसानाय ईश्वरप्रतिपादकागमानां कार्यपरत्वं वक्तव्यमिति तदपि न मनोरमम्। ईश्वरमात्रप्रतिपादकत्वेऽपि तत्प्रतिपादनमात्रेणैव परमपुरुषार्थनिष्पत्तेरिति सङ्क्षेपः।

(वृत्तिः) अयं योगिप्रत्यक्षसिद्धः पुनरनुमानसिद्धो जगदीश्वरः। पुनः पतिज्ञानैकगम्यः तत्र चौकग्रहणमवधारणार्थं पतिज्ञानस्य शिवागमस्यैव एकस्य गम्यः प्रतिपत्तव्यः अवधारणफलम्। इतरेषां पशुशास्त्राणां अगोचर इति। तत्र शिवागमे समभिव्यक्त्या शिवदृक्शक्तिः साधकानां चिच्छक्तिं समर्थयति साधु शिवं दर्शयतीत्यर्थः। तच्चिच्छक्तिरूपप्रमाणाभिव्यञ्जकत्वात् तदभिव्यक्तिस्थान-शिवागमशब्देन सह साऽपि परशिवशक्तिः प्रमाणमित्युपचर्यते।

—•—

(व्याख्या) एतादृशोभयविज्ञानहेतुत्वेनापि तत्सिद्धिरित्याह–

तद्धेतुरेव च। इति।

(व्याख्या) पतिरेव शिवानुभवशास्त्रयोः हेतुः नान्य इत्यर्थः। शिवानुभवहेतुत्वमुक्तं निश्वासागमेदृ शिवार्कशक्तिदीधित्या समथह्लकृतचिद्दृशा।

शिवं शक्त्यादिभिः सार्धं पश्यत्यात्मा गतावृतिः। इति।

शास्त्रहेतुत्वमुक्तं मृगेन्द्रे–

सृष्टिकले महेशानः पुरुषार्थप्रसिद्धये।
विधत्ते विमलं ज्ञानं पञ्चस्रोतोभिलक्षितम्। इति।

प्रयोगश्च – वेदागमवाक्यानि स्वार्थयथार्थज्ञानवत्प्रणीतानि वाक्यत्वात् कालिदासादि-वाक्यवदिति। नन्विदं न[१] सङ्गच्छते अध्यापकेन सिद्धसाधनात्। शब्दाजन्यत्वेन[२] ज्ञानस्य विशेषितत्वेऽपि शिष्योपाध्यायोच्चारिते आधुनिकवेदविशेषे बाधः। शिष्यस्य वेदार्थविषय-ज्ञानाभावात् उपाध्यायस्य वेदार्थविषयकज्ञानसत्त्वेऽपि तस्य पूर्ववेदजन्यत्वेन शब्दाजन्यत्वाभावात्। स्मृत्यादौ व्यभिचारश्च। सर्गाद्यकालीनत्वस्य पक्षविशेषणत्वे[३] चाश्रयासिद्धिः। तावत् पदावलीज्ञानादेव वाक्यरचनोपपत्तौ अर्थज्ञानस्य तत्र अहेतुत्वेन[४] अप्रयोजकत्वाच्चेति चेत्,

---

१. न] मु,क२;च- क१;
२. शब्दाजन्यत्वेन] मु,क२;शब्दजन्यत्वेन- क१;
३. पक्षविशेषणत्वे] मु,क२;पक्षविशेषत्वे- क१;
४. अहेतुत्वेन] मु,क२;हेतुत्वेन- क१;

वेदागमवाक्यानि सजातीयोच्चारणानपेक्षस्वार्थयथार्थज्ञानवदुच्चरितजातीयानि प्रमाणवाक्यत्वात् कालिदासादिवाक्यवदिति प्रयोगो द्रष्टव्यः। आधुनिकवेदे शिष्याद्युच्चरिते तादृशवेदसजातीयत्वात् न बाधः। स्मृत्यादौ च न व्यभिचारः। स्मृतिप्रणेतृज्ञानस्य विजातीयवेदसापेक्षत्वेऽपि सजातीयसापेक्षत्वाभावात्। शुकोच्चारितवाक्ये संवादिनि पक्षसमत्वेन[1] न व्यभिचारः। विसंवादिनि तु तस्मिन् शिवप्रणीतत्वासम्भवेऽपि प्रमाणत्वगर्भितहेतोरेव अभावात् न व्यभिचारः[2]। न चाप्रयोजकत्वम्। ईदृशस्य महार्थस्य महत आगमस्य ऋग्वेदादेः अर्थज्ञानं विना केवलादृष्टादेव शुकादिवत् स्मरणाद्यसम्भवात्। महाजनपरिग्रहादेव प्रकरणादिशङ्काया अनुदयात्। अतः सिद्धं वेदागमयोः विशिष्टपुरुषप्रणीतत्वम्।

(वृत्तिः) ननु यद्येवं जगदीश्वरेण शिवेनागमः कृतः आगमाच्च शिवो ज्ञायत इति इतरेतराश्रयता स्यात्। तन्न। पतिर्जगदीश्वरशिवस्तद्धेतुः तस्यागमस्य कारणमेव चस्त्वर्थः। अयमाशयः- सदृशक्रिययोरेवेतरेतराश्रयतया शिवस्त्वागमस्य कर्ता आगमस्तु शिववस्तुज्ञापक इति शिवागमयोः कारकताज्ञापकतालक्षणक्रियात्वात् न सदृशक्रियत्वम्। लोके च यथा हि कश्चिदाहदेवदत्तो ऽहमायात इति। इतरस्तु तद्वाक्यादेव प्रतिपद्यते हन्त देवदत्तो ऽयमायात इति। न ह्यत्रेतरेतराश्रयता।

—•—

(व्याख्या) उक्तप्रमाणानां हिरण्यगर्भनारायणादिभिः अन्यथासिद्धिमाशङ्क्य परिहरति–

तन्त्रान्तरेषु ये सिद्धाः पशवो व्याप्त्यभावतः।। ९४।।
शोध्या बोध्याश्च ते तेन पशुत्वस्य व्यवस्थितेः।

(व्याख्या) तन्त्रान्तरेषु शास्त्रान्तरेषु ये ब्रह्मादयः सिद्धाः जगत्कारणत्वेन साधिताः ते ब्रह्मादयः व्याप्त्यभावतः शुद्धाशुद्धोभयविधाध्वव्याप्तिविधुरतया कुण्डलिन्यादिक्षोभकत्वासम्भवात् पशव एव। न तु पशुपतयः। तदुक्तं स्कान्दे–

ब्रह्मादिस्तम्बपर्यन्तं पशवः परिकीर्तिताः।
तेषां पतित्वात् विश्वेशः शिवः पशुपतिः स्मृतः।

ते ब्रह्मादयः तेन परमेश्वरेण आचार्येण शोध्याः षडध्वपूर्वकमलत्रयसम्बन्धात् विमोचनीयाः **बोध्याः** व्यक्तचिच्छक्तिकाः कर्तव्याः। कुत इत्याह[3] – पशुत्वस्येति। तेषु पशुत्वस्य आणवमलस्य विशेषेणावस्थितत्वादित्यर्थः।

(वृत्तिः) पशुशास्त्रगोचरत्वे किमित्यत आह- तन्त्रेत्यादि। तन्त्रान्तरेषु पाञ्चरात्रादिषु जगदीश्वरत्वाभिमानतः ये केचित् सिद्धाः प्रतिपादिताः पशवः कुतः तत्तन्त्रेषु तत्सिद्धेषु च व्याप्त्यभावतः न्यूनवृत्तित्वात् तत् तन्त्रेषु तावच्छिवतन्त्रसिद्धनिखिलवस्त्वभाषणात् तच्छिवतन्त्र-व्याप्त्यभावः। ततो न्यूनवृत्त्यभिधायकत्वम्। ब्रह्मादिदेवयोनिवर्गः कर्तेति सेश्वरसांख्याः शरीरादि

---

१. संवादिनि पक्षसमत्वेन] क१,क२; संवादवत् पक्षसमानत्वेन- मु
२. अभावात् न व्यभिचारः, मु;अभावात्- क१,क२;
३. इत्यत आह] मु,क२;इत्याह- क१;

संयुक्तो प्रकृतिलोकनिवासी हरिरिति पाञ्चरात्राः मनःसंयोगजज्ञानयुक्तः स ईश्वर इति नैयायिकाः। बुद्धिसंयोगजज्ञानयुक्तः स ईश्वर इति सेश्वरसांख्यविशेषपातञ्जलाः। सदेही स ईश्वर इति पौराणिकाः। जीवब्रह्माद्वैती जगदीश्वर इति वेदान्तविदः। तत्सिद्धेषु तेष्वस्मदादिवदुपाधियुक्तत्वाच्छास्त्राणां न्यूनवृत्तित्वादपि तदतिक्रान्तनिरतिशयज्ञानक्रियायुक्ताः सम्भवन्तीति व्याप्त्यभावः। असम्पूर्ण-ज्ञत्वकर्तृत्वं ततो व्याप्त्यभावतस्ते तन्त्रान्तरसिद्धाः कर्तारः पशवः सिद्धाः। इत्थं पशुत्वस्य तदसम्पूर्णहेतोर्मलस्य व्यवस्थितेर्निश्चयात्[1] ते तत्र सिद्धाः। तेन शिवशास्त्रसिद्धकर्त्रा शिवेन शोध्या दीक्षाव्यापारकौशल्येन मायाकर्ममलेभ्यः शुद्धविद्याधो मोचनीयाः। तदनन्तरं शुद्धविद्यातत्त्वादूर्ध्वं बोध्याः स्थूलसूक्ष्मपरलक्षणशिवत्वाभिव्यक्तिभिः सह संयोज्याः। असद्योनिर्वाणदीक्षायां सर्वात्मना शिवत्वव्यक्तेरकरणात्। शिवशास्त्रोपदेशपुरस्सरं तदनन्तरकर्तव्यानुष्ठानद्वारा प्रत्यहं बन्धक्षयपूर्विकया तया सह संयोज्याः।

(व्याख्या) एवमियता प्रबन्धेन पशुपतिशब्दाभिधेयस्य परमकारणत्वलक्षणस्य परब्रह्मणः परमशिवस्य[2] पतित्वं सिद्धम्। तदपरे न क्षमन्ते। तत्रादौ हिरण्यगर्भपरतत्त्ववादिनामयमाशयः।

एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः।
भोगिशय्यागतः शेते त्रैलोक्यज्ञानबृंहितः। इति।

अत्र नारायणात्मक इति चतुर्मुखस्य ब्रह्मणः नारायणरूपतया सृष्टिपूर्वकाले विद्यमानत्वेन परमकारणत्वमवगम्यते। तथोक्तं रामायणेऽपि–

वस्तु निर्गत्य वै ब्रह्मा योगीभूत्वा महाप्रभुः।

सिसृक्षुः पृथिवीं वायुं पर्वतांश्च महीरुहान्। इति हिरण्यगर्भस्य जगत्स्रष्टृत्वं प्रतीयते।

यजुर्वेदोपबृंहणे च प्रजापतेः सर्वाभ्यन्तरत्वश्रवणात् अन्तर्यामित्वप्रतीतेः। पूर्वकल्पसृष्टसूर्य-चन्द्रादिसजातीयसूर्यादिस्रष्टृत्वस्य धातृशब्दार्थे श्रवणात्। धातृशब्दस्य च चतुर्मुखे रूढत्वात्[3]। प्रजापतिशब्दार्थस्य जगत्सृष्टिविषयकामनाश्रवणाच्च[4]। जगज्जन्मादिकारणत्वेन स एव परं ब्रह्म। न च प्रजानां पतिः प्रजापतिरिति योगव्युत्पत्त्या पशुपतिरेवोच्यते। धातृशब्देनापि सृष्टिविधातृत्वेन स एवोच्यत इति वाच्यम्। रूढिर्योगमपहरतिति न्यायेन भिन्नविषयकपशुपतिनिष्ठयोगापेक्षया प्रजापतिशब्दस्य ब्रह्मनिष्ठरूढेः बलत्वात्[5]। अस्य च न्यायस्य पूर्वतन्त्रे रथकाराधिकरणे व्युत्पन्नत्वात्। प्रकृते च रूढिपरित्यागे हेतोरभावात्। तथा च प्रत्यक्षश्रुत्युपबृंहितपुराणवाक्यैः पाञ्चरात्रादीनां विष्ण्वादेः[6] कर्तृत्वपरतत्त्वप्रतिपादकागमानां स्मृत्यनवकाशाधिकरणन्यायेन साङ्ख्यादिस्मृतिवत् बाध्यत्वमिति। तदयुक्तम्।

---

१. व्यवस्थितेर्निश्चयात्] ज३,ज४;व्यवस्थ .... द्वयात्-ज१,ज्ज्ञ; व्यवस्थितेर्निश्चयात्-ज३,ज४
२. परमशिवस्य] क१,क२; परशिवस्य- मु
३. चतुर्मुखे रूढत्वात्] क१; चतुर्मुखरूढत्वात्- मु,क२
४. जगत्सृष्टिविषयकामनाश्रवणाच्च] क१; जगत्सृष्टिविषयकाम्नानश्रवणाच्च- मु; जगत्सृष्टिविषयकानुमानश्रवणाच्च-क२
५. बलवत्वात्] मु;बलत्वात्- क१,क२;
६. विष्ण्वादेः] क१,क२; विधेः- मु

अप एव ससर्जादौ तासु वीर्यमपासृजत्।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।

इति मनुवचनेन श्वेताश्वतरतैत्तिरीयकप्रत्यक्षश्रुतिमूलेन हिरण्यगर्भस्य सृज्यत्वप्रतीतेः तस्य सर्वकर्तृत्वानुपपत्तेः। एवम् अथर्वशिरोवाक्यश्रुतिमूललिङ्गपुराणवचनेन[1] अपि शिवस्यैव सर्वकर्तृता चतुर्मुखस्य तच्छेषत्वं च अवगम्यते। तथा च सूतः–

तमपृच्छंस्ततो देवाः को भवानिति मोहिताः।
सोऽब्रवीत् भगवान् रुद्रो ह्यहमेकः पुरातनः।
आसं प्रथममेवाहं वर्तामि च सुरोत्तमाः।
भविष्यामि च लोकेऽस्मिन् मत्तो नान्योऽस्ति कश्चन।
नित्यान्नित्योहम्[2] अनघः ब्रह्माहं ब्रह्मणस्पतिः। इति।

एकार्णव इत्यादिपुराणवचनं तु अवान्तरप्रलयावस्थायित्वमेव हिरण्यगर्भस्य प्रतिपादयति। न तु महाप्रलयावस्थायित्वम्। महाप्रलये भूतस्थित्यभावेन महार्णवस्यैवाभावात् शायित्वानुपपत्तेः[3]। ननु शिवस्यापि हिरण्यगर्भोत्पन्नत्वश्रवणात् कथमस्य सर्वकर्तृत्वम्। तथा च विष्णुपुराणम्[4]–

प्रादुरासीत् प्रभोरङ्गे कुमारो नीललोहितः।
रुरोद सुस्वरं सोऽथ प्राद्रवत् ब्रह्मसत्तम।
किं करोषीति तं ब्रह्मा रुदन्तं प्रत्युवाच वै।
नाम देहीति तं सोऽथ प्रत्युवाच प्रजापतिः।

रुद्रस्त्वं देव नामासि। इत्यादिवचनादिति[5] चेन्मैवम्। प्रादुरासीदिति पदस्वारस्येन स्वातन्त्र्यप्रतीतेः स्वेच्छाविर्भावपरत्वात् स्वेच्छयाविर्भावश्च वरदानेन। तथा चादित्यपुराणे पञ्चविंशाध्याये चतुर्मुखवाक्यम्–

त्वामेव पुत्रमिच्छामि त्वया वा सदृशं सुतम्।
त्वन्मायामोहितः शम्भो नावैमि त्वां परं शिवम्।

ईश्वर उवाच–

अहमंशेन भविता पुत्रस्तव पितामह।
ज्ञानं मद्विषयं क्षिप्रं भविष्यति तवानघ। इति।

---

१. अथर्वशिरोवाक्यश्रुतिमूललिङ्गपुराणवचनेन] क१,क२; अथर्वश्रुतिशिरोवाक्यश्रुतिमूल-लिङ्गपुराणवचनेन- मु
२. नित्योऽनित्योहम्] मु;नित्यान्नित्योहम्- क१,क२;
३. तच्छायित्वानुपपत्तेः] मु,क२; शायित्वानुपपत्तेः- क१
४. विष्णुपुराणम्] मु,क२;विष्णुपुराणे- क१;
५. इत्यादिवचनादिति] मु;इति- क१,क२;

ननु मास्तु[१] हिरण्यगर्भस्य तत्र तत्र श्रुत्यादिषु सृज्यत्वप्रतिपादनेन सकलजगत्कारणत्वं नारायणस्य तु स्यात्। तथा हि–

एको नारायणस्त्वासीत् न ब्रह्मा न च शङ्करः।

नेन्द्रसूर्यौ न च गुहो न सोमो न विनायकः। इति पाञ्चरात्रसंहितान्तर्गतप्रकाशिकावर्तिवचनतुल्यार्थकेन नारायणोपनिषद्वचनेन इतरनिराकरणपूर्वकं सृष्टिप्राक्कालावस्थायित्वप्रतिपादकमुखेन[२] नारायणस्यैव जगत्कारणत्वप्रतिपादनात्। एवं च

सृष्टेस्तु प्रागिदं सर्वं सदेवासीत् कारणम्।

इति सामान्येन श्रूयमाणस्कान्दवचनमूलभूतछान्दोग्योपनिषदि[३] प्रतिपाद्यमानजगत्कारणस्यापि छागपशुन्यायेन नारायणत्वेनैव निर्णयः।

ननु

सोऽब्रवीद्भगवान् रुद्रो ह्यहमेकः पुरातन इति लैङ्गिकपुराणस्थितवचनसमानार्थकाथर्वशिरोवचनेन

अव्यक्तमभवत् स्थाणुः शिवः परमकारणम्।
सत्कार्यकरणोपेतः[४] ऋषिर्विश्वाधिकः प्रभुः।
देवानां प्रथमं देवं जायमानं मुखाम्बुजात्।
ददर्श चाग्रे ब्रह्माणं जायमानम्[५] अवैक्षत।
दृष्टो रुद्रेण देवेशः ससर्ज सकलं जगत्।
इत्यपि लैङ्गवचनसमानार्थेन तैत्तिरीयमन्त्रेण
यस्मात् सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम्।
सर्वभूतेन्द्रियैः सर्वैः प्रथमं सम्प्रसूयते।
एष देवो[६] महादेवो विज्ञेयस्तु महेश्वरः।
न तस्य परमं किञ्चित् परं समधिगम्यते।
अनेन चित्रकृत्येन प्रथमं सृज्यते जगत्[७]।
अन्तकाले पुनश्चैतत् तस्मिन् प्रलयमेष्यति।

---

१. मास्तु] क१,क२; मास्तु तर्हि– मु
२. सृष्टिप्राक्कालावस्थायित्वप्रतिपादकमुखेन] क१,क२; सृष्टिप्राक्कालावस्थायित्वप्रतिपादनमुखेन– मु
३. श्रूयमाणस्कान्दवचनमूलभूतछान्दोग्योपनिषदि] मु;श्रूयमाणस्कान्दवचनमूलवचनभूतछान्दोग्योपनिषदि– क१,क२
४. सत्कार्यकरणोपेतः, क१,क२; सत्कार्यकारणोपेतः– मु
५. जायमानमवैक्षत] क१; आज्ञाय तम्–मु; चाज्ञया तमवैक्षत–क२
६. एष देवो] मु,क२;देवदेवो– क१;
७. जगत्] मु,क२;महत्– क१;

इति शिवपुराणस्थवचनमूलभूतेनाथर्वशिखावचनेन परमशिवस्यापि जगत्कारणत्वेन प्रतिपादनात् कथं छागपशुन्यायेन सामान्यवचनानां नारायणैकपरत्वनिर्णय इति चेन्न।

तत्र तावत् अथर्वशिरोवचनस्य रुद्रस्य[१] सर्वाद्यत्वप्रतिपादकस्य 'शास्त्रदृष्ट्या तूपदेशो वामदेववत्' इति न्यायेन

विष्णुरात्मा भगवतो रुद्रस्यामिततेजसः इति भारतवचनमूलभूतसुबालोपनिषद्वचनावगतरुद्रान्तर्यामिभावनारायणपरत्वेन रुद्रपरत्वाभावात्। अन्यथा तत्रत्य तत्पदस्य नित्यपरोक्षवाचिनः नित्यापरोक्षरुद्रप्रत्यगात्मपरामर्शकत्वानुपपत्तेः। रुद्रपरत्वे अहंपदोत्तमपुरुषप्रयोगयोरापत्तेश्च। न च तत्पूर्ववाक्यस्थित इत्यन्तस्यैव रुद्रवाक्यत्वेनोपरितनवाक्यस्य श्रुतिवचनत्वेन तदुपपत्तिरिति वाच्यम्। तदुपर्यपि रुद्रवचनानुवृत्तिश्रवणेन पूर्ववाक्यस्थितेतिशब्दस्य हेतुत्वार्थकत्वेन[२] समाप्तिद्योतकत्वाभावात्।

न च प्रकृतिवाचिनस्तत्पदस्याप्रकृतान्तर्यामिपरत्वं कथमिति वाच्यम्। देवमनुष्यादिशब्दवत् पूर्ववाक्य-स्थिताहम्पदेनैव रुद्रात्मकशरीरस्य तस्य शक्त्यैवोपस्थापितत्वात्[३]। तैत्तिरीयमन्त्रस्यापि यत्पद-घटितत्वेन अवगतानुवादस्य[४] पुरोवादापेक्षिणः ब्रह्मजनिप्रतिपादकसुबालोपनिषद्रूप-पुरोवादैकवाक्यतया नारायणपरत्वमेव। रुद्रशब्दोऽपि तन्मन्त्रस्थितः[५] संसाररुजः द्रावकत्वेन योगेन नारायणपर एव। यस्मात् सर्वमिदं भूतम् इत्यादिवचनमूलभूतमथर्वशिखावचनमपि नारायणावतारविशेषपरम्[६] एव। उक्तैः बहुभिः कारणवाक्यैः[७] सर्वजगत्कारणत्वेन निर्णीतनारायणोत्पत्तिपरत्वासम्भवात्। प्रत्युत रुद्रस्य नारायणोपनिषद्वचनेन नारायणसृज्यत्वप्रतिपादनेन तत्स्रष्टृत्वानुपपत्तेश्च[८]। न च तदेव वचनं रुद्रावतारपरं किं न स्यादिति वाच्यम्। मुख्यबाधकाभावात्। नारायणस्य तु[९] पुरुषसूक्तादिगताजायमानत्वश्रुतिबाधितत्वेनावतारपरत्वौचित्यात् अथर्वशिखावचनस्य। किं च रुद्रस्य नारायणोपनिषदादौ नारायणादुत्पत्तिश्रवणेन तस्य सर्वकारणतावेदकवाक्यानां[१०] सङ्कोचस्य शिवादिनाम्नां विष्णुपरत्वस्य वा कल्पयितुमुचितत्वात्। न च विष्ण्वादेरपि[११] अथर्वशिखादौ रुद्रादुत्पत्तिश्रवणेन तत्कारणतावेदकवाक्यानां तन्नाम्नां वा सङ्कोचः शिवपरत्वं वा

---

१. रुद्रस्य] क१,क२; पदमिदं मु कोशे न विद्यते।
२. हेतुत्वार्थकत्वेन] मु,क२;हेत्वर्थेन- क१;
३. तस्य शक्त्यैवोपस्थापितत्वात्] मु,क२;शक्त्यैवोपस्थापितत्वात्- क१;
४. अवगतानुवादस्य] क१; अवगतानुवादकस्य- मु; अवगतानुवादभावस्य-क२
५. तन्मन्त्रस्थितः] क१,क२; तत्रस्थितः- मु
६. नारायणावतारविशेषपरम्] क१,क२; नारायणावतारविशेषोत्पत्तिप्रतिपादनपरम्- मु
७. कारणवाक्यैः] क१,क२; कार्यकारणवाक्यैः- मु
८. तत्स्रष्टृत्वानुपपत्तेश्च] क१; तत्सृष्टत्वानुपपत्तेश्च- मु,क२
९. नारायणस्य तु] मु,क२;नारायणस्य- क१;
१०. सर्वकारणतावेदकवाक्यानां] मु,क२;कारणतावेदकवाक्यानां- क१;
११. विष्ण्वादेरपि] क१; नारायणादेरपि- मु; विष्णोरपि-क२

कुतो न कल्प्यत[१] इति वाच्यम्। विष्णूत्पत्तिप्रतिपादकस्योत्तरनारायणस्थिताजायमानस्यैवानेकधा जायमानत्वप्रतिपादकवचनानुरोधेनावतारपरत्वकल्पनात्। नन्वेवमथर्वशिखावचने शिवात् रुद्रस्याप्युत्पत्तिः श्रूयते। न च स्वस्यैव स्वस्मादुत्पत्तिः सम्भवतीति तदुत्पत्तिकथनं संहाररुद्रपरमित्यवश्यमभ्युपगन्तव्यम्। एवं च सम्प्रतिपन्नोत्पत्तिकरुद्रस्यैव नारायणोपनिषदि रुद्रशब्देन प्रत्यभिज्ञानात् तस्यैव नारायणात् उत्पत्तिप्रतिपादकं पर्यवस्यत् नारायणोपनिषद्वचनम्। शिवकारणतावेदकवाक्यस्य नान्यथाभावं कल्पयितुं कल्पत इति शिवकारणताप्रतिपादकवाक्यमेव विष्णोः सर्वकारणताप्रतिपादकवाक्यसङ्कोचं विष्णुनाम्नां शिवपरत्वं वा कल्पयितुं कल्पत[२] इति चेन्मैवम्। शिवस्य सर्वकारणताप्रतिपादकवाक्यस्य विष्णोः सर्वकारणताप्रतिपादकवाक्यस्य च उभयोरपि अबाधेनैव उपपत्तिसम्भवे अन्यतरस्य बाधो[३] न न्यायः। सङ्कोचस्यापि एकदेशस्य बाधत्वात्[४]। स चोभयाबाधः। विष्णुनाम्नां योगवृत्त्या शिवपरत्वेन वा शिवनाम्नां योगवृत्त्या विष्णुपरत्वेन वा सम्भवति। रूढ्या तत्तत्परत्वे त्वन्यतरबाधस्य दुष्परिहरत्वात्। तथा च शिवादिनाम्नां सर्वेषां योगवृत्त्या विष्णुपरत्वमेव कल्पनीयं सम्भवति[५]। विष्णुनाम्नामपि अन्येषां योगवृत्त्या शिवपरत्वे सम्भवेऽपि नारायणनाम्नस्तु न सम्भवति।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं प्रोक्तं तेन नारायणः स्मृतः।

इति मनुना जलशायिनि कृतनिर्वचनस्य नारायणनाम्नः 'पूर्वपदात् संज्ञायामक' इति सूत्रेण संज्ञायामेव कृतणत्वस्य योगेनान्यपरतायां णत्वाभावप्रसङ्गेन तदसम्भवात्। न च नारायणपदस्य लक्षणया शिवपरत्वे णत्वोपपत्तिरिति वाच्यम्। तथा[६] मुख्यार्थबाधप्रसङ्गात्। अबाधेनैवोपपत्तौ बाधस्यान्याय्यत्वादित्युक्तत्वात्। ननु योगस्य विलम्बितत्वेन शिवादिनाम्नामपि रूढिपूर्वकलक्षणयैव नारायणपरत्वं कल्पनीयमित्यन्यतरबाधस्यावर्जनीयतया नारायणादिनाम्नामेव लक्षणया शिवपरत्वम् कुतो न स्यादिति चेत्, न। तावत् वर्णोपस्थित्या यत्र समुदायशक्त्युपस्थितिकाले[७] अवयवशक्तीनाम् अपि उपस्थितिसम्भवः तत्र[८] समुदायशक्त्यपेक्षया विलम्बायोगात्। न चैवं सति रूढेः योगापहारकत्वकथैवोत्सन्ना[९] स्यादिति वाच्यम्। पदान्तरोपस्थापितान्वयात् पूर्वमेव सामग्रीबलेन योगस्य रूढ्यर्थान्वितस्वार्थबोधकत्वनियमेन केवलयौगिकार्थेऽप्रवृत्तेरेवापहारशब्दार्थत्वात्[१०]। न

---

१. कल्प्यते] मु,क२;कल्पित- क१;
२. कल्पते] मु;कल्प्यत- क१,क२;
३. अन्यतरस्य बाधो] क१,क२; अन्यतरबाधो- मु
४. एकदेशस्य बाधत्वात्] क१,क२; एकदेशबाधत्वात्- मु
५. सम्भवति] क१; सम्भवात्- मु; असम्भवात्-क२
६. तथा] क१,क२; तदा- मु
७. यत्र समुदायशक्त्युपस्थितिकाले] मु,क२;यदुक्तसमुदायशक्त्युपस्थितिकाले- क१
८. उपस्थितिसम्भवः तत्र] मु;उपस्थितिसम्भवात्- क१,क२;
९. योगापहारकत्वकथैवोत्सन्ना] मु;योगापहारत्वकथैवोक्त्या न- क१; योगापहारत्वकथैवोत्सर्गं न-क२
१०. अप्रवृत्तेरेवापहारशब्दार्थत्वात्] मु,क२; प्रकृतेरेव उपहारशब्दार्थत्वात्- क१

चावयवशक्तिसमुदायशक्त्योस्तुल्यकालोपस्थितावपि रूढेः बलवत्तया योगशक्तिः न व्याप्रियत इति वाच्यम्। अनन्यतात्पर्यके नारायणपदे जाग्रति रूढशक्तेरत्र[१] दुर्बलतया अनुन्मेषात्। किंच पुरुषसूक्ते महापुरुषनिर्दिष्टस्य[२] नारायणस्यैव अन्यनिरासेन मोक्षहेतुज्ञानविषयत्वप्रतिपादनाच्च शिवात् विष्णोरुत्कर्षः।

न च शिवपरतया निणह्नतश्वेताश्वतरप्रत्यभिज्ञाबलेन पुरुषसूक्तं शिवपरमिति वाच्यम्। तत्रैतद्वचन-प्रत्यभिज्ञानेन वैपरीत्यस्यापि सुवचत्वात्। न च तत्रोपसंहारे तत्पदपरामृष्टात्[३] नारायणात् उत्तरस्य शिवस्य मोक्षहेतुज्ञानविषयत्वप्रतिपादनात् नारायणपदं तत्प्रतिपादनपरं न सम्भवतीति[४] वाच्यम्। उपक्रमेणासंजातविरोधितया प्रबलेन नारायणपरत्वनिर्णये उपसंहारस्यापि तत्पदनिर्दिष्टधिया उत्तरत्वप्रतिपादकत्वमुखेन[५] नारायण एव तत्प्रतिपादनपरत्वौचित्यात्। प्रतिपादितं[६] च पूर्वतन्त्रे उपक्रमस्य प्राबल्यं वेदोपक्रमाधिकरणे। किंच,

पुरिसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषो हरिः।
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते।
भगवानिति शब्दोऽयं तथा पुरुष इत्यपि।
निरुपाधी च वर्तेते वासुदेवे सनातने।

इति पुरुषशब्दस्य नारायणैकपरत्वात् बोधायनादौ तदाराधन एव पुरुषसूक्तस्य विनियोगात्। सर्वव्यापी भुवस्पर्श्यपि[७] अत्यतिष्ठद्दशाङ्गुलम्[८] इति विष्णुपुराणे पुरुषसूक्तार्थस्य विष्णुपरतया प्रतिपादनाच्च पुरुषसूक्तमपि विष्ण्वेकपरम्[९] इत्यवसीयते। अपि च बह्वृचब्राह्मणे देवानां मध्ये अग्नेरवमत्वस्य विष्णोः परमत्वस्य च कण्ठरवेण प्रतिपादनात् विष्णुरेव सर्वोत्तमः। तथा विष्णुपुराणे[१०]–

विष्णोः सकाशादुद्भूतं जगत्तत्रैव च स्थितम्।
स्थितिसंयमकर्तासौ जगतोऽस्य जगच्च सः।

महाभारते च–

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे।

---

१. रूढशक्तेरत्र] क१,क२; शिवादिनाम्नां रूढिशक्तेरत्र- मु
२. महापुरुषशब्दनिर्दिष्टस्य] मु,क२;महापुरुषनिर्दिष्टस्य- क१;
३. तत्पदपरामृष्टात्] क१,क२; तत्पदपरामृष्टस्य- मु
४. भवतीति] मु,क२;सम्भवतीति- क१
५. उत्तरत्वप्रतिपादकमुखेन] मु,क२;उत्तरत्वप्रतिपादकत्वमुखेन- क१;
६. प्रतिपादितं] क१; व्युत्पादितं- मु,क२
७. भुवस्पर्शात्] मु,क२;भुवस्पर्श्यपि- क१;
८. अत्यतिष्ठद्दशाङ्गुलम्] क१,क२; व्यत्यतिष्ठद्दशाङ्गुलम्- मु
९. विष्ण्वेकपरम्] मु; विष्ण्वेकपरत्वम्- क१; विष्ण्वैकपरत्वम्-क२
१०. विष्णुपुराणे] मु,क२;विष्णुपुराणेऽपि- क१;

यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये।
असृजत् सलिलं पूर्वं स तु नारायणः प्रभुः। इति।

एवमन्येष्वपि पुराणेषु सर्वकारणत्वमोक्षहेतुज्ञानविषयत्वसार्वात्म्यत्वप्रतिपादकमुखेन[१] साक्षाच्च विष्णोरेव सर्वोत्तमत्वमुपवर्ण्यते।

नन्वेवं शिवस्य सर्वकारणत्वप्रतिपादकानां स्कान्दवायव्यादित्यलैङ्गादिपुराणानां का गतिरिति चेत्, न कापि गतिः। तेषां तामसत्वेनाप्रमाणत्वात्। पुराणानां तामसत्वादिविभागश्च तत्तद्गुण-प्रचुरकल्पविभागप्रतिपादनमुखेन[२] मात्स्यपुराणे निरूपितः। यथा

सङ्कीर्णाः सात्त्विकाश्चैव राजसास्तामसास्तथा। इति।

तत्रैव च,

यस्मिन् कल्पे तु यत् प्रोक्तं पुराणं ब्रह्मणा पुरा।
तस्य तस्य च माहात्म्यं तत्स्वरूपेण वर्ण्यते।
अग्नेः शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते।
राजसेषु च माहात्म्यम् अधिकं ब्रह्मणो विदुः।
सात्त्विकेषु च कल्पेषु माहात्म्यमधिकं हरेः।
सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते।

इति सत्त्वादिगुणबहुलेन ब्रह्मणा तत्तद्गुणप्रचुरकल्पप्रोक्तेषु पुराणेषु तत्तद्गुणाधिकतत्त्वानां माहात्म्यं वर्ण्यत इति सामान्यविशेषाभ्यां प्रतिपादनात् ब्रह्मणोऽपि प्रथमजीवत्वात् तस्यापि केषुचित् अहस्सु[३] सत्त्वमुद्रिक्तं केषुचिद्रजः केषुचित्तमः। तथा च तमोगुणबहुलेन[४] ब्रह्मणा कृतं शिवमाहात्म्यप्रतिपादकं पुराणं सात्त्विकप्रमाणविरुद्धांशे अप्रमाणम्।

प्रमादमोहौ तमसो भवतो ज्ञानमेव च इति गीतावचनात् ब्रह्मकृतस्यैव पुराणस्य सर्वैरपि पुराणकर्तृभिः ब्रह्मणः सकाशाद् अधीत्य[५] संक्षिप्य करणात्। तेषां[६] श्रूयमाणानां शिवविषयाणां सात्त्विकपुराणविरुद्धांशे[७] अप्रमाणम्[८] एव। तथा चोक्तम्-

कथयामि यथापूर्वं दक्षाद्यैर्मुनिसत्तमैः।
पृष्टः प्रोवाच भगवान् अब्जयोनिः पितामहः।

---

१. सर्वकारणत्वमोक्षहेतुज्ञानविषयत्वसार्वात्म्यत्वप्रतिपादकमुखेन] क१; सर्वकारणत्वमोक्षहेतुज्ञान-विषयत्वसार्वात्म्यप्रतिपादनमुखेन- मु; सर्वकारणत्वमोक्षहेतुज्ञानविषयत्वसर्वार्थ्यप्रतिपादकमुखेन- क२
२. तत्तद्गुणप्रचुरकल्पविभागप्रतिपादनमुखेन] क१,क२; तत्तद्गुणप्रचुरकल्पविभागप्रतिपादकमुखेन- मु
३. अहस्सु] मु,क२;रजसा- क१;
४. तमोगुणबहुलेन] क१; तमोगुणबलेन- मु,क२
५. अधीत्य] क१,क२; लब्ध्वा- मु
६. तेषां] क१,क२; तेषां तेषां- मु
७. सात्त्विकपुराणविरुद्धांशे] क१,क२; सात्त्विकपुरुषांशे- मु
८. अप्रमाणम्] क१; अप्रमाण्यम्- मु,क२

इति ब्रह्मणः सकाशाद्दक्षाद्यैः यथाश्रुतं तेभ्यश्च मया यथाश्रुतं तथा कथयामीत्यर्थः।

एवं प्राप्तेऽभिधीयते–यत्तावदुक्तमथर्वशिरो वचनं रुद्रान्तर्यामिनारायणपरमिति, तन्न। उपक्रमे भगवान् क इति देवानां रुद्रसाधारणस्वरूपप्रश्ने[१] अन्तर्यामिणो जगत्कारणत्वप्रतिपादनरूपस्य उत्तरस्य व्यधिकरणत्वात्। न चोत्तरानुसारेण प्रश्नोऽप्यन्तर्यामिपर एवेति वाच्यम्। उपक्रमस्या-संजातविरोधित्वेन प्रबलत्वात् तद्विरोधिनः उत्तरवाक्यस्यैव उपक्रमानुगुण्येन वेदो वा प्रायदर्शनादिति न्यायेन तदनुसारेणैव नेयत्वात्। न चान्तर्यामिपरत्वाभावे परोक्षार्थकतच्छब्दप्रयोगानुपपत्तिः। श्रुतिवचनत्वेन रुद्रवचनत्वाभावात्। न च पश्चादपि[२] रुद्रवाक्यानुवृत्तेर्मध्ये कथं तस्य श्रुतिवचनत्वमिति चेन्न। इतिकरणस्य परिसमाप्त्यर्थतया उपरितनरुद्रवाक्यस्य पूर्वतन-वाक्येनान्वयान्तरमेव[३] व्यवधानेन अन्वयाङ्गीकारात्। नन्वेवमपि भगवान् क इति पृष्टेन रुद्रेण स्वस्य जगत्कारणत्वादिवदन्तर्यामित्वस्यापि तेनैव प्रतिपादयितुं योग्यस्य कथं श्रुत्या प्रतिपादनमिति चेन्न। तस्य वाक्यस्यान्तर्धानपर्यायनिजवर्णरूपप्रवेशार्थकत्वेन[४] अन्तर्यामित्वार्थकत्वाभावात्। इत्थमेव च स्कन्दपुराणे व्याख्यातम्[५]। तथा हि–

पुरा विष्ण्वादयो देवाः सम्भूयाखिलकारणम्[६]।
विचार्य जगतो विप्राः संशयाविष्टचेतसः।
अतीव सुखदं सिद्धं रौद्रं लोकं समागमन्।
तेषां मध्ये महादेवः संसारद्रावको हरः।
रुद्रः परमकारुण्यात् स्वयमाविरभूद्द्विजाः।
अदृष्टपूर्वं तं दृष्ट्वा देवा विष्णुपुरोगमाः।
प्रणिपत्य महादेवमपृच्छन् को भवानिति।
अब्रवीद्भगवान् रुद्रः पशूनां पतिरीश्वरः।
सर्वज्ञः सर्वतत्त्वानां[७] तत्त्वभूतः सनातनः।
अहमेको जगद्धेतुरासं प्रथममीश्वरः।
वर्तामि च भविष्यामि न मत्तोऽन्योऽस्ति कश्चन।
मन्मायाशक्तिसंक्षिप्तं जगत् सर्वं चराचरम्।
इत्युक्त्वा भगवान् रुद्रः पूर्णरूपं समाविशत्।
नापश्यंश्च ततो रुद्रं देवा विष्णुपुरोगमा। इति।

---

१. रुद्रसाधारणस्वरूपप्रश्ने] क१,क२; रुद्रासाधारणे स्वरूपप्रश्ने- मु
२. पश्चादपि] मु;न च पश्चादपि- क१,क२;
३. पूर्वतनवाक्येनान्वयानन्तरमेव] मु,क२;पूर्वतनवाक्येनान्वयान्तरमेव- क१;
४. वाक्यस्यान्तर्धानपर्यायनिजपूर्णरूपप्रवेशार्थकत्वेन] मु; वाक्यस्यान्तर्ध्यानपर्यायनिजवर्णरूप-प्रवेशार्थकत्वेन- क१; वाक्यस्यान्तर्धानपर्यायनिजपूर्णरूपप्रवेशात्मकत्वेन-क२
५. व्याख्यातम्] मु,क२;व्याख्यानम्- क१
६. सम्भूयाखिलकारणम्] क१; सर्वे सम्भूयकारणम्- मु,क२
७. सर्वतत्त्वानां] क१,क२; सर्वभूतानां- मु

ननु शरीरवाचकानां शरीरिपर्यन्ततानियमेन अहंशब्दनोपस्थितस्यान्तर्यामिणस्तत्पदेन परामर्शोपपत्तौ व्यवहितान्वयो न स्वीकर्तव्यः इति चेन्न। शरीरम्[१] इत्यादौ व्यभिचारेण शरीरवाचकपदानां शरीरिपर्यन्ततानियम[२] इति वाच्यम्। निष्कर्षानिष्कर्षयोः निर्वक्तुमशक्यत्वात्। न च शरीरस्यात्मानं प्रति प्रकारतया यत्र भानं स एवानिष्कर्षः[३] तदभावो निष्कर्षः[४]। एवमनिष्कृष्टशरीरवाचकस्य[५] शरीरिपर्यन्ततानियम इति वाच्यम्। प्रकृते निष्कृष्टात्मवाचिनः अहंशब्दस्य प्रकारतया अहमर्थरूपशरीरवाचकत्वाभावात्। किं चाहमर्थस्यात्मनः शरीरित्वावधि-चेष्टाभोगेन्द्रियादि श्रूयत इति लक्षणलक्षितमुख्यशरीरित्वाभावात् नियम्यत्वरूपशरीरित्वाङ्गीकारे[६] च भृत्यादिवाचकपदे व्यभिचारात् अनिष्कृष्टत्वविवक्षायाम्[७] अपि उक्तदोषानतिवृत्तेः। न च नियम्यवाचकानां क्वचित् नियामकपर्यन्ततापि दृश्यत इति प्रकृतेऽपि तथास्त्विति वाच्यम्। तथा सति रुद्रप्रयुक्ताहम्पदेनैव देवैः अन्तर्यामिणोऽवगतत्वात् पुनरन्तर्यामिप्रत्यायनस्य अनुपपत्तेः। अहम्पदेनान्तर्याम्यनवगतौ च प्रकृतवाचिना तत्पदेनान्तर्यामिपरामर्शासम्भवात् तत्पदानुपपत्तेः तवैव[८] दूषणत्वात्। किंच मुख्याहंशब्दप्रयोगविषये तच्छब्दप्रयोगानुपपत्तेश्च। न च निष्कृष्टान्तर्यामि-मात्रपरामर्शितया तदुपपत्तिरिति वाच्यम्। ममापि तर्हि रुद्रवाक्यत्वेऽपि आत्मनि तदुपपत्तिरिति[९]। किंच महाभारते–

विश्वं विष्णुर्वषट्कार इत्यादिषु विष्णुसहस्रनामसु सर्वः शर्वः शिवः स्थाणुरिति शिवादिशब्दाः पठ्यन्ते[१०]। एते च[११] शब्दाः शिवेऽतिनिरूढा एव। यज्ञवैभवखण्डे त्रयस्त्रिंशाध्याये शिवो रुद्रो महादेव इत्यादिना एतान् शब्दाननुक्रम्य रूढ्यैव तानि[१२] नामानि अनिशमतितरामादितत्त्वे महेश

---

१. शरीरम्] क१,क२; मम शरीरम्- मु
२. शरीरिपर्यन्तत्वनियमासिद्धेः। न चानिष्कृष्टशरीरवाचकानां शरीरिपर्यन्ततानियमः] मु,क२; शरीरिपर्यन्ततानियमः- क१
३. एवानिष्कर्षः] क१,क२; एव निष्कर्षः- मु
४. तदभावो निष्कर्षः] क१,क२; तदभावोऽनिष्कर्षः- मु
५. एवमनिष्कृष्टशरीरवाचकस्य] क१,क२; एवं च निष्कृष्टशरीरवाचकस्य- मु
६. शरीरिपर्यन्ततानियम इति वाच्यम्। प्रकृते निष्कृष्टात्मवाचिनः अहंशब्दस्य प्रकारतया अहमर्थरूपशरीरवाचकत्वाभावात्। किं चाहमर्थस्यात्मनः शरीरित्वावधिचेष्टाभोगेन्द्रियादि श्रूयत इति लक्षणलक्षितमुख्यशरीरित्वाभावात् नियम्यत्वरूपशरीरित्वाङ्गीकारे] मु;शरीरपर्यन्ततानि-यम्यत्वरूपशरीरित्वाङ्गीकारे- क१; शरीरिपर्यन्ततानियम इति वाच्यम्। प्रकृते निष्कृष्टात्मवाचिनः अहंशब्दस्य प्रकारतया अहमर्थरूपशरीरवाचकत्वाभावात्। किं चाहमर्थस्यात्मनः शरीरमान्त्यावयवि-चेष्टाभोगेन्द्रियाश्रय इति लक्षणलक्षितमुख्यशरीरित्वाभावात् नियम्यत्वरूपशरीरित्वाङ्गीकारे-क२
७. अनिष्कृष्टत्वविवक्षायाम्] मु,क२;अनिष्कृष्टविवक्षायाम्- क१;
८. तवैव] मु,क२;तत्रैव- क१;
९. आत्मनि तदुपपत्तिरिति] मु;आत्मा- क१,क२;
१०. पठ्यन्ते] क१; तत्र पठ्यन्ते- मु,क२
११. एते च] क१,क२; एते- मु
१२. तानि] क१; एतानि- मु,क२

इत्यादि सूतसंहितादिवचनेन तथा प्रतिपादनात्। विष्णौ तु न तेषां तथा वचनं लौकिकप्रयोगो वा ऽस्ति। तथा च विष्णौ शिवादिशब्दप्रयोगाः[१] परत्र परशब्दप्रयोगात्[२] अवयववृत्त्या तल्लक्षणया वा तद्गुणारोपेण वा वाच्याः। तत्राद्यो न सम्भवति। अवयववृत्ते रूढ्यापहृतत्वात्। सिंहो माणवक इत्यादावपि कथंचित् सिंहशब्दस्य तत्र माणवके योगप्रसङ्गाच्च। द्वितीयोऽपि न सम्भवति। मुख्यार्थसम्बन्धाभावात्। तृतीयोऽपि। किं शिवादिशब्दवाच्यस्य निकृष्टत्वात्[३] वृषलोऽयं ब्राह्मणोऽयं उत्तिष्ठन् मूत्रयतीत्यादाविव[४] निकृष्टगुणारोपेण तत्र तत्प्रयोगः उत तस्योत्कृष्टत्वात् स्वामिभृत्यन्यायेन राजामात्ये राजशब्दप्रयोगवत् विष्णौ शिवादिशब्दप्रयोग इति वाच्यः। तत्राद्यो न सम्भवति। स्तुवन्नामसहस्रेणेति नामसहस्रस्य स्तुत्यत्वप्रतिपादकोपक्रमविरोधात् शिवस्य विष्णूपास्यत्वप्रतिपादकभारतकमलालयमाहात्म्यादिबहुपुराणविरोधाच्च। कालकूटकबलनाद्येकविंशतिकृत्यस्य विष्ण्वसाध्यस्य शिवकृतत्वप्रतिपादकपुराणागमविरोधाच्च। यस्त्वेकविंशतिकृत्यस्यान्यथोपपादकवैष्णवग्रन्थः स निर्मूल एव। तथा चान्त्येन[५] एव स्वामिभृत्यन्यायेन तत्प्रयोगो वाच्यः। तदुक्तं सूतसंहितायाम्–

बहुप्रलापेन किमास्तिकोत्तमाः शिवादिनामानि परात्परस्य तु।
अधोक्षजादेस्तु विशेषतः स्वतो भवन्ति नामानि परस्य चाज्ञया। इति।

अपरस्य तु न स्वतो[६] भवन्तीत्यन्वयः। विशेषतः तद्गुणारोपेणेत्यर्थः।

तथा च विष्णुसहस्रनामानुसारेण[७] अपि शिवस्य विष्णुस्वामित्वम्। न च शिवसहस्रनामस्वपि विष्ण्वादिशब्दपाठात् वैपरीत्यमिति वाच्यम्। तेषां लोके व्याप्तिमात्राभिप्रायेणापि प्रयोगदर्शनेन यौगिकत्वात्[८]। शिवेऽप्यवयववृत्त्यापि प्रयोगोपपत्तेः। तदुक्तं सूतसंहितायाम्–

योगादस्मिन् कथंचित् परममुनिवरा वासुदेवादिशब्दाः। इति विष्णावतिनिरूढा नारायणादिशब्दाः ये[९] ते[१०] शिवसहस्रनामसु पठ्यन्ते इति ततो वैषम्यात् न वैपरीत्याशङ्का। न चैवं

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये।

---

१. विष्णौ शिवादिशब्दप्रयोगाः] मु,क२;विष्णुशिवादिप्रयोगः- क१;
२. परशब्दप्रयोगात्] क१; परशब्दप्रयोगत्वात्- मु,क२
३. निकृष्टत्वात्] मु;निष्कृष्टत्वात्- क१,क२;
४. उत्तिष्ठन् मूत्रयतीत्यादाविव] मु; तिष्ठतीत्यादाविव- क१; तिष्ठ मूत्रयतीत्यादाविव-क२
५. चान्त्येन] सम्पादकीयः पाठः; चाद्य- क१,क२; चान्येन- मु
६. अपरस्य तु न स्वतो] क१; परस्य तु स्वतो- मु; अपरस्य तु स्वतो न-क२
७. विष्णुसहस्रनामानुसारेण] क१,क२; विष्णुपुराणसहस्रनामानुसारेण- मु
८. प्रयोगदर्शनेन यौगिकत्वात्] मु; प्रयोगदर्शनं यौगिकत्वात्- क१; प्रयोगदर्शनयौगिकत्वात्-क२
९. विष्णावतिनिरूढा नारायणादिशब्दाः ये] मु; विष्णावनिरुद्धनारायणादिशब्दाः- क१; विष्णावतिनिरूढा नारायणादिशब्दाः-क२
१०. न ते] मु;ते- क१,क२; न ते- मु

इति विष्णोः जगदुपादानत्वादिप्रतिपादकोपक्रमविरोधः। उक्तयुक्तिभिः बिन्दुपटले वक्ष्यमाण-युक्तिभिश्च तस्यौपचारिकत्वादिति। अत एव विष्ण्वन्तर्यामित्वमपि शिवस्यैव। शास्त्रे स्वामिन एवान्तर्यामित्वश्रवणात् सामान्यमात्रपरामर्शनियततया[१] तदुपपत्तिसम्भवात्। किंच तुल्यमिदं परेषामपि।

गीतासु–

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
इत्यादौ अस्मच्छब्दपरामृष्टे वासुदेवस्य स्वात्मनि
तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्।

इति तदीय[२] तच्छब्दानाम्[३] अपि तस्मिन् पर्यवसानदर्शनात्। यदुक्तं[४]–

विष्णुरात्मा भगवतो रुद्रस्यामिततेजसः इति विशेषणात्[५] रुद्रान्तर्यामित्वमिति तदयुक्तम्। आत्मशब्दस्य देहार्थकत्वात् अन्तर्यामिपरत्वे तु रुद्रस्यामिततेजस्कत्वोपवर्णनविरोधात्। किंचात्मशब्दस्यान्तर्याम्यर्थकत्वे तस्मादात्मानमेवाग्रे रुद्रं सम्पूजयाम्यहम्।

इति मोक्षधर्मे कृष्णवचनस्थितात्मशब्दस्यापि[६] अन्तर्यामिपरत्वं किं न स्यात्। तस्य चार्थान्तरपरत्वकल्पनायां प्रकृतेऽपि समानम्। प्रत्युत विष्णोरेव रुद्रशरीरित्वम्। कूर्मपुराणे ईश्वरगीतायां श्रूयते–

योगी नारायणोऽनन्तो लोकानां प्रभुरव्ययः।
ममैव चापरा मूर्तिः करोति परिपालनम्।

तत्रैव विष्णुवाक्यं च–

अस्यैव चापरां मूर्तिं विश्वयोनिं सनातनीम्।
वासुदेवाभिधानीं तां मामवैहि[७] पितामह।

इति बहुपदप्रत्यभिज्ञानेन। यदप्युक्तं यत्पदोपबन्धप्राप्तानुवादत्वनिर्वाहाय[८] तैत्तिरीयमन्त्रोऽपि पुरोवादसुबालोपनिषदपेक्षया नारायणपरत्वेन योजनीय इति तदपि न[९] तत्समानार्थक-श्वेताश्वतरमन्त्रस्यैव[१०] साक्षात् हिरण्यगर्भोत्पत्तिप्रतिपादकस्य पुरोवादत्वसम्भवात्।

---

१. सामान्यमात्रपरामर्शनियततया] क१; सामान्यमात्रपरामर्शितया- मु; सामान्यमात्रपरामर्शनियतया- क२
२. तदीय] क२;गदितं- क१; तदिदं- मु;
३. तच्छब्दानाम्] क२;वचनान्तरं गतेच्छनाम्- क१; वचनान्तरगतास्मच्छब्दानाम्- मु;
४. यदुक्तं] क१,क२; यदुक्तं विष्णुपुराणे- मु
५. विशेषणात्] क१,क२; विशेषरूपेण- मु
६. कृष्णवचनस्थितात्मशब्दस्यापि] मु;कृष्णवचनस्थितात्मशब्दस्य- क१,क२;
७. मामवैहि] क२;मामेव हि- क१; ममैव हि- मु;
८. यत्पदोपबन्धप्राप्तानुवादत्वनिर्वाहाय] मु;यदुपबन्धप्राप्तानुवादत्वनिर्वाहाय- क१,क२;
९. तदपि न] मु;तदपि- क१,क२;
१०. तत्समानार्थकश्वेताश्वतरमन्त्रस्यैव] क१,क२; तत्समानार्थकत्वेन श्वेताश्वतरमन्त्रस्यैव- मु

उपनिषद्व्याख्यातृभिः महद्भिः शङ्कराचार्यादिभिः सुबालोपनिषदनुवादत्वेन[१] अव्याख्यानात्[२] महाजनपरिगृहीतश्वेताश्वतरमूलत्वकल्पनस्य औचित्याच्च[३]। यदुक्तं नारायणपदस्य णत्वविधानानुरोधेन संज्ञात्वे निश्चिते शिवपरत्वे णत्वानुपपत्तेः शिवादिनाम्नामेव योगवृत्त्या नारायणपरत्वमिति तदयुक्तम्। नराणां समूहो नारमिति समूहार्थे तस्य समूह इत्यणि कृते नारशब्दात् समूहार्थप्रातिपदिकात् कर्तुः क्यङ् सलोपश्चेति[४] आचारार्थे क्यङि कृते सनाद्यन्ता धातव इति धातुसंज्ञायां कृत्यल्युटो[५] बहुलम् इति ल्युटि कृते तस्य युवोरनाकौ इत्यनादेशे च कृत्य च इति णकारादेशे योगार्थप्रतिपादकत्वे णत्वस्य सिद्धत्वात् अनन्यतात्पर्यकत्वासिद्धेः। अत एव ङीबन्तो नारायणीशब्दो लोकवेदयोः प्रयुज्यते। अन्यथा ल्युडन्तत्वाभावे ङीबन्तत्वानुपपत्तेः। अस्तु वा मनुकृतनिर्वचनानुसारेण नारायणपदस्य संज्ञात्वं तथापि लक्षणया शिवपरत्वसम्भवः। न च लक्षणैव दोषः। शिवादिपदानामपि नारायणे वृत्तौ लक्षणाया आवश्यकत्वात्। न च लक्षणं विनापि योगवृत्त्यैव शिवादिपदानां नारायणे वृत्तिः सम्भवतीत्युक्तमेवेति वाच्यम्। शिवादिपदोपस्थाप्ययोः योगरूढ्यर्थयोः एकपदोपस्थाप्यत्वरूपान्तरङ्गप्रत्यासत्त्या शीघ्रमन्विताभिधाने वृत्ते अन्यत्र तात्पर्यग्रहेऽपि पङ्कजं कुमुदमानयेत्यादाविव लक्षणायाः आवश्यकत्वात्। तदुक्तं चिन्तामणौ–

स्थलपङ्कजं तु विजातीयमेव साजात्येऽपि[६] विलक्षणा।
पङ्कजं कुमुदमित्यत्रापि लक्षणैवेति।

मास्तु च शिवे एकस्मिन् योगरूढिः केवलरूढ्यङ्गीकारेऽपि मण्डपं भोजयेदित्यादाविव रूढिपूर्विका लक्षणैव[७] स्वीकर्तव्या। योगार्थापेक्षया रूढ्यर्थस्य शीघ्रमुपस्थितत्वेन रूढेः प्रबलत्वात्। अन्यथा रथकाराधिकरणविरोधापत्तेः। तत्र हि पूर्वपक्षे विद्याप्रयुक्तकल्पनागौरवभीत्या[८] रथं करोतीति रथकार इति योगार्थाश्रयेणन रथकरणयोग्यत्रैवर्णिकानामेव आधानाधिकार इति प्राप्ते राद्धान्तितम्।

अवयवशक्तिमुपजीव्यप्रवृत्तयोगापेक्षया तदनुपजीव्यसमुदायशक्तेः शीघ्रप्रवृत्तत्वेन प्रबलत्वात् जातिविशेषस्यैवाधानाधिकारसिद्धिरिति। न च विद्याप्रयुक्तकल्पनागौरवं दोषः। प्रमाणप्रवृत्तिकाले तस्यानुपस्थितत्वेन प्रवृत्तिफलमुखगौरवस्य प्रमाणवतो दोषत्वाभावादिति। किंच असम्भवद्योगवृत्तीनां केवलरूढानां शिवबोधकानां शब्दानां नारायणपरत्वे लक्षणाया आवश्यकत्वाच्च। अपि च ब्रह्मविष्णुरुद्राणां सम्भूतिप्रतिपादकाथर्वशिखावाक्यस्य वैरूप्यपरिहाराय विष्ण्वंशेऽपि[९] व्युत्पत्त्यर्थकत्वं वाच्यमिति कथं सर्वजगत्कारणत्वम् तस्य। अजायमानत्वश्रुतिस्तु नारायणस्य

---

१. सुबालोपनिषदनुवादत्वेन] मु,क२;सुबालोपनिषदः- क१; सुबालोपनिषदनुवादत्वेन- मु,क२
२. अव्याख्यानात्] मु;अव्याख्यातत्वेन- क१; अनुवादत्वेन-क२
३. औचित्याच्च] क१,क२; उचितत्याच्च- मु
४. सलोपश्चेति] मु,क२;सुलोपश्चेति- क१;
५. कृत्यल्युटो] मु;कर्तरि कृत्यल्युटो- क१,क२;
६. साजात्येऽपि] मु,क२;साजात्ये- क१
७. रूढिपूर्विका लक्षणैव] क१,क२; रूढिपूर्विकलक्षणैव- मु
८. विद्याप्रयुक्तकल्पनागौरवभीत्या] क१,क२; कल्पनागौरवभीत्या- मु
९. विष्ण्वंशे ऽपि] मु,क२;विष्ण्वंशे- क१;

शिवादन्यस्मात् अजायमानत्वप्रतिपादनपरेति न विरोधः। न च विरोधपरिहाराय जन्यार्थकत्वे रुद्रांशेऽपि तत्समममिति वाच्यम्। रुद्रपदस्य संहाररुद्रविषयत्वेनाविरोधात्। यत्तु[१] परैः शैवपुराणानां तामसत्वेन दौर्बल्ये मात्स्यवचनमुदाहृतं तदयुक्तम्। ब्रह्मादीनां त्रयाणां तत्तत्कल्पेषु तत्तदुत्कर्ष-प्रतिपादनपरत्वेन पुराणानाम् अप्रामाण्यपरत्वाभावात्[२]। अग्नेः शिवस्य माहात्म्यमित्यादौ तत्तद्देवतोत्कर्षस्य तत्तत्कल्पप्रवृत्तत्वोपवर्णनेन भिन्नविषयतया पुराणानामविरोधसिद्धेः मात्स्यवचना-देव स्पष्टतरमवगम्यमानात्। ननु तथा सति कल्पानां तामसत्वादिविभागो व्यर्थ इति चेत् ऋतुभेदेषु हिमाद्युत्कर्षवत् गुणप्राचुर्यनिबन्धनतदुपाधिकमूर्तिमाहात्म्यातिशयपरत्वेनावैयर्थ्यात्[३]। किं च-

अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम्।
आदिकर्ता शिवः साक्षात् शूलपाणिरिति श्रुतिः।

इति पुराणस्यापि अष्टादशविद्यान्तर्गततया शिवकर्तृकत्वात् ब्रह्मणस्तु

यस्मिन् कल्पे तु यत्प्रोक्तम् इति मात्स्यवचनादेव तेन प्रोक्तमितिवत् प्रवचनकर्तृत्वस्यैव स्फुटतरमवगम्यमानत्वात्। अष्टादशपुराणानां कर्ता सत्यवतीसुत इति वचनस्यापि कैमुतिकन्यायेन प्रवचनकर्तृत्वम्[४] एव। ननु शिवपुराणानां शिवप्रणीतत्वेन शिवस्य तामसत्वेन सुतरामप्रामाण्यप्रसङ्ग इति चेत्, न। कैवल्योपनिषदि च शिवस्य तमोऽतीतत्वप्रकृत्यतीतत्वयोः श्रवणात् गुणसंस्पर्शाभावात्। कूर्मपुराणे ब्रह्मविष्णुरुद्राणामेव गुणोपाधिकत्वं[५] शिवस्य निर्गुणत्वं च श्रूयते।

तमोगुणं समाश्रित्य रुद्रः संहरते जगत्।
एकोऽपि स महादेवः सर्वगः सन् व्यवस्थितः[६]।
सर्गरक्षालयगुणैर्निर्गुणोऽपि निरञ्जनः। इति।

एवं च श्रुतिस्मृतीतिहासपुराणैरैककण्ठ्येन शिव एव जगत्कारणत्वसार्वात्म्य-सर्वान्तर्यामित्वादिप्रतिपादनमुखेन सर्वोत्कृष्टतया प्रतिपाद्यत इति स एव परं तत्त्वम्[७] इति लयभोगाधिकाराख्यव्यापारत्रयलक्षित इति पतिविशेषलक्षणं सुस्थम्।

—•—

(व्याख्या) वृत्तानुवादपुरःसरं वर्तिष्यमाणं प्रस्तौति-

(वृत्तिः) तदियता परीक्षितस्य पतिपदार्थस्योपसंहाराय प्रकरणान्तरपरीक्षितव्यस्योपक्रमाय च श्लोकः -

---

१. यत्तु] मु;यत्र- क१,क२;
२. अप्रामाण्यपरत्वाभावात्] मु;अप्रामाण्यप्रतिपादनपरत्वाभावात्- क१,क२
३. गुणप्राचुर्यनिबन्धनतदुपाधिकमूर्तिमाहात्म्यातिशयपरत्वेनावैयर्थ्यात्]मु,क२; गुणप्राचुर्यनिबन्धन-तदुपाधिकमूर्ति-माहात्म्यातिशयपरत्वेनावैयर्थ्यत्वात्- क१
४. प्रवचनकर्तृत्वपरत्वम्] मु,क२;प्रवचनकर्तृत्वम्- क१;
५. गुणोपाधिकत्वं] क१,क२; गुणोपाधित्वं- मु
६. सन् व्यवस्थितः] मु;संव्यवस्थितः- क१,क२;
७. परं तत्त्वम्] क१,क२; परतत्त्वम्- मु

पतिरेवं समुद्दिष्टस्त्रितत्त्वोक्तिनिदर्शनात्।। ९५।।
पदार्थः कुण्डलिन्याख्यः कथ्यतेऽनन्तरं द्विजाः।

(व्याख्या) एवं पूर्वोक्तप्रकारेण त्रितत्त्वोक्तिनिदर्शनात् लयभोगाधिकाराणं त्रयाणां तत्त्वानामुक्तिरुद्देशः निदर्शनं लक्षणपरीक्षापूर्वकप्रतिपादनं तत्पूर्वकान्निदर्शनात् पतिपदार्थः समुद्दिष्टः सम्यक् निरूपित इत्यर्थः। अनन्तरं पतिपदार्थनिरूपणात् कुण्डलिन्याख्यः पदार्थः कथ्यते लक्षणप्रमाणाभ्यामिति शेषः।

इति पौष्करव्याख्याने[1] पतिपटलः[2] सम्पूर्णः।।

(वृत्तिः) हे द्विजाः। त्रितत्त्वोक्तिनिदर्शनात् त्रितत्त्वस्य लयादिकस्य उक्तेर्निदर्शनात् समुद्धरणात्। पतिर्जगदीश्वरः एवमुक्तरीत्या समुद्दिष्टः सम्यक् परीक्षितः। तदनन्तरं कुण्डलिन्याख्यः पदार्थः कथ्यते परीक्ष्यते।।

श्रीशालिवाटिपुरनिवासिज्ञानप्रकाशाचार्यविरचितायां श्रीमत्पौष्करज्ञानपादवृत्तौ प्रथमः पटलः।।

—•—

१. पौष्करव्याख्याने] क१,क२; पौष्करे ज्ञानपादे - मु
२. पतिपटलः] क१,क२; पतिपटलव्याख्या- मु

बिन्दुपटलः

(व्याख्या) एवमुद्देशलक्षणपरीक्षाभिः[1] आद्येन पटलेन पतिपदार्थं सपरिकरं निरूप्येदानीम्[2] उद्देशक्रमप्राप्तं कुण्डलिनीपदार्थं निरूपयितुं शिष्यचित्तसमवधानाय प्रतिजानीते–

अथ बिन्दोर्विवेकोऽयं न्यायप्राप्तोऽत्र वर्ण्यते।

(व्याख्या) अथ प्रतिपदार्थनिरूपणानन्तरं अत्र द्वितीये पटले[3] न्यायप्राप्त उद्देशक्रमप्रयोजकयुक्तिप्राप्तः अयं वक्ष्यमाणः बिन्दोः कुण्डलिन्या विवेकः लक्षणपरीक्षाप्रमाणैः इतरेभ्यो भेदो वर्ण्यते सपरिकरः प्रतिपाद्यते।

(वृत्तिः) अथ पतिपदार्थपरीक्षानन्तरं बिन्दोरयं न्यायप्राप्तः उद्देशक्रमानुगतः पुनरनुमानानुगतो[4] वा विवेकः परीक्षात्र वर्ण्यते क्रियत इति। पाटलिकः सम्बन्धः पूर्वपटलोपसंहारेण सूचितः। तन्त्रवस्तुसंबन्धः कुण्डलिन्याख्यपदार्थत्वेन वाक्यात्मकस्त्वनेकविधः सा तु कुण्डलिनीत्यदिभिरुक्तः।

—•—

(व्याख्या) एवं पटलार्थं प्रतिज्ञाय आदौ परीक्षाद्युपयोगितया बिन्दुलक्षणमाह–

लयादिभेदः प्रागुक्तो यदुपाधौ शिवस्य तु।। १।।
स बिन्दुरिति मन्तव्यः सैव कुण्डलिनी मता।

(व्याख्या) प्राक् पतिपदार्थनिरूपणावसरे उक्तः शिवस्य लयादिभेदः। लय आदिर्येषां ते लयादयः ते च भेदाश्च[5] लयादिभेदः जात्यैकवचनम्[6]। यदुपाधौ सति भवति यदुपाधिनिमित्तको भवति तु शब्दो बिन्दुशिवयोः लयादितात्त्विकत्ववैषम्यसूचनाय स[7] शिवगतलयादिभेदोपाधिः बिन्दुरितिमन्तव्यः। शिवगतलयादिभेदप्रयोजक उपाधिः बिन्दुरिति लक्षणनिष्कर्षः। यद्यपि पतिपटल

---

१. एवमुद्देशलक्षणपरीक्षाभिः] क१,क२,क३; एवमुद्देशलक्षणपरीक्षाप्रमाणैः-मु
२. निरूप्येदानीम्] क१,क२,क३; निरूप्य-मु
३. द्वितीये पटले] क१,क२,क३;द्वितीयपटले-मु
४. अथ पतिपदार्थपरीक्षानन्तरं बिन्दोरयं न्यायप्राप्तः उद्देशक्रमानुगतः पुनरनुमानानुगतो] ज१; ज२ कोशे अयं भागः नास्ति।
५. ते च भेदाश्च] क२,क३;भेदाश्च-क१; ते भेदाश्च-मु
६. जात्यैकवचनम्] क१,क२,क३;जात्येकवचनम्-मु
७. सः] क१,क२; 'मु' 'क३ 'कोशयोर्नास्ति।

एव बिन्द्वादीनां लक्षणमुक्तं तथापि लक्षणसंप्लवस्य[1] प्रमेयदार्ढ्यार्थत्वात् न दोषः। ननु कुण्डलिनीं प्रस्तुत्य बिन्दुनिरूपणमयुक्तमित्यत आह–सैवेति। बिन्दुरेव कुण्डलिनी मता आगमेष्विति शेषः। सैवेति विधेयापेक्षया स्त्रीलिङ्गनिर्देशः। अत्र लयाद्येकैकोपाधित्वमेव लक्षणं न समुदितं व्यावर्त्याभावात्। तेन शिवादिगतलयोपाधित्वादिलक्षणत्रयं बोध्यम्। ननु लयभोगाधिकाराख्य-व्यापारत्रयलक्षित इति पतिलक्षणे लयादिनिरूपणस्य "उपसंहृतकार्यात्मा यदा बिन्दुर्व्यवस्थितः" इति बिन्दुज्ञानसापेक्षत्वात्।

(वृत्तिः) शिवस्य प्रागुक्तो लयादिभेदः लयादिभेदव्यपदेशः यदुपाधौ यस्य पदार्थस्य उप समीपेऽधिष्ठातृत्वेन वर्तिनि शिवे तत्र न विवर्तत्वम्[2] इति भेदव्यपदेशमात्रमादधात्या-सञ्जयतीत्युपाधिरवस्था तस्यां सत्यां सम्भवति स बिन्दुरिति मन्तव्यः प्रतिपत्तव्यः। न च कुण्डलिनी परीक्षोपक्रमे बिन्दुपरीक्षोपक्रमोऽनुचित इति वाच्यम्। यतः सैव कुण्डलिनी मता। तदुक्तं–

शब्दतत्त्वमघोषा वाक् ब्रह्म कुण्डलिनी ध्रुवम्।
विद्याशक्तिः परो नादो महामायेति देशिकैः।।
बिन्दुरेव समाख्यातो व्योमाऽनाहत इत्यपि। इति।

—•—

(व्याख्या) अत्र च बिन्दुलक्षणस्य "लयादिभेदः प्रागुक्तः" इति लयादिज्ञानसापेक्षत्वात् उक्तलक्षणत्रयमपि अन्योन्याश्रयग्रस्तमिति असद्विषयत्वव्याप्तं[3] इति[4] लक्षणान्तरमाह–

(वृत्तिः) युक्त्यन्तरमाह–

किञ्च रुद्राणवो येन बध्यन्ते यत्र वा स्थिताः।। २।।
विमुच्यन्ते यतो वाऽयं स बिन्दुरिति गम्यताम्।

(व्याख्या) येन बिन्दुना रुद्राणवः रुद्राश्च ते अणवश्च रुद्राणवः श्रीकण्ठादयः। अनन्तेशादयश्च ते तनुकरणभुवनादिरूपेण येन बध्यन्ते यत्र वा तत्त्वभुवनादिरूपे स्थिताः। पूर्वोक्तरूपादुपादानाद्विमुच्यन्ते[5] सः पूर्वोक्तः अयमुक्तलक्षणलक्षितः बिन्दुरिति गम्यतां ज्ञायताम्। ननु बन्धकत्वादीनां त्रयाणां प्रत्येकं लक्षणत्वमुत समुदितानाम्। नाद्यः। प्रथमचरमयोः अधिकारमलवासनायां तिरोधायिन्यां शक्तौ च बन्धकत्वेन[6] मुक्त्युपादानत्वेन[7] चातिव्याप्तेः। मध्यमस्य सर्वाधारे ईश्वरे अतिव्याप्तेः। न द्वितीयः। आदिमोत्तमयोः विशेषणयोः

---

१. लक्षणसंप्लवस्य] क१,क२,क३;लक्षणसंवादस्य–मु
२. विवर्तत्वम्] ज१;निवर्तत्वम्–ज२
३. असद्विषयत्वव्याप्तं] मु;असद्विषयसव्याप्यत्वं–क१; विषयव्याप्त्यर्थत्वं–क३
४. इति] मु;वा–क१,क२,क३
५. पूर्वोक्तरूपादुपादानात् विमुच्यन्ते] मु;पूर्वोक्तरूपादुपादानानामुच्यन्ते–क१; पूर्वोक्तरूप-मुपादानान्मुच्यते–क२; 'क३ह' कोशेऽक्षराणि लुप्तानि।
६. बन्धकत्वेन] मु,क३;बन्धकत्वे–क१,क२
७. मुक्त्युपादानत्वेन] मु,क३;तन्मुक्त्युपादानत्वेन–क१,क२

अन्यतरवैयर्थ्यापातात्। किञ्च बिन्दुतत्कार्ययोः किमारम्भवाद इष्टः उत परिणामवादः किं वा विवर्तवादः। नाद्यद्वितीयौ तन्त्वाद्यारब्धे पटादौ दुग्धादिपरिणामे दध्यादौ च कारणगततन्तुत्व-दुग्धत्वादेरिव बिन्दूपादानके तत्त्वभुवनादौ लक्ष्यतावच्छेदकबिन्दुत्वाभावेन पक्षद्वयेऽपि लक्षणातिव्याप्तिः[1]। नापि तृतीयः। तथात्वे कार्यशून्यताया वक्ष्यमाणत्वेनापसिद्धान्तापातादिति चेन्मैवम्। रुद्राण्वाधारत्वे सति तद्बन्धकारणत्वमित्येकं लक्षणं रुद्राण्वाधारत्वे सति तन्मुक्त्युपादानत्वमित्यपरम् इति लक्षणद्वयमत एव लक्षणद्वयाभिप्रायेणैव वाकारद्वयप्रयोगः। अत्र लक्षणपदद्वये रुद्रपदं मायायामतिव्याप्तिवारणाय तदपि रुद्रविशेषविज्ञानाकलनपरम्। अहिकुण्डलपटिकुटिन्यायेन बिन्दौ वृत्तिवादाश्रयणात् पूर्वोक्ततत्त्वभुवनादौ नातिव्याप्तिः। यद्वा रुद्राणुतनुकरणाद्युपादानत्वमिति लक्षणे कृत्स्नस्य[2] तात्पर्यमिति न विशेषणवैयर्थ्यावकाशः। किञ्च रुद्राणवो येनेत्यादिलक्षणे वृत्तिपक्षमाश्रित्य तत्त्वतात्त्विकेष्वतिव्याप्तिपरिहारोऽभिप्रेतः।

(वृत्तिः) किञ्च पुनरपि युक्तिं वदामि रुद्रवदणुरात्मा शिवाद्भिन्नो येषां ते रुद्राणवोऽनन्तादयः येन यदुत्पन्नेन शरीरादिना बध्यन्ते युज्यन्ते। यत्र वा यदुत्पन्नभुवनेषु निरतिशयभोगभुजः स्थिताः यतो यदुत्पन्ननादादेर्वामहाप्रलये विमुच्यन्ते। सोऽयं बिन्दुरिति गम्यतां ज्ञायताम्।

—•—

(व्याख्या) इदानीं मायानियतमपि परिणामपक्षं प्रौढिवादेन बिन्दावभ्युपगम्य लक्षणान्तरवाह–

(वृत्तिः) पुनरप्याह–

किञ्च सादात्मिको[3] योगः सद्यः संजायते यतः।। ३।।
वर्तते लीयते यत्र स बिन्दुरिति गण्यते।

(व्याख्या) सदात्मैव सादात्मिकः शुद्ध इति यावत्। योगः युज्यत इति यावत्। शुद्धाध्वेति निष्कृष्टोऽर्थः। यदुक्तमधस्तात् "शुद्धाध्वा वा यतोऽजनि" इति। उक्तं च रत्नत्रयेजायतेऽध्वा यतः शुद्धो वर्तते यत्र लीयते स बिन्दुरिति। यतः कारणात् सद्यः कर्मपरिपाकमनपेक्ष्य शिवसंकल्पमात्रेण जायते उत्पद्यते यत्र वर्तते यत्र नश्यति स बिन्दुरिति गण्यते संख्यायते इत्यर्थः। एवं च त्रितयोपादानस्य शुद्धाध्वोपादानत्वरूपलक्षणे तात्पर्यम्। प्रत्येकलक्षणे[4] तु जनिकर्तुरिति प्रकृत्युपादाने पञ्चमी लयाधारलक्षणद्वयेऽपि उपादानोपादेयभावसंबन्ध एवाधाराधेययोः द्रष्टव्यः। तेन शक्तौ नातिव्याप्तिः। एवं च परिणामपक्षमाश्रित्य लक्षणमुक्तम्। वृत्तिपक्षाश्रयेणपि लक्ष्यतावच्छेदकसंकोचेन[5] तत्त्वतात्त्वि-केष्वतिव्याप्तिपरिहारो द्रष्टव्यः। तत्प्रकारस्तु अनभिव्यक्तनामरूपबिन्दुत्वं मूलकारणमात्रनिष्ठं

---

१. लक्षणातिव्याप्तिः] क१,क२,क३;लक्षणस्यातिव्याप्तेः–मु
२. कृत्स्नस्य] मु,क२,क३;कृतस्य–क१
३. सादात्मिको] क१,क२,क३;सादात्मको–मु
४. प्रत्येकलक्षणे] मु,क२,क३;प्रत्येकं लक्षणे–क१
५. लक्ष्यतावच्छेदकसंकोचेन वा] मु,क२,क३;लक्ष्यतावच्छेदकसंकोचेन–क१

लक्ष्यतावच्छेदकं शुद्धाध्वोपादानोपादेयान्यतरत्वं विकसितं बोध्यम्। एवं च शुद्धाध्वरूपकार्यान्यथानुपपत्त्या[1] बिन्दुः कल्प्यत[2] इत्यर्थापत्तिरपि सूचिता।

(वृत्तिः) किञ्च सन् शुद्ध आत्मा स्वरूपं यस्य स सदात्मा। सदात्मनि भवः सादात्मिकः युज्यते परपदेनेन दीक्षित इति योगाध्वा[3] मन्त्रादिः। अथवा योगो योगफलसदाशिवदेहः यतः उपादानात् सद्यः शिवेच्छामात्रतः संजायते व्यक्तो भवति। यत्र वर्तते स्थित्वाऽर्थक्रियायुक्तो भवति। यत्र लीयते तिरोदधाति स बिन्दुरिति गम्यताम्। यद्वा पुरोक्तव्युत्पत्त्या योगः प्रासादमहामनुः शिवकृतमनुव्यक्तिभुमिर्भूत्वा सद्यः शिवशक्त्यधिष्ठितसाधककर्तृशक्तिप्रवृत्तिमात्रेण यतो यदुत्पन्ननादात् संजायते। यत्र कलात्मना[4] वर्तते। यत्र लीयते स बिन्दुरिति गम्यताम्। रत्नत्रये प्रयोगरूपः श्लोकः–

सदाशिवादितत्वौघो नित्योपादानकारणम्।*
विकारित्वाद् यथा कुम्भस्तथा चौषस्ततस्तथा।। इति।

—•—

(व्याख्या) अस्यान्यथोपपत्तिमाशंक्य परिहरति–

(वृत्तिः) बिन्दुसमवायवादिभिः ज्ञानशक्तिरेव क्रियाशक्तिरित्युच्यत इत्यविन्दद्भिः क्रियाशक्तिरेव शुद्धवर्त्मोपादानभूता कुण्डलिनीत्युच्यते। तन्निरासार्थमाह –

नात्र शक्तिरुपादानं चिद्रूपत्वाद्यथा शिवः।। ४।।
परिणामोऽचितः प्रोक्तः चिद्रूपस्य न युज्यते।

(व्याख्या) अत्र शुद्धाध्वनि शक्तिः शिवसमवेता उपादानं न भवति कुतः चिद्रूपत्वात् तत्र दृष्टान्तः यथा शिवः अत्र शिवसमवेता शक्तिः शुद्धाध्वोपादानं न। चित्त्वाच्छिववदित्यनुमानं विवक्षितम्। रूप्यतेऽनेनेति रूपम्। एतेन हेतोः स्वरूपासिद्धिशंका वार्यते। अत्र पक्षे समवेतपदं मायायां सिद्धसाधनवारणाय हेतोः भागासिद्धिवारणाय च। अखण्डाभावस्य साध्यत्वात्। न साध्ये प्रतियोगिविशेषणवैय्यर्थ्यम्। नन्वसंप्रतिपन्नोऽयं दृष्टान्तः। तथाहि सूतसंहितायाम्–

शिवात् सत्यानन्दप्रकाशैकस्वलक्षणात्।
आविर्भूतमिदं सर्वं चेतनाचेतनात्मकम्।

तथा ज्ञानतिलकेऽपि–

येन सर्वमिदं व्याप्तं यस्मिन् सर्वं प्रतिष्ठितम्।
यस्मादुत्पद्यते सर्वं तमाहुः परं पदम्।। इति।

---

१. शुद्धाध्वरूपकार्यान्यथानुपपत्त्या] मु,क२,क३;शुद्धाध्वकार्यरूपिकार्यान्यथानुपपत्त्या–क१
२. कल्प्यते] क१,क२;कल्पितः–मु,क३
३. योगोऽध्वा] ज२;योगाध्वा–ज१
४. कलात्मना] ज१;कालात्मना–ज२

तथान्यत्रापि–

"आनन्दो ब्रह्मणैव" "तज्जायतेऽस्माच्चराचरम्" इत्यादिषु पञ्चमी श्रूयते। इयं च पञ्चमी उपादान एव जनिकर्तुः प्रकृतिरित्यनेन विशिष्यविधानात् प्रकृतिशब्दस्य चोपादानार्थकत्वात्। अत एव महाभाष्ये "शृङ्गाच्छरो जायते गोमयात् वृश्चिको जायते" इति तस्योपादानार्थकत्वमभिप्रेत्य उदाहृतम्। तथा सूतसंहितायां यज्ञवैभवखण्डे पञ्चदशाध्याये–

यस्मिन् सुविदिते सर्वं विज्ञातं स्यादिदं सुराः।
तदात्मकत्वात् सर्वस्य नास्त्येव प्रभिदा स्वतः।

तथा पञ्चमे–

यस्य श्रवणमात्रेण श्रुतमेवाश्रुतं भवेत्।
अमतं च मतं ज्ञातमविज्ञातं च सत्तमाः।

इति शिवज्ञानेन सर्वकार्यविज्ञानं श्रूयते। इदं चात्यन्तभेदे न संभवति घटज्ञानेन पटज्ञानासंभवात्। ऐक्यं च चिज्जडयोः बाधितमिति तादात्म्यमेव वक्तव्यम्। तच्चोपादानोपादेयभाव एव संगच्छत इति। तथा आगमान्तरे–

भूतानि चाहं स्थिरजङ्गमानि यावन्ति चान्यान्यहमेव तानि। इति जगत्सामानाधिकरण्यं श्रूयते। एतदपि अत्यन्ताभेदे भेदे वा सत्यनुपपन्नमिति तादात्म्यमवगमयति। तथा स्कान्दे–

सृष्ट्यर्थमैक्षत प्राज्ञो बहु स्यामिति शक्तिमान्। इति। बहुभवनसंकल्पोऽपि शिवस्योपादानत्वे प्रमाणम्। न हि निमित्तमात्रस्य कुलालस्य घटः स्यामिति संकल्पोऽस्ति। शिवोपादानत्वे श्रुतयोऽप्यवगन्तव्याः। ननु शिवो नोपादानं चेतनत्वात् पशुवदित्यनुमानेन त्वदुक्तं सर्वं बाधितमिति चेन्न। आगमस्यानुमानापेक्षया प्रबलत्वेन तस्यैवानुमानबाधकत्वात्। अन्यथा यागादिक्रिया न स्वर्गसाधनं क्रियात्वात् वृथाचेष्टावदित्यनुमानेन यागादिनिष्ठस्वर्गसाधनताबोधकस्यापि[१] आगमस्य बाधप्रसङ्गात्। एवं च शिवो नोपादानं कर्तृत्वात् कुलालवदित्यनुमानमपि निरस्तम्। आगमबाधेन तस्यापि अनुत्थानात्। ननु शिवस्योपादानत्वे निमित्तकारणत्वं न स्यात् उपादानासमवायि-व्यतिरिक्तस्यैव निमित्तत्वादिति चेन्न। प्रकृतिभावेन उपादानत्वस्य निमित्ततानुकूलचिकीर्षादियोगेन[२] निमित्तत्वस्यापि उपपत्तेः। एवं च निमित्तभूतस्य शिवस्योपादानत्वमपि अक्षतमेव। किञ्च घटः सन् पटः सन् इति सत्वाकारानुगतप्रतीतिरनुभवसिद्धेत्यत्र न विवादः। तस्याश्च स्वरूपसत्त्वं न विषयः अननुगतत्वात् नापि सत्ताजातिः घटत्वं सत् पटत्वं सदित्यादिप्रतीतेः तद्विषयकत्वात्[३] जातौ जात्यनङ्गीकारात्। तत्र सत्तैकार्थसमवायित्वं विषय इति चेन्न[४]। जातिविशेष्यकप्रतीतौ सत्तैकार्थसमवायित्वं व्यक्तिविशेष्यकप्रतीतौ सत्ताजातिविषयकत्वमित्यननुगमापत्तेः। न चेष्टापत्तिः।

---

१. यागादिनिष्ठस्वर्गसाधनताबोधकस्यापि] क१,क२,क३; यागादिषु स्वर्गसाधनताबोधकस्य–मु
२. निमित्ततानुकूलचिकीर्षादियोगेन] मु,क२,क३;निमित्ततानुकूलचिकीर्षादियोगे–क१
३. तद्विषयकत्वात्] मु,क२;तदपि विषयकत्वात्–क१,क३
४. चेन्न] क१,क३;चेत्–मु,क२

अनुभवविरोधाभावात्[1]। एवं च सदनुविद्धतया प्रतीयमानो घटः सत्तादात्म्यापन्नः सदनुविद्धतया प्रतीयमानत्वात्। यद्यनुविद्धतया प्रतीयते तत्तत्तादात्म्यापन्नं यथा मृदनुविद्धतया प्रतीयमानो घटो मृत्तादात्म्यापन्नः तादृशसत्स्वरूपं च शिव एवेति शिवस्योपादानत्वे अनुमानमपि प्रमाणम्। ननु शिवस्य सत्स्वरूपत्वे किं प्रमाणमिति चेत् शिवात् सत्यपरानन्देत्युक्तागमस्यैव तदर्थबोधकश्रुतेश्च तत्र प्रमाणत्वात्। तस्मादनुपपन्न एवायं दृष्टान्तः[2]। अत्रोच्यते यदुक्तं जनिकर्तुः प्रकृतिरिति पञ्चम्येव शिवस्योपादानत्वे प्रमाणमिति तत्तावत् न संगच्छते। तत्रत्यप्रकृतिशब्दस्य हेत्वपरपर्यायत्वेन उपादानार्थकत्वासिद्धेः। अत एव वृत्तौ 'पुत्रात् प्रमोदो जायत' इति हेतुत्वमात्रमभिप्रेत्य उदाहृतम्। अन्यथा तस्यासंगतत्वापत्तेः। अत एव न्यासकारेणाप्यत्रत्यप्रकृतिशब्देन निमित्तमात्रमुच्यते। तस्योपादानपरत्वे प्रकृतिग्रहणं व्यर्थं स्यात्। असत्यपि प्रकृतिग्रहणे प्रत्यासत्तिन्यायेन उपादानस्यैवापादानसंज्ञायाः सिद्धत्वात्। तस्मात् प्रकृतिग्रहणं निमित्तमात्रपरमित्युक्तम्। अत एव तस्योपादानत्वे अश्रद्दधानेन भाष्यकारेणापि अवध्यवधिमद्भावमात्रस्यैव पञ्चमीप्रतिपाद्यत्वमङ्गीकृत्य प्रत्याख्यातं तत् प्रकरणम्। यदपि उक्तं एकविज्ञानादिना सर्वविज्ञानप्रतिपादनानुरोधेन तादात्म्यं स्वीकर्तव्यमिति। तदपि न। सर्वपदार्थान्तर्गतेषु अनादिषु मायादिषु शिवोपादानकत्वासंभवेन तद्वचनस्य यथाश्रुतार्थपरित्यागेन तत्संकोचेऽवश्यकर्तव्ये एकदेशबाधरूपतया तदपेक्षयान्यपरत्वस्यैव वक्तव्यत्वात्। यथा लोके राज्ञि दृष्टे सर्वेऽप्यमात्यादयो दृष्टा एवेति राजदर्शनस्य सर्वदर्शनफलकत्वमभ्युपेत्य व्यवह्रियते तद्वत् प्राधान्यपरत्वमिति। नन्वस्य वचनस्य प्राधान्यपरत्वे

एकेनैव तु पिण्डेन मृत्तिकाया यथा सुराः।
विज्ञातं मृन्मयं सर्वं मृदभिन्नत्वतः सुराः।
एकेन लोहमणिना सर्वे लोहादयो यथा।
विज्ञाताः स्युरथैकेन नखानां कृन्तनेन च।
सर्वं कार्ष्णायसं ज्ञातं तदभिन्नत्वतः सुराः।

इत्युपादानोपादेयभावे दृष्टान्ततयोक्ताः सूतसंहितावचनतदर्थश्रुतयश्चासंगता एव स्युरिति चेत्। अत्र ब्रूमः।

सा तु कुण्डलिनी शम्भोर्नित्याधिष्ठेयरूपिणी।
भोग्यभोक्तृत्वसम्पत्त्यै या शरीरेन्द्रियादिकम्।
उत्पादयति सा माया खचिता कर्मभिर्नृणाम्।

इत्याकरस्थवचनेनान्यत्र च–

निमित्तम् ईश्वरः साक्षात् उपादानं स बिन्दुराट्।

इत्यादिना मायायाः स्वातन्त्र्येणोपादानत्वश्रवणत् उक्तवचनेषु युक्त्या शिवस्य च उपादानत्वप्रतीतेश्च। रज्जौ सूत्रद्वयवत् मायाशिवयोः किं स्वातन्त्र्येण उपादानत्वम् अभ्युपगम्यते?

---

१. अनुभवविरोधात्] मु,क२,क३;अनुभवविरोधाभावात्-क१
२. दृष्टान्तः] क१; दृष्टान्तः इति-मु,क२,क३

किं वा शिवात् शक्तिमत इत्याद्यनुसारेण मायाविशिष्टशिवस्योपादानत्वं यद्वा जडकार्यस्वभावानुसारेण[१] मायाया एव परिणामित्वं शिवस्य तदधिष्ठानतया उपादानत्वम्? इति। तत्राद्यस्तावत् न संगच्छते। शिवस्य निर्विकारत्वबोधकश्रुतिबाधप्रसङ्गात्। तथाहि सूतसंहितायां यज्ञवैभवखण्डे पञ्चदशाध्याये–

श्रुतिः सनातनी साध्वी सर्वमानोत्तमोत्तमा।
प्राह चाद्वैतनैर्मल्यं निर्विकारत्वमात्मनः।

इति निर्विकारत्वं श्रूयते। तथा सिद्धान्तागमे–

परव्योम्नि शिखान्तस्थो[२] निष्कलः परमः शिवः। इति।

सोमशम्भावपि–

सर्वज्ञं सर्वकर्तारं बोधानन्दमयं विभुम्।
निष्कलं स्वप्रकाशं च संचिन्त्य परमं शिवम्।

इति निर्विकारत्वं श्रूयते। तन्निर्विकारत्वबोधिकाः श्रुतयश्च शिवस्योपादानत्वे बाध्येरन्। अत एव न द्वितीयोऽपि। विशिष्टस्योपादानत्वे विशेष्योपादानत्वस्यापि आवश्यकत्वात् विशिष्टस्य विशेषणविशेष्यतत्संबन्धानन्यत्वात् अन्यत्वे वा शिवोपादानत्वासिद्धिप्रसङ्गात्। नापि तृतीयः। परिणममानमायाधिष्ठानत्वमात्रेण शिवोपादानत्वे एतादृशोपादानत्वस्य विकारितानापादकत्वेन शिवोपादानत्वस्य पारिभाषिकत्वापत्तेः। विकारितापादकोपादानत्वस्यैवास्माभिः निषिध्यमानत्वात् अन्यादृशोपादानत्वस्य घटाद्यपेक्षया कुलालादावपि वक्तुं शक्यत्वाच्च। तस्मात् मृल्लोहादिदृष्टान्तस्य दार्ष्टान्तिकवचनस्य चाभेदस्थले[३] एकज्ञानेन सर्वविषयकज्ञप्तौ[४] यादृशं फलं भवति तादृशं फलं सत्यपि भेदे चैतद्विज्ञानात्[५] भवति इत्येतदर्थपरत्वकल्पना युक्ता[६]। ननु यथा निर्विकारत्वबोधकागमानुसारेणाभेदवचनानामन्यपरत्वं एवमभेदवचनेषु साक्षात् अभेदानुसारेण निर्विकारत्वावबोधकागमस्यैवान्यपरत्वं कुतो न स्यादिति चेन्न। निर्विकारत्वावबोधकागमेषु साक्षात् निर्विकारत्वबोधकपदवदभेदवचनेषु साक्षात् अभेदबोधकपदाभावात्। एकविज्ञानेन सर्वविज्ञानप्रतिज्ञान्यथानुपपत्त्या मृल्लोहादिदृष्टान्तानुपपत्त्या चाभेदोऽवगन्तव्यः। सा च साक्षात् निर्विकारश्रुत्यपेक्षया दुर्बलैवेत्यभेदवचनानामेवान्यपरत्वं कल्प्यते। किञ्च–

निमित्तमीशाख्यं तद्दृष्टं[७] सहकारणम्।
उपादानं च यत् सूक्ष्मं सर्वकार्येषु संस्थितम्।

---

१. इत्याद्यनुसारेण मायाविशिष्टशिवस्योपादानत्वं यद्वा जडकार्यस्वभावानुसारेण] मु,क२, क३; इत्याद्यनुसारेण–क१
२. शिखान्तस्थो] मु,क२,क३;शिवान्तस्थो–क१
३. दार्ष्टान्तिकवचनस्य चाभेदस्थले] मु;सदार्ष्टान्तिकवचनस्याभेदस्थले–क१; सदार्ष्टान्तिकवचनस्य भेदस्थले–क२,क३
४. सर्वविषयकज्ञप्तौ] मु;सर्वविषयकज्ञप्तिः–क१,क२; सर्व .... –क३
५. चैतद्विज्ञानात्] सम्पादकीयः पाठः;चेतद्विज्ञानात्–क१,क३;तत्त्वज्ञानात्–क२;ज्ञानात्–मु
६. इत्येतदर्थपरत्वकल्पना युक्ता] मु;इत्येतदर्थपरत्वकल्पना–क१,क२; इत्येतदर्थपरत्वकल्पनात्–क३
७. निमित्तमीश्वराख्यं] मु,क२;निमित्तमीशाख्यं तद्दृष्टं–क१,क३

तथा–

निमित्तम् ईश्वराख्यं स्यात् उपादानं तु बिन्दुराट्।

इत्यादिना निमित्तोपादानत्वयोः व्यवस्थितत्वेन प्रतिपादनात् तत्तदर्थप्रतिपादकश्रुतेश्च। ननु

भूतानि चाहं स्थिरजंगमानि।
यावन्ति चान्यान्यहमेव तानि।

इत्यादिना भेदोऽपि साक्षात् बोध्यते इति चेत्, एवमपि भेदे सत्यभेदस्योपादानोपादेयभावव्याप्तत्वेन[१] लिङ्गेनैव शिवस्योपादानत्वं कल्पनीयम्। तच्च लिङ्गम्[२] उपादानत्वाभावपर्यायनिर्विकारत्वश्रुत्या व्यवस्थितनिमित्तत्वप्रतिपादकवचनेन[३] च बाध्यत एव। किञ्च शिवो नोपादानं चेतनत्वात् पशुवत् इत्यनुमानं[४] सत् प्रतिपक्षं सत् उपादानत्वं नानुमापयति। न च वाच्यम् उपादानत्वव्याप्यलिङ्गस्य श्रुत्या प्रतिपादनात् प्राबल्यमिति। प्रकृतेऽपि शिवचेतनत्वस्य श्रुत्या प्रतिपादनात्। तस्मादभेदबोधकागमस्य[५] अन्यपरत्वमेव कल्पनीयम्[६*]। यदपि उक्तम्– "सृष्ट्यर्थमैक्षत प्राज्ञो बहुस्यामिति शक्तिमान्" इति बहुभवनसंकल्पेनोपादानत्वमवगम्यत इति। तदपि न। उक्तबाधेन चेतनत्वश्रुत्या[७] चान्तर्यामितया सर्वनियामकत्वस्यैव तदर्थत्वकल्पनात्। यदपि उक्तं सदनुविद्धतया प्रतीयमानो घटः सदुपादानः सदनुविद्धतया प्रतीयमानत्वात्। यद्यदनुविद्धतया प्रतीयते तत्तदुपादानकमिति तदपि न। खण्डो गौर्मुण्डो गौरित्यादौ गवानुविद्धतया प्रतीयमानखण्डादौ व्यभिचारात्। असत् शशशृङ्गमसत् खपुष्पमित्यादौ असदनुविद्धतया प्रतीयमानेषु शृङ्गादिषु असदुपादानकत्वापत्तेश्च। तर्हि सत्वाकारानुगतप्रतीतेः का गतिरिति चेत् जातिव्यक्तिसाधारण्येनानुगतप्रतीतेरेवासिद्धेः व्यक्तौ सत्सदिति प्रतीतेः सत्ताजातिविषयत्वं जातौ तु सत्तैकार्थसमवायित्वं विषय इत्येवं कल्पनात्[८]। किञ्च शिवोपादानकत्वे जडस्य चिदात्मकत्वमपि स्यात् उपादानस्वभावत्वादुपादेयस्य। न च वाच्यम् द्रव्योपादानके गुणे द्रव्यत्वस्य दुग्धोपादानके दध्नि दुग्धत्वस्य शृङ्गोपादानके शरे शृङ्गत्वस्य गोमयोपादानके[९] वृश्चिके गोमयत्वस्य चादर्शनात्

---

१. इत्यादिना भेदोऽपि साक्षात् बोध्यते इति चेत्, एवमपि भेदे सत्यभेदस्योपादानोपादेयभावव्याप्तत्वेन] मु,क२,क३;इत्यादिना उपादेयभावव्याप्तत्वेन –क१
२. लिङ्गम्] मु,क२क३;लिङ्गत्वम्–क१
३. व्यवस्थितनिमित्तत्वप्रतिपादकवचनेन] क१,क२क३; व्यवस्थितनिमित्तनिमित्तित्वप्रतिपादकवचनेन–मु
४. इत्यनुमानं] क१,क२,क३; इत्यनुमानेन एतदनुमानं–मु
५. तस्मादभेदबोधकागमस्य] मु;तस्मादभेदबोधकागमस्यापि–क१,क२,क३
६. *इतः परं "यदप्युक्तं" इत्यारभ्य "कर्मनिरपेक्षतया" पर्यन्तं ग्रन्थभागः क३ कोशे न विद्यते।
७. चेतनत्वश्रुत्या] मु;श्रुत्या–क१,क२
८. सत्ताजातिविषयत्वं जातौ तु सत्तैकार्थसमवायित्वं विषय इत्येवं कल्पनात्] क१,क२; समवायेन सत्ताजातिविषयकत्वम्। जातौ तु सामानाधिकरण्येन सत्ताजातिविषयकत्वं सत्तैकार्थसमवायित्व-विषयकत्वं वा इत्येवं कल्पनात्।–मु
९. "जडस्य चिदात्मकत्वमपि स्यात् उपादानस्वभावत्वादुपादेयस्य। न च वाच्यम्। द्रव्योपादानके गुणे द्रव्यत्वस्य दुग्धोपादानके दध्नि दुग्धत्वस्य शृङ्गोपादानके शरे शृङ्गत्वस्य गोमयोपादानके" इत्ययं भागः 'क२' कोशे न दृश्यते।

उपादानसमानस्वभावत्वम्[१] एव उपादेयस्यासिद्धमिति। तथापि उपादेये उपादानगताशेषविशेषगुण-सजातीयगुणवत्ताया[२] आवश्यकत्वात् तथैव मृद्घटादौ दर्शनात्। तस्मात् शिवोपादानत्-वस्यात्यन्तासंगतत्वात् भवत्येवायं दृष्टान्तः शिववदिति। ननु चिद्रूपत्वादिहेतुरप्रयोजकः[३] विपक्षे बाधकाभावादित्याशंक्य किं परिणामवादिनश्चोद्यमुत विवर्तवादिन इति विकल्प्याद्यं निराकरोति परिणाम इति। योऽयः[४] परिणामः स सर्वोऽपि अचित एवेति प्रोक्तः परिणामवादिभिरिति शेषः। दुग्धदध्यादौ तथा दर्शनादिति भावः। नन्वस्तु[५] चितोऽपि परिणामः बाधकाभावादित्याशंक्याह-चिद्रूपस्येति। निर्विकारस्य चौतन्यस्य परिणामे अवस्थान्तरप्राप्त्या निर्विकारत्वमेव हीयत इत्यर्थः।

(वृत्तिः) अत्र शुद्धवर्त्मात्मकार्ये शक्तिः शिवसमवेतक्रियात्मिका नोपादानं चिद्रूपत्वाद्यथा शिवः[६]। ब्रह्मणश्चिदानन्दाज्जगत् जायत इति श्रुतिसमुत्थभ्रान्तिमतां परिणतिधर्मचित् ब्रह्मेति पठतां चिदानन्दब्रह्मशब्दशब्दितात्मचित्प्रकाशकानन्दकरी[७] महामाया च माया चेत्यविन्दतां परिणतवेदान्तविदाम् मतानुसारिभिर्विरुद्धत्वं नाशंकनीयम्। परिणामः उपादानत्वं अचितो मायादिवस्तुनः प्रोक्तः चिद्रूपस्य शिवादिवस्तुनो न युज्यते। यद्यदुपादानं तत्तज्जडात्मकं यथा मृदादिकमिति शक्तेस्तच्छक्तिमतो ब्रह्मणो वा[८] जडत्वापादनात्। तदत्र ब्रह्मशब्दशब्दिते शुद्धाशुद्धलक्षणे माये ब्रह्म पर इति श्रुतेर्न शिव इति दृष्टान्ते विपर्ययव्याप्त्यभावान्न विरुद्धत्वम्।

—•—

(व्याख्या) द्वितीयविकल्पमनूद्य निरस्यति–

(वृत्तिः) चिद्विवर्तत्वं निरस्यति –

चितो विवर्त एवेष्टस्तथात्वे कार्यशून्यता।

(व्याख्या) अन्यैश्चिदुपादानत्ववादिभिः अपि यथान्यथाभावरूपविवर्त एवेष्ट अङ्गीकृतः। तथात्वे प्रपञ्चस्य चिद्विवर्तत्वे कार्यस्य प्रपञ्चस्य शून्यता अभावः स्यादिति शेषः।

(वृत्तिः) कैश्चिदद्वैतवादानुसारिभिः शुद्धाध्वा चितो विवर्त एवोक्तः। तथात्वे विवर्तरूपत्वे कार्यशून्यता कार्यवस्त्वभावता स्यात्। न चेष्टापत्तिः।

—•—

१. उपादानसमानस्वभावत्वम्] क१,क२; उपादानसमस्वभावत्वम्-मु
२. उपादेये उपादानगताशेषविशेषगुणसजातीयगुणवत्ताया] मु,क२ उपादेयोपादानगताशेष-विशेषगुणसजातीयगुणवत्ताया-क१
३. चिद्रूपत्वादिहेतुरप्रयोजकः] मु,क२;चित्वादिहेतुप्रयोजकः-क१
४. यो यः] मु;योऽयं-क१,क२
५. नन्वस्तु] मु,क२;ननु-क१
६. अत्र शुद्धवर्त्मात्मकार्ये शक्तिः शिवसमवेतक्रियात्मिका नोपादानं चिद्रूपत्वाद्यथा शिवः] ज१,ज३; वाक्यमिदं ज२ कोशे न विद्यते।
७. चिदानन्दब्रह्मशब्दशब्दितात्मचित्प्रकाशकानन्दकरी] ज१,ज३; चिदानन्दब्रह्मशब्दशब्दितात्र चित्प्रकाशकानन्दकरी-ज२
८. ब्रह्मणो वा] ज२,ज३;ब्रह्मणो ऽपि -ज१

(व्याख्या) चिद्विवर्तत्वेऽपि सत्यत्वमस्तु इत्यत आह–

चिद्विवर्तस्तथाऽसत्योऽद्वैतवादिभिरिष्यते[1] ।

(व्याख्या) असत्य इति पदच्छेदः। अद्वैतवादिभिरिति च छेदः।अद्वैतवादिभिरपीत्यर्थः।

(व्याख्या) तत्रैवेष्टापत्तिमाशंक्याह–

सर्वप्रमाणसंसिद्धं चिद्विवर्तं कथं जगत्।

(व्याख्या) सर्वेषां प्रमाणं प्रमाणत्वेनाभिमतं प्रत्यक्षमित्यर्थः। सर्वाणि च तानि प्रमाणानि च सर्वप्रमाणानीति वा। प्रत्यक्षानुमानागमप्रमाणैः सम्यक् सिद्धम् प्रमितं जगद् विवर्तं कथं भवेत्। विवर्तवादिनो हि शुक्तिरूप्यादेः प्रतिपन्नोपाधौ स्वाधारताप्रयोजकसर्वसंबन्धैः अभावं वदन्ति। एवं च प्रपञ्चस्यास्यापि चिच्छक्त्युपाधौ स्वाधारताप्रयोजकसर्वसंबन्धैः अभावाङ्गीकारे शून्यतैव प्रसज्येत। किञ्च प्रपञ्चः सत्यः प्रमाणसिद्धत्वात् आत्मवत्। न च हेतुरसिद्धः तनुकरणभुवनादि-ग्राहकाणां प्रत्यक्षादीनामप्रामाण्ये लौकिकवैदिकसर्वव्यवहारसांकर्यप्रसङ्गात्। न च तेषां व्यावहारिकप्रामाण्याङ्गीकारेण निस्तारः आत्मग्राहकाणामपि तथात्वप्रसङ्गात्। न चात्मग्राहकं तत्त्वावेदकं प्रपञ्चग्राहकं प्रमाणमतत्त्वावेदकमिति वाच्यम्। अतत्त्वावेदकं प्रमाणं चेत् वक्तुः मम माता वन्ध्येतिवत् व्याघातप्रसङ्गादिति भावः।

(वृत्तिः) वैखरीवागादिकं जगत् प्रत्यक्षादिप्रमाणसंसिद्धं चिद्विवर्तं शिवचिदाभासः कथं भवेत्। कथंचिदपि न स्यादित्यर्थः।

—•—

(व्याख्या) ननु चिच्छक्त्युपादानपक्षोक्तदोषाभावात् मायैवोपादानं भविष्यति किं बिन्दुनेति माययान्यथोपपत्तिमाशंक्य निराकरोति–

(वृत्तिः) नन्वस्तु मायोपादानं न[2] इत्याह–

मायापि नात्रोपादानं मोहकत्वात् स्वतेजसा।
यतः प्रबुद्धपुंकायकरणानां न कारणम्।
शुद्धाध्ववर्तिनः सर्वे प्रबुद्धाः शिवतेजसा।
देहेन्द्रियादिमन्तोऽपि नाबुध्यास्तेषु ते पुनः।

(व्याख्या) अपि शब्दः प्रकृत्यादिसंग्राहकः माया अशुद्धमाया अत्र शुद्धाध्वन्युपादानम् न भवति स्वतेजसा। स्वशक्त्या मोहकत्वात् विपर्ययादिजनकत्वादित्यर्थः। प्रयोगश्च अशुद्धमाया शुद्धाध्वोपादानं न मोहकत्वात् काचकामलादिवत्। पक्षे अशुद्धत्वविशेषणं शुद्धमायायां बाधवारणाय साध्ये शुद्धाध्वपदम् अशुद्धकार्योपादानमायायां बाधवारणाय। ननु अप्रयोजकोऽयं हेतुरित्यत आह – यत इति। यतः यस्मात् कारणात् प्रबुद्धपुंकायकरणानां प्रकर्षेण बुद्धाः प्रबुद्धा आविर्भूतचिच्छक्तयः

---

१. इदं श्लोकार्धं ज्ञानप्रकाशाचार्यवृत्तौ न विद्यते।

२. न] ज२;तन्न–ज१,ज३

ते च ते पुमांसश्च तेषां कायाः करणानि च तानि तथोक्तानि तेषां माया नोपादानं भवितुमर्हति। तेजस्तिमरवत् प्रबुद्धत्वमोहकत्वयोः विरुद्धस्वभावत्वेन इतरेतरभावायोगेनोपादानोपादेय-भावानुपपत्तेः। एवं च प्रबुद्धपुंकायकरणेषु[1] तदनुरूपमुपादानमन्वेष्टव्यम्। तस्यैव तत्त्वभुवनादावपि उपादानत्वसंभवे किं मायोपादानत्वकल्पनयेति भावः।

ननु शुद्धाध्ववर्तिनां[2] देहादिमत्वेन अस्मदादिवत् अप्रबुद्धत्वात् तत्कायकरणोपादानत्वं मायायाः स्यादित्यत आह - शुद्धाध्ववर्तिन इति। सर्वेऽपि शुद्धाध्ववर्तिनः शिवस्य तेजसा प्रबुद्धाः प्रकृष्टज्ञानक्रियावन्तः। यच्च वक्ष्यति-

सृष्ट्यनन्तरमेवेशः शुद्धाध्वविषयानणून्।
स्वांशुसंस्पर्शनादेव कृत्वा दृक्क्रिययोत्कटान्। इति।

ननूक्तं देहेन्द्रियादिमत्वादिति। तत्राह- देहेति। ते शुद्धाध्ववर्तिनः पुनः देहेन्द्रियादिमन्तोऽपि तेषु देहेन्द्रियादिषु अबुद्धा न मोहवन्तो न। शिवानुग्रहमाहात्म्यं दुर्विज्ञेयमिति भावः।

(वृत्तिः) अत्र शुद्धवर्त्मनि माया ऽपि नोपादानं यतः स्वतेजसा स्वकार्येण मोहकत्वात्। अनात्मन्यात्माभिमानादिरूपाज्ञानजनकत्वात्। प्रबुद्धपुंकायकरणानां प्रकर्षेणाभिव्यक्तशक्ति-मदणुदेहेन्द्रियादिकरणानां न कारणं ततः। ननु श्रीमत् श्रीकण्ठादीनिवाधिकारनिबन्धन-प्रकाशरूपशरीरादिकं भूत्वा न तान् मोहयन्ती सा तु स्यात्। तन्न। शुद्धाध्ववर्तिनः सर्वेऽधिकारिणोऽनधिकारिणो वा दीक्षां विना तत्र प्रगमासम्भवात्। शिवतेजसा दीक्षानाम्न्या शिवशक्त्या निर्धूतमायागर्भाधिकारनिबन्धनतया प्रबुद्धाः समभिव्यक्तशक्तयः। शुद्धाध्वा न मायोपादानकः[3]। ते पुनर्देहेन्द्रियादिमन्तोऽपि तेषु तत्र निवासिषु मध्ये ये केचिदपि नाबुद्धा न ह्यनभिव्यक्तशक्तयः। तदनात्मन्यात्माभिमानरूपमतिमदनाधारत्वाद्धेतोः। यस्तु न हि न मायोपादानः स तु न तदनाधारः। यथा अशुद्धाद्धवा।

—•—

(व्याख्या) ननु देहेन्द्रियादिमत्वेऽपि शिवतेजसा चेत् प्रबुद्धता तर्हि तद्देहादेः मायिकत्वेऽपि दीक्षया जीवन्मुक्तानां सकलानामिव तेषामपि प्रबुद्धता स्यादित्यत आह-

(वृत्तिः) विमुक्तकर्मत्वादपि नेत्याह -

किञ्च कर्मोज्झिताः सर्वे पुद्गलाः शुद्धवर्त्मनि।
कथं कर्मानुसारेण माया परिणता सती।
तेषां देहेन्द्रियादीनामुपादानं भवेद् द्विजाः।

(व्याख्या) शुद्धवर्त्मनि सर्वे पुद्गलाः अणवः कर्मोज्झिताः कर्मणा परित्यक्ताः तत्तत् कर्मानुसारेण कर्मानुगुण्येन देहादिरूपेण परिणममानाः माया तेषां कर्मोज्झिताणूनां यानि देहेन्द्रियादीनि

---

१. प्रबुद्धपुंकायकरणेषु] क१,मु; प्रबुद्धकार्यकरणेषु-क२
२. शुद्धाध्ववर्तिनां] मु,क२;शुद्धाध्ववर्तिनः-क१
३. मायोपादानकः] सम्पादकीयः पाठः;मायोपादानतः-ज१; मायोपादानः-ज२,ज३

तेषामुपादानं कथं भवेत् न कथमपीत्यर्थः। तत्सहकारिकर्माभावादिति भावः। ननु मायाकार्यमात्रे कर्मसहकारित्वे तत्सापेक्षत्वेन ईश्वरस्य जनकतया स्वातन्त्र्यविघातापत्तिः न चातिस्वतन्त्रपरमेश्वरस्य पारतन्त्र्यमिष्यते। न च कर्मनिरपेक्षतया[१*] परमेश्वरस्य जनकत्वे सर्वदा सर्वकार्योत्पत्तिप्रसङ्गः अपेक्षणीयान्तरस्याभावादिति वाच्यम्। अतिस्वतन्त्रस्याचिन्त्यशक्तेः[२] परमशिवस्य तत्तत्कार्योत्पादनेच्छायां तत्तत्कार्यजनकत्वात्। न च कर्मानुष्ठानवैफल्यापत्तिः। ईश्वरप्रसादसाधकत्वेन सफलत्वसंभवात्। कर्मसहकारित्वेऽपि तत्प्रसादस्य अपेक्षितत्वात्। अत एव कृतकर्मणामपि ययातिप्रभृतीनाम् ईश्वरानुग्रहाभावे फलाभावः श्रूयते। ईश्वराराधनात्मके वैदिककर्मणि तत्प्रसादाभाव एव न[३] संगच्छत इति चेन्न। अतिस्वतन्त्रतया कृतेप्याराधने प्रसादाभावस्य अकृतेऽप्याराधने[४] प्रसादस्य चोपपन्नत्वात्। अत एवेदानीन्तनेषु अभिव्यक्तेश्वरविलासभूतिलेशेषु प्रभुषु इयं रीतिः दृश्यते। न चौवमनुष्ठितेऽपि कर्मणि ईश्वरप्रसादाभावस्याननुष्ठितेऽपि तस्मिन् तत्प्रसादस्य च शंकया वैदिककर्मानुष्ठानादिप्रवृत्तिः न स्यादिति वाच्यम्। कृषिराजसेवादिष्विव सन्देहादपि वैदिकानुष्ठाने प्रवृत्युपपत्तेः। पशोरस्वतन्त्रतया स्वतन्त्रेश्वरप्रेरणाया प्रवृत्त्युपपत्तेश्च। नन्विन्द्रियशरीरादिभिः चिद्योगः क्रमिककिञ्चित्समवधानहेतुकः कादाचित्कत्वात् घटादिवदित्यनुमाने तत्साधके जाग्रति कथं तन्निराकरणमिति चेन्न। ईश्वरेच्छामादायार्थान्तरत्वात्। किञ्च त्वन्मतेऽपि पूर्वपूर्वजन्मार्जितानां[५] देवमनुष्यतिर्यगादियोनिप्रापकाणां कर्मणां सत्वेन तत्सहकृतेन ईश्वरेण युगपत्तावद्योनिसंबद्धदेहा उत्पद्येरन्। न च कर्मविपाकक्रमेण कार्यक्रम इति वाच्यम्। विपाकस्य बदरफलादिष्विवावस्थाविशेषरूपत्वे तस्य कर्मण्यनुपपत्तेः। न चाधिककालसंबन्ध एव तत्परिपाकः। जन्मान्तरकृतानामेतज्जन्मानुष्ठितकर्मापेक्षया परिपक्वतया तत्सत्वेऽपि "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते" इति वचनप्रतिपादितस्य एतज्जन्मानुष्ठितोत्कटपुण्यपापादिनिष्ठस्य फलजनकत्वस्य[६] अनुपपत्तिप्रसङ्गात्। न च तत्तत्कर्मफलोत्पादकसहकारिसमवधानरूपः कर्मपाकः[७] तत्र ये सहकारिणस्तत्सहकृतस्येश्वरस्यैव तज्जनकत्वे कर्मवैफल्यप्रसङ्गात्। शुद्धाध्ववर्तिनां कर्माभावेन तद्गतभोगे कर्मनिरपेक्षस्येश्वरस्य जनकत्वाभ्युपगमाच्च। न च तत्रापि त्वया कर्म स्वीक्रियते। तत्र तत्रागमेषु विज्ञानकलानां कर्माभावस्यैव श्रूयमाणत्वात्। सुप्रभेदे तावत्-

---

१. * इतः परं क३ कोशे ग्रन्थभागः अनुवर्तते।

२. अतिस्वतन्त्रस्याचिन्त्यशक्तेः] क१,क३;स्वतन्त्रस्याचिन्त्यशक्तेः-मु,क२

३. एव न] मु,क३;न-क१,क२

४. अकृतेऽप्याराधने] मु,क२,क३;अकृते-क१

५. पूर्वपूर्वजन्मार्जितानां] मु,क२,क३;पूर्वपूर्वजन्मार्ज़नानां-क१

६. एतज्जन्मानुष्ठितोत्कटपुण्यपापादिनिष्ठस्य फलजनकत्वस्य] क१,क२,क३; एतज्जन्मानुष्ठितोत्कट-पुण्यपापादिनिष्ठफलजनकत्वस्य-मु

७. तत्तत्कर्मफलोत्पादकसहकारिसमवधानरूपः कर्मपाकः] मु; तत्तत्कर्मफलोत्पादकसहकारि-समवधानरूपकर्मपाकः-क१; तत्तत्कर्मफलोत्पादकसहकारिसमवधानरूपत्वं कर्मपरिपाकः-क२; तत्तत्कर्मफलोत्पादकसहकारिसमवधानरूपत्वं कर्मपाकः-क३

त्रिधा सोऽयमनुग्राह्यः सकलः प्रलयाकलः
विज्ञानाकल इत्येतेषां स्वरूपमधुनोच्यते।
मायाकर्ममलच्छन्नः सकलः सोऽभिधीयते।
मलकर्मावृतो यस्तु स भवेत् प्रलयाकलः।
मलैकबन्धसंबन्धो विज्ञानकल उच्यते। इति।

तथा आकरेऽपि पशुपटले–

विज्ञानकेवलानां तु सिद्धौ युक्तिरिहोच्यते।
कलातत्त्वान्तशोधिन्या दीक्षया ज्ञानतोऽपि वा।
योगेन भोगतो वाथ संन्यासाद्वा परिक्षयः।
कर्मणां तु तदायत्तमायायाश्च परिक्षयात्।
मल एकोऽवशिष्टः स्यात् तस्मात् विज्ञानकेवला। इति।

तथा तत्रैव–

न कर्म भोगवैचित्र्ये कारणं शुद्धवर्त्मनि।
मलस्य परिपाको यो विचित्रः सोऽत्र कारणम्।
किं कर्मणाऽत्र विप्रेन्द्रा यत्रेच्छाभोग इष्यते। इति।

अपि च प्रलये सर्वोपसंहारेण बुद्धिविनाशेन तदाश्रितानां कर्मणामवस्थानासंभवेन सर्गाद्यसमये कर्मनिरपेक्षस्येश्वरस्य जनकत्वावश्यंभावाच्च। तस्मात् कर्मनिरपेक्षस्येश्वरस्य कार्यमात्रे जनकत्वं स्वीकर्तव्यम्। अत्राभिधीयते – न तावत् कर्मनिरपेक्षस्य दुःखादिहेतुत्वं संभवति। तथात्वे वैषम्यापत्तेः। न चेदानीन्तनप्रभुदृष्टान्तेनेश्वरेच्छायाः कर्मनिरपेक्षया जनकत्वम्। तेषामभिप्रायदोषात् जन्मान्तरादृष्टवशाद्वा वैषम्याङ्गीकारे प्रसादाप्रसादयोरुपपत्तेः[1]। न च परमकारुणिके परमेश्वरे तथा वक्तुं शक्यते। अत एव भगवता बादरायणेन वैषम्यनैर्घृण्यदोषपरिहाराय "वैषम्यनैर्घृण्ये न सापेक्षत्वात्" इत्युक्तम्। ययातिप्रभृतिषु सत्यपि कर्मणि फलस्यादर्शनात् कर्मनिरपेक्षतया[2] ईश्वरप्रसादस्य जनकत्वमिति यदुक्तं तन्न। तेषां पुण्यकारित्वाहंकारेण तत्क्षये फलाभावोपपत्तेः कर्मनैरपेक्ष्ये ईश्वरेच्छाया नित्यत्वेन सर्वदा सर्वकार्योत्पत्तिप्रसङ्गाच्च। न च स्वतन्त्रतया कदाचित् कार्यं जनयति कदाचिन्नेति वक्तुं युक्तम्। सामग्रीसत्वे कार्यविलम्बायोगात् सहकारिसमवधान-क्रमव्यतिरेकेण क्रमेण कार्यजननस्यासंभवात्। न च कर्मानुगुण्येन परमेश्वरस्य जनकत्वे स्वातन्त्र्यभङ्गापत्तिः। तत्तदपराधाद्यानुगुण्येन निग्रहानुग्रहकर्तुः प्रभोरिव स्वातन्त्र्याविघातोपपत्तेः। किञ्च कुलालादीनां स्वाधिष्ठितकरणसापेक्षत्वेऽपि चेतनान्तरेच्छानुविधायित्वाभावेन स्वातन्त्र्यवत् प्रकृतेऽपि तदुपपत्तेश्च। तदुक्तं सिद्धगुरुभिः–

स्वतन्त्रस्याप्रयोज्यत्वं करणादिप्रयोक्तृता।
कर्तुः स्वातन्त्र्यमेतद्धि तत् कर्माद्यनपेक्षिता। इति।

---

१. प्रसादाप्रसादयोरुपपत्तेः] मु,क२;प्राप्त .... वपत्तेः-क१; प्रसादयोरुपपत्तेः-क३

२. कर्मनिरपेक्षतया] मु,क२,क३;कर्मनिरपेक्षतायाम्-क१

यदपि उक्तम् सर्गाद्यसमये निरपेक्षस्यैव हेतुत्वमिति तदपि न। प्रलये बुध्यादीनामभावेऽपि परमोपादानीभूतमायाया विद्यमानत्वेन तत्रावस्थानसंभवे कर्मापेक्षायाः तत्रापि अविरुद्धत्वात्। यदपि उक्तम् कर्मसापेक्षत्वेऽपि युगपत् विरुद्धकार्योत्पत्त्यापत्तिरिति तदपि न। परिपक्वकर्मणामेव कार्यहेतुत्वात् सहकारिसाहित्यस्यैव च परिपाकशब्दार्थत्वात्। न चावश्यस्वीकर्तव्यसहकारिभिरेवान्यथासिद्धिः। तत्साधकमानानां कर्मसाधनावसरे[१] वक्ष्यमाणत्वात्। न च शुद्धाध्ववर्तिकार्ये कर्माभावेन[२] कार्यमात्रे तस्य सहकारित्वायोगः। तत्रापि अशुद्धकर्मणामभावेऽपि शुद्धकर्मणाम्[३] अवश्यकर्तव्यत्वात्[४]। अन्यथा

यो यत्राभिलषेत् भोगान् स तत्रैव नियोजितः।

सिद्धिभाङ्मन्त्रसामर्थ्यात्।

इत्यादिस्वायम्भुवादिवचनानि तत्तत्पदयोजनतत्तन्मन्त्रोपास्त्यादीनां तत्तत् विद्येश्वरसदाशिवादितत्तदुपास्त्यादीनां च तत्तद्भुवनप्राप्तिहेतुत्वावेदकानि पीड्येरन्। किञ्च यावन्तोऽशुद्धाध्वनि स्वीक्रियन्ते तावन्तः शुद्धाध्वन्यपि शुद्धरूपतया सन्ति। तदुक्तम्–

अत्रापि कालमुख्यानि सन्ति तत्त्वान्यथो यथा।
किन्तु तान्यत्र शुद्धानि बैन्दवानि द्विजोत्तमाः। इति।
तेषां कलादियोगेऽपि पारतन्त्र्यं कृतं न तैः।
विज्ञानकेवलास्तस्मात् सकला अकला अपि। इति च।

तथान्यत्रापि[५] शुद्धाशुद्धमिश्राध्वव्यापकनिवृत्त्यादिपञ्चकलाव्याप्तशुद्धाशुद्धमिश्रभोगहेतुत्वेन

पञ्चकलाभोगतारतम्येन कर्मणः पञ्चविधत्वमुक्तम्।
लौकिकं वैदिकं चेति चाध्यात्मं चातिमार्गिकम्।
मान्त्रं च पञ्च कर्माणि निवृत्त्यादिकलागतम्। इति।

तत्र लौकिकं वापीकूपतटाकादिजनितम्। वैदिकम् अग्निष्टोमादिवेदोक्तकर्मजनितम्। आध्यात्मिकमान्तरवैराग्याद्यभ्यासजनितम्। आतिमार्गिकम् इन्द्रियवायुमार्गनिरोधादिरूपयोगाभ्यासजनितम्। मान्त्रं शुद्धमन्त्राभ्यासजनितम्। एतच्च पञ्चविधं कर्मजातं शुद्धाशुद्धसर्वभुवनभोगोत्पत्तिस्थलीभूतनिवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीतकलासु गतम्। कर्मणां कलागतत्वं च कृषेरिव क्षेत्रसंस्कारकत्वाश्रयणादुक्तम्। तत्राद्यत्रयमशुद्धमिश्रभुवनाधाराद्यकलात्रयवर्तित्वेन तद्भोगप्रदत्वादशुद्धम्। अन्त्यद्वयम्[६] आतिमार्गिकं मान्त्रं च शुद्धाध्वभुवनभोगाधारशान्ति-

---

१. कर्मसाधनावसरे] मु,क२;कर्मबाधनावसरे–क१,क३
२. कर्माभावेन] मु,क२,क३;कर्माभावे–क१
३. अशुद्धकर्मणामभावेऽपि शुद्धकर्मणां] मु,क२,क३;अशुद्धकर्मणामभावे विशुद्धकर्मणां–क१
४. अवश्यकर्तव्यत्वात्] क१;अवश्यवक्तव्यत्वात्–मु,क२,क३
५. अत्र क१ कोशे ग्रन्थपातः दृश्यते।
६. अन्त्यद्वयम्] क२,क३;अन्यद्द्वयम्–मु

शान्त्यतीतकलाधारत्वेन तद्भोगप्रदत्वेन शुद्धमायाकार्यमन्त्रार्जितत्वेन च शुद्धम्। शुद्धाध्वनि[१] कर्मनिराकरणवचनानामशुद्धकर्मविषयत्वेन नाकरग्रन्थविरोधः। एवं च कर्मानुसारेणेत्यस्याशुद्ध-कर्मानुसारेणेत्यर्थो बोद्धव्यः। न वा आगमान्तरविरोधोऽपीति द्रष्टव्यम्।

(वृत्तिः) किञ्च शुद्धवर्त्मनि सर्वे पुद्गलाः भुवनपतयः तन्निवासिनश्च कर्मोज्झिताः कर्मविमुक्ताः। तेषां कथं कर्मानुसारेण मायापरिणतौ शरीराद्यात्मिकायां स्थितिः न कथंचिदपीत्यर्थः। कर्मोज्झितत्वेऽपि कथं तत्र स्थितिः श्रीमत्श्रीकण्ठादीनामिति नाशंकनीयम्। तेषां मायागर्भाधिकारनिबन्धनतयेति। नहि तेषां मायातिक्रान्तानां शुद्धाध्वस्थानां तन्निबन्धनं कर्म चेति किञ्चिन्निबन्धना तत्र स्थितिः। हे द्विजाः।

—•—

(व्याख्या) पूर्वोक्तार्थापत्त्यन्यथोपपत्तिनिराकरणमुपसंहरति–

तस्मात् शुद्धाध्वनश्चास्य स्वानुकार्येव कारणम्।
इष्यतां कुण्डलिन्याख्यं शुद्धमेतत् द्विजोत्तमाः।

(व्याख्या) अशुद्धाध्वनः मायेव अस्य शुद्धाध्वनश्च स्वानुकार्येव कार्यसमानस्वभावमेव कुण्डलिन्याख्यं शुद्धं कारणम् उपादानम्[२] इष्यताम्। प्रयोगश्चः- शुद्धाध्वा समानस्वभाव-वस्तूपादानकः[३] उपादेयत्वात् घटादिवदिति। न चाप्रयोजकत्वम्। असमानस्वभावस्यापि उपादानत्वे कुटजबीजात् कदलीकाण्डोत्पत्तिप्रसङ्गः। अयं भावः - यद्यपि जीवन्मुक्तानां योगिनां च मायिकदेहसत्वेऽपि शिवतेजसा प्रबुद्धत्वमस्ति तथापि तेषामेव सकलकर्माभावे मायिकदेहानुत्पत्तिवत् शुद्धाध्ववर्तिनामपि कर्मसंबन्धाभावेन मायिकदेहोत्पत्त्यनुपपत्तेः कर्माद्यनपेक्ष-शुद्धाध्ववर्तिदेहाद्युपादानमन्यदङ्गीकार्यम्। अन्यथा जीवन्मुक्तानामपि कर्मानपेक्षमायिक-देहान्तरोत्पत्तिप्रसङ्ग इति।

(वृत्तिः) यस्मान्मायापरिणतौ स्थितिर्न सम्भाव्यते तेषां देहेन्द्रियादीनां[४] तदन्यथानुपपत्त्योपादानं भवेत्[५]। येन केनचिदुपादानेन भाव्यम्। तस्मादस्य शुद्धाध्वनः स्वानुकारिस्वानुरूपिशुद्धत्वमेव स्वानुरूपित्वं कुण्डलिन्याख्यमेवैतत् कारणमुपादानलक्षणं हे द्विजोत्तमाः! इष्यतामभ्युपगम्यताम्।

—•—

(व्याख्या) एवं साधितायाः कुण्डलिन्या इतरविलक्षणं स्वरूपमाह–

(वृत्तिः) सूचितं बिन्दुसमवायवादं प्रतिक्षिपति –

---

१. शुद्धाध्वनि] मु; अशुद्धाध्वनि-क२,क३
२. कारणम् उपादानम्] मु,क२;कारणं-क१;इतः परं क३ कोशः अतीव जीर्णः, वाक्यानि लुप्तानि, व्यत्यस्तानि च दृश्यन्ते।
३. स्वसमानस्वभाववस्तूपादानकः] मु,क२;समानस्वभाववस्तूपादानक्रमः-क१
४. देहेन्द्रियादीनां] ज१,ज३; सर्वेन्द्रियादीनां-ज२
५. तदन्यथानुपपत्त्योपादानं भवेत्] ज३;तदन्यथानुपपत्त्याऽऽपादनं भवेत्-ज१,ज२

सा च कुण्डलिनी शंभोः शक्तिः शुद्धा जडात्मिका।
न तादात्म्यात् स्थिता किन्तु वर्तमाना परिग्रहे।

(व्याख्या) सा पूर्वोक्तलक्षणप्रमाणसिद्धा कुण्डलिनी शंभोः शक्तिः अधीना[1] एतेन स्वातन्त्र्यं निराकृतम्। शुद्धेत्यनेनाशुद्धमायावैलक्षण्येन शुद्धाध्वानुगुणत्वमुक्तम्। जडात्मिकेत्यनेन चिच्छक्तिवैधर्म्येण परिणामादियोग्यत्वं सूचितम्। नन्वियं शिवस्य शक्तिश्चेच्छिच्छक्तिवत् तादात्म्यापन्ना किं? नेत्याह- नेति। कस्तर्हि संबन्ध इत्यत आह- किंत्विति। तु शब्दः पक्षान्तरव्यावृत्यर्थः। जडाजडयोस्तादात्म्यासंभवेन परिग्राह्यपरिग्राहकभाव एव संबन्ध इत्यर्थः।

(वृत्तिः) सा च कुण्डलिनी शम्भोः शिवस्य शुद्धा जडात्मिका शक्तिः न तत्र तादात्म्यात् समवायात् स्थिता। किन्तु अपि तु परिग्रहे शुद्धवर्त्मोपादानसचिन्तावलोकने वर्तमाना विषयीभूता स्थिता परिग्रहशक्तिरित्यर्थः।

—•—

(व्याख्या) उक्तार्थे प्रमाणमाह-

(वृत्तिः) तत्र युक्तिं प्रदर्शयति-

शिवे कर्तरि तादात्म्यान्नेयं कुण्डलिनी स्थिता।
उपादानत्वतो हेतोः कुलाले मृत्तिका यथा।

(व्याख्या) इयं कुण्डलिनी पक्षः कर्तरि शिवे तादात्म्येन स्थिता नेति साध्यमुपादानत्वादिति हेतुरित्यर्थः। तत्र दृष्टान्तः कुलाले मृत्तिका यथा इति। ननु यदुक्तं कर्मोज्झितदेहाद्युपादानत्वेन बिन्दुसिद्धिरिति तदयुक्तम्।

(वृत्तिः) श्लोकार्थस्तु स्पष्टः।

—•—

(व्याख्या) तादृशशुद्धदेहादौ प्रमाणाभावादित्याशंक्याह-

(वृत्तिः) पुनरपि बिन्दुं साधयति -

किञ्च मायाद्युपादानं देहेन्द्रियवतां नृणाम्।
क्षुब्धं कार्यकरं तस्य कर्तुर्देहेन्द्रियादिकम्।
यदुपादानतो जातं स बिन्दुरिति गम्यताम्।

(व्याख्या) मायाद्युपादानमित्यादिपदेन प्रकृतिसंग्रहःद्यदेहेन्द्रियवतां नृणां सकलानां यानि शरीरादीनि तेषां मायादि यदुपादानं तत् क्षुब्धं सदैव कार्यकरं वाच्यम्। अक्षुब्धस्यापि कार्यकरत्वे सर्वदा कार्यकरत्वप्रसङ्गात्। तत्र क्षोभकः शरीरी अनन्तेशादिर्वाच्यः। शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः। इति वचनात्। तस्य क्षोभकस्य कर्तुरनन्तेशस्य देहेन्द्रियादिकं यस्मात् उपादानात् जातं स बिन्दुरिति ज्ञायताम्। ननु अनन्तेशस्य शरीरित्वेऽपि कुलालवदशुद्धशरीरिण[2]

---

१. अधीना] मु,क२;अधुना-क१

२. कुलालवदशुद्धशरीरणः] मु,क२;कुलालवदशुद्धशरीर-क१

एव तत्त्वं किं न स्यादिति चेन्न। मायाकार्यं शरीरिकर्तृकं भविष्यति दुःखानुषक्तकार्यत्वात् सकलाणुभोगहेतुत्वाद्[१] वा घटवदिति। अथवा माया प्रयोज्यकर्त्रधिष्ठितत्वमनुमेयम्। तत्र कलाव्याप्तोपादानत्वं हेतुः प्रयोज्यत्वेन च शरीरित्वम्। शरीरस्य च भुवनवृत्तित्वं भुवनस्य च तत्त्ववृत्तित्वम्। अत एव प्रमाणात्[२] शुद्धाध्वनां तदुपादानबिन्दोश्च सिद्धिः। तदुक्तं रत्नत्रयेऽपि–

तथा हि[३] माया या तेषां क्षोभितानन्ततेजसा।
कलादिक्षितिपर्यन्तं तत्त्वजातमसूत सा।
अविशुद्धजडत्वेन मायामार्गतया तथा।
दुःखानुषङ्गात् मायेयकार्मणावमलान्वयैः।
सकलाणूपभोग्यत्वात् परिणामोदयैरपि।
माया जडान्तरव्याप्ता परिणामवती च यत्।
निष्पादने कलादीनां शरीरादि समन्वितम्।
पुरुषं गमयेदेव[४] पराधीनमसंशयम्।
सुवर्णमिव कर्मारं मकुटोत्पादकर्मणि। इति।

तथा तत्रैव–

किञ्च माया प्रयोज्येन कर्त्रा केनाप्यधिष्ठिता।
उपादानं कलादीनां कलाव्याप्तस्वरूपिणी।
यथामृत् कलशादीनां कुलालेन तथा ह्यसौ।
प्रयोज्यः पशुभावेन कर्ता हेतुर्महेश्वरः।
मायायाः क्षोभको येन शरीरेणेन्द्रियेण च।
देशादिना स सिद्धोऽध्वा विशुद्धः शिवशासने।

इत्यनुमानात् शुद्धशरीरस्यैव क्षोभकत्वाङ्गीकारात्। अन्यस्य शरीरिणः क्षोभकत्वे अनवस्थापाताच्च। मायाया अनन्तेशशरीरोपादानत्वं न संभवतीति तद्देहोपादानत्वेन बिन्दुसिद्धिरिति भावः।

(वृत्तिः) किञ्च पुनरपि तत्साधनं किञ्चिदस्ति। मायाद्युपादानम् आदिशब्देन कलादिकं गृह्यते। नृणां देहेन्द्रियकरमुपलक्षणतया देहेन्द्रियादिजनकम्[५]। तत् क्षुब्धं विकृतं सत् कार्यकरं स्वार्थक्रियायुक्तं भवति। कर्त्रा विना न तत् स्वतः सिध्यति। ततस्तदानीमशुद्धाध्वनो ऽनुत्पत्तेः। तस्य कर्तुर्देहेन्द्रियादिकं यदुपादानतो जातं स बिन्दुरिति गम्यतां ज्ञायताम्। ननु शिवेनैव क्षोभ्यतां किं कर्त्रन्तरेण। सत्यम्। दृष्टवददृष्टकल्पना। यथा भूमण्डलेशो नृपतिरन्तरङ्गममात्य-

---

१. सकलाणुभोगहेतुत्वात्] मु,क२, सकलाणुभोगे हेतुत्वाद्–क१
२. एव प्रमाणात्] मु;एवं प्रमाणस्य–क१,क२
३. तथा हि] मुद्रितः पाठः;तथापि मायया–क१;तथा हि मायाया–मु,क२
४. गमयेदेव] मु,क२ (मुद्रितरत्नत्रयग्रन्थे च);गमयेदेवं–क१
५. देहेन्द्रियादिजनकम्] ज२,ज३;देहेन्द्रियादीनाम्–ज१

पुरोहितादिप्रकृतिवर्गं स्वयमेव कुर्वन् दृश्यते। बहिरङ्गमात्मकल्पामात्यादिप्रेरणेनैवेत्येवमत्रापि श्रुतेरविरोधः। तदुक्तं किरणे –

शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः। इति।

ननु कल्पनालाघवात् स तु भवतु विनिर्धूततनुः तन्न। प्रयोज्यकर्तुः कुलालादिवत् शरीरादिसिद्धेः। ननु स तु भवतु स्वतन्त्रः क्षोभकर्ता तदयुक्तम्। तस्याप्यन्तरङ्ग-बहिरङ्गोक्त्याऽनवस्थाप्रसङ्गात्। किञ्च माया प्रयोज्यकत्रा क्षोभ्या अशुद्धत्वात् मृदादिवत् परिणामवत्वे सति जडान्तरव्याप्तत्वादपि। तदुक्तम् रत्नत्रये –

माया जडान्तरव्याप्ता परिणामवती च यत्।
निष्पादने कलादीनां शरीरादिसमन्वितम्।।
पुरुषं गमयेदेव पराधीनमसंशयम्।
सुवर्णमिव कर्मारं मकुटोत्पादकर्मणि।। इति।

ततो यथा गलूचिर्मूलतो विच्छिन्नोऽपि स्थानविशेषमाश्रयमाश्रित्य पुनः प्ररोहति तथा विच्छिन्नमान्द्यपाकमलादिपाशत्वात्। विच्छिन्नापि शुद्धविद्या अनन्तस्य मलवासना-समुत्थाधिकारमलनिबन्धना अधिकारलक्षणस्थानविशेषमाश्रयमाश्रित्य शरीराद्यात्मना पुनः प्ररोहं याति। सर्पेण कालतो दष्टः प्रक्षीणकर्मापि यथा मन्त्रशक्त्या धृतदेहश्चिरं तिष्ठति तथा प्रक्षीणकर्मापि अधिकाराख्येश्वरशक्तिसामर्थ्याद् धृतदेहोऽनन्तोऽधिकारम्[१] अनुतिष्ठति। शुद्धयोनिमयी स्थूलशिवत्वव्यक्तिकरी तत्तनुर्न तत्प्रतिकूलविधात्री। अस्तु वा मोहिनी सर्पं स्वशरीरस्थं सर्पान्तरं प्रतिसंक्रान्तं[२] वा विषमिव भगवन्तमनन्तं न बाधते। यथा च प्रक्षीणमलकर्मद्विबन्धश्रीकण्ठादिकं स्वमायामयी तनुर्न बाधते। तथेति च न काचित् क्षतिः।

—•—

(व्याख्या) पूर्वं शुद्धाध्वोपादानत्वेन तद्वर्तिदेहाद्युपादानत्वेन वा बिन्दुः साधितः। इदानीं सर्वजनप्रत्यक्षवर्णात्मकशब्दोपादानत्वेन[३] बिन्दुं साधयति–

(वृत्तिः) इतोऽपि लक्ष्यत इति आह–

किञ्च शब्दानुसंविद्धा[४] जायन्ते प्रत्यया नृणाम्।
न ह्यकारणकाः शब्दाः सम्भवेयुः कदाचन।
तेषां यत् कारणं विप्राः स बिन्दुर्बहुवृत्तिकः।

---

१. अनन्तोऽधिकारम्] ज२,ज३;अनन्ताधिकारम् –ज१
२. प्रतिसंक्रान्तं] ज२,ज३;प्रतिसूत्रान्तं –ज१
३. तद्वर्तिदेहाद्युपादानत्वेन वा बिन्दुः साधितः। इदानीं सर्वजनप्रत्यक्षवर्णात्मकशब्दोपादानत्वेन] मु; तद्वर्तिदेहाद्युपादानत्वेन–क१; तद्वर्तिदेहाद्युपादानत्वेन बिन्दुः साधितः। इदानीं सर्वजनप्रत्यक्षवर्णात्मकशब्दोपादानत्वेन–क२
४. शब्दानुसंविद्धा] मु;शब्दानुसंसिद्धा–क१,क२

(व्याख्या) नृणां पशूनां शब्दानुसंविद्धाः[१] घटोऽयं पटोऽयमित्यादिप्रत्यक्षा जायन्ते तथा च प्रत्यक्षप्रमितिशब्दोपादानत्वेन[२] बिन्दुसाधने न[३] पूर्ववत् प्रसाध्याङ्गत्वमस्येति भावः। ननु शब्दानां नित्यत्वेन कारणापेक्षैव नास्ति कथं तदुपादानतया तत्सिद्धिरित्यत आह न ह्यकारणका इति। शब्दा अकारणकाः कारणनिरपेक्षाः कदापि न संभवेयुः। अयं भावः। शब्दः कारणं विनैवोत्पद्यते[४] उत नित्य[५] इति। नाद्यः स्यादेव न स्यादेव वा न तु कदाचित् स्यादित्यादिप्रसङ्गात्। न द्वितीयः नामरूपसृष्टिवाक्यविरोधादिति। प्रकृते योजयति तेषामिति। तेषां वर्णात्मकशब्दानां यदुपादानकारणं बिन्दुः।

ननु शब्दोपादानत्वेन सिद्धस्य बिन्दोस्तावन्मात्रहेतुत्वमेव स्यादित्यत आह- बहुवृत्तिक इति। पूर्वोक्ततनुकरणभुवनाद्युपादानत्वमपीति भावः। वृत्तिपदेन परिणामवादो बिन्दुकार्येषु निरस्यते।

(वृत्तिः) किञ्च नृणां प्रत्ययाः अयं घट इत्यादिपरामर्शरूपबोधाः शब्दानुसंविद्धाः शब्दोल्लिखिता जायन्ते। हे विप्रास्ते शब्दाः वर्णरचनादिलक्षणत्वात् कदाचन न ह्यकारणकाः सम्भवेयुः। तेषां यत् कारणं स बहुवृत्तिकः अमितकार्यव्यक्तिमान् बिन्दुः।

—•—

(व्याख्या) ननु वर्णात्मकशब्दाः आकाशोपादानकाः शब्दत्वात् ध्वनिशब्दवदित्यनुमानात् आकाशे शब्द इति प्रतीतेश्च आकाशस्यैव शब्दोपादानत्वमित्याशंक्य निराकरोति-

(वृत्तिः) कैश्चित् सांख्यादिभिः कार्यद्वारा स्थूलशब्दोपादानं शब्दतन्मात्रं तदितरैराकाशं तदुपादानं तदपरैः पुरुषसमवेतिनी तु वागिति तदन्यैः तदीयक्रियाशक्त्यवस्था सेति चोच्यते। तदिदं प्रतिक्षिपति-

न चात्र शब्दतन्मात्रं तत्तेषां व्यञ्जकं यतः।
यद्व्यञ्जकं न तत् व्यङ्ग्यं सुप्रसिद्धा तयोर्भिदा।

(व्याख्या) आकाशरूपेण परिणतं शब्दतन्मात्रमेव वर्णात्मकशब्दोपादानं भवत्विति शंकार्थः। उपादानोपदेययोः समानस्वभावत्वद्योतनाय शब्दतन्मात्रपदोपादानम्। तत्र हेतुमाह-यदिति। यतः कारणात् तदाकाररूपेण परिणतं शब्दतन्मात्रं तेषां वर्णात्मकशब्दानां व्यञ्जकं स्वकार्यध्वनिद्वारेति शेषः। नन्वाकाशोद्भवानां ध्वनीनां वर्णानां च विभज्य भेदाग्रहात् कथं कुण्डलिनीसिद्धिरित्यत आह यदिति। यद्ध्वनिरूप[६] वर्णानां व्यञ्जकं तत् व्यङ्ग्यं न भवति। तदुपपादयति सुप्रसिद्धेति। घटालोकयोरिव तयोः ध्वनिवर्णयोः व्यञ्जकव्यङ्ग्यात्मनोः भेदः सुप्रसिद्ध इति। अयं भावः- श्रूयमाणवर्णातिरेकेण तद्व्यञ्जकतया ध्वनीनामपि अनुभवसिद्धत्वात् वर्णेभ्यो भेदस्य समुद्रघोषादौ

---

१. शब्दानुसंविद्धा] मु,क२;शब्दानुसंसिद्धा-क१
२. प्रत्यक्षप्रमितशब्दोपादानत्वेन-मु; प्रत्यक्षप्रमितिशब्दोपादानत्वेन-क१,क२
३. बिन्दुसाधने न]मु; बिन्दुसाधनेन-क१,क२
४. विनैवोत्पद्यते] मु,क२;विनैव चोत्पद्यते-क१
५. नित्य] क१,क२;नित्यो वा-मु
६. यद्ध्वनिरूपं] मु;ध्वनिरूपं-क१,क२

प्रसिद्धेः सर्वजनसिद्धत्वाच्च[1] तेषामनुभवानां विषयभेदसिद्धौ तदुपादानयोरपि भेदसिद्ध्या बिन्दुसिद्धिरिति। न चानुभवविरोधः। व्यापकजातिवादिमते गोनिष्ठसास्नादिव्यङ्ग्यत्वेनेह गवि गोत्वमितिवदाकाशनिष्ठध्वनिव्यङ्ग्यत्वेन तन्निष्ठत्वानुभवोवपत्तौ नाकाशोपादानकत्वं वर्णानामित्यनुमानमपि अप्रयोजकमिति।

(वृत्तिः) अत्र वर्णलक्षणशब्दकार्ये शब्दतन्मात्रं सूचितध्वनिलक्षणमात्रशब्दकारणत्वात् न कारणम्। चशब्दादाकाशादिर्गृह्यते। कुतः यतः ततः तत्तन्मात्रं कार्यद्वारा तेषां वर्णलक्षणशब्दानां व्यञ्जकं प्रकटकारकम्। श्रोत्रग्राह्यः शब्द आकाशवाय्वादिभिरभिव्यक्तस्थूलवर्णध्वन्यात्मना जायते। तदुक्तं–

आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्त्रमुपैति नादः।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः।। इति।

यद्व्यञ्जकं तत् स्वान्याभिव्यञ्जकव्यञ्जनपवनादिकं न व्यङ्ग्यं न व्यङ्ग्यरूपेण[2] जायते। व्यङ्ग्याग्न्यादेस्तृणादिगताग्निपरमाण्वादिना तादात्म्याभिसम्बन्धितया जायमानत्वात्। ततस्तयोर्व्यञ्जकव्यङ्ग्ययोः भिदा भिन्नता सुप्रसिद्धा। पुरुषस्य तच्छक्तेर्वा विकारित्वात् नोपादानत्वम्[3]। तदुक्तं नादकारिकासु–

अविकार्यत्रात्मोक्तस्तच्छक्तिश्चाप्यतो न योग्यौ तौ।
बहुधा स्थातुं यद्वा चौतन्यविनाकृतौ विकारित्वात्। इति।

—•—

(व्याख्या) ननु व्यङ्ग्यव्यञ्जकभावेन वर्णध्वनिशब्दयोः भेदसिद्धावपि तदुपादानात् अकाशात् वर्णोपादानस्य कथं भेदसिद्धिः[4] आकाशस्यैव उभयोपादानत्वसंभवादित्यत आह–

(वृत्तिः) इतोऽपि लक्ष्यत इत्याह –

किञ्चोर्ध्वभावितत्त्वेषु विकल्पाः प्रत्ययाः कथम्।
जायेरन् बिन्दुवैचित्र्यमन्तरा मुनिपुङ्गवाः।

(व्याख्या) बिन्दुवैचित्र्यं वैखर्यादिरूपमन्तरेण ऊर्ध्वभावितत्त्वेषु शब्दतन्मात्रापेक्षया उपरिवर्तमानेषु अहंकारादिषु स्थितानामणूनां विकल्पाः सविकल्परूपाः शब्दानुविद्धाः कथं जायेरन्। न कथंचिदित्यर्थः।

(वृत्तिः) हे मुनिपुङ्गवाः, बिन्दुवैचित्र्यं बैन्दववैखर्यादिकार्यवैचित्र्यमन्तरा विना ऊर्ध्वभावितत्त्वेषु[5] बुद्ध्यादिषु विकल्पाः प्रत्ययाः सविकल्पकबोधाः कथं केन प्रकारेण जायेरन् भवेयुः। न कथंचिदपीत्यर्थः।

—•—

१. सर्वजनसिद्धत्वाच्च] मु,क२;सर्वव्यञ्जनसिद्धत्वाच्च–क१
२. न व्यङ्ग्यरूपेण] ज१;च व्यङ्ग्यरूपेण–ज२;व्यङ्ग्यरूपेण–ज३
३. विकारित्वात् नोपादानत्वम्] ज१,ज३; विकारित्वेनोपादानत्वम्–ज२
४. भेदसिद्धिः] मु;भेदसिद्धिरिति–क१,क२
५. ऊर्ध्वभावितत्त्वेषु] ज१,ज३; ऊर्ध्वभावितेषु–ज२

(व्याख्या) तदुपपादयति–

(वृत्तिः) तदर्थं बुद्धिरस्त्वित्यत आह –

सर्ववादिषु संसिद्धा बुद्धिरध्यवसायिनी।
न स्यादध्यवसायोऽपि विना शब्दानुवेधनम्।

(व्याख्या) सर्ववादिषु सांख्यादिषु बुद्धिः महत्तत्त्वमध्यवसायिनी[१]। अध्यवसायव्यापारवतीति सिद्धा। शब्दानुवेधनं शब्दानुस्यूतिं विना अध्यवसायो न स्यात्। डित्थ एवायं ब्राह्मण एवायमिति निश्चयो न सिध्येत्।

(वृत्तिः) सर्ववादिषु सांख्यादिषु अध्यवसायिनी ग्राह्यविषयस्वविकल्पभूमिका ज्ञानव्यञ्जिका[२] सती बुद्धिः सिद्धा यद्यपि शब्दानुवेधनं शब्दोल्लेखनं विना अन्तरा केवलया बुद्ध्या अध्यवसायः रूपरसाद्यर्थज्ञानभूमिभूतपरामर्शानुसन्धानमप्यर्थवाचकत्वेन कैश्चिदभीप्सितं न स्यान्न भवेत्। तथा हि बाह्ये चक्षुरादिना विषयीकृत एवार्थे[३] बुद्धिर्विकल्पस्वभूमिकाधारज्ञानव्यञ्जिका[४] ततश्चान्तरेऽपि[५] वक्तुः केनापि विषयीकृत एवार्थे[६] स्वपरामर्शभूमिकानुविधायि[७] ज्ञानव्यञ्जिका। अन्यथा सर्वदा सर्वार्थपरामर्शप्रसङ्गात्। तस्मात् रूपरसगन्धादयोऽर्था येन वक्तृबुद्धिपरामृश्यतां नीताः स एवात्र अन्तः संजल्पपश्यन्त्यात्मा नादः सिद्धः [८]वक्तुर्वक्त्रगतनादवत् प्रतिपत्तृगतनादोऽपि[९] प्रतिपत्तुर्वक्त्रूच्चरितस्थूलशब्दाभिव्यक्तो[१०] वाच्यबुद्धिं जनयति।

—•—

(व्याख्या) ततः किमित्यत आह–

(वृत्तिः) उपसंहरति –

न शब्दप्रभवः शब्दः तन्मात्रस्य स्थितेरधः।
तस्मात् बैन्दव एवेष्टः शब्दः सांख्यात्मनाम्[११] अपि।।

---

१. बुद्धिः महत्तत्त्वमध्यवसायिनी] मु;बुद्धिमहत्तत्त्वमध्यवसायिनी–क१,क२
२. ग्राह्यविषयस्वविकल्पभूमिका ज्ञानव्यञ्जिका] ज१,ज२; बाह्यविषयस्वविकल्पभूमिकज्ञानव्यञ्जिका–ज३
३. विषयीकृत एवार्थे] ज२,ज३;विषयभूत एवार्थे –ज१
४. बुद्धिर्विकल्पस्वभूमिकाधारज्ञानव्यञ्जिका] ज३; बुद्धिविकल्प स्वभूमिकार्यानुज्ञात व्यञ्जका–ज१;बुद्धिर्विकल्पस्वभूमिकज्ञानाधारज्ञानव्यञ्जिका–ज२
५. ततश्चान्तरेऽपि] ज२,ज३.... –ज१
६. विषयीकृत एवार्थे] ज२,ज३; विषयीभूत एवार्थे –ज१
७. स्वपरामर्शभूमिकानुविधायि] ज२,ज३;स्वपरामर्शने . . . . कानुविधायि –ज१
८. अन्तः संजल्पपश्यन्त्यात्मा नादः सिद्धः] ज३; अन्तः संजल्पपश्यन्त्यात्मना तस्सिद्धः –ज१; अन्तं पश्यन्त्यात्मा नादसिद्धः–ज२
९. प्रतिपत्तृगतनादोऽपि] ज३;प्रतिवक्तृगतनादोऽपि– ज१,ज२
१०. प्रतिपत्तुर्वक्त्रूच्चरितस्थूलशब्दाभिव्यक्तो] ज३;प्रतिवक्तुर्वक्त्रूच्चरितस्थूलशब्दाभिव्यक्तो – ज१,ज२
११. सांख्यात्मनाम्] मु,क२;संख्यात्मनाम्–क१

(व्याख्या) यतः यस्मात् कारणात् तन्मात्रस्य शब्दतन्मात्रस्य[१] महत्तत्त्वाद्यपेक्षया अधः अधोभागे स्थितेरवस्थानाच्छब्दः वर्णात्मकः शब्दप्रभवो न शब्दतन्मात्रप्रभवो न। तस्मात् वर्णात्मकः शब्दः[२] सांख्यात्मनाम्[३] अपि बैन्दव एव बिन्दूपादानक एवेष्टव्यः प्रकारान्तरस्यासंभवात्[४] इति भावः।

(वृत्तिः) यस्मात्तन्मात्रस्याधःस्थितेः कारणात् शब्दो वर्णात्मकः न शब्दप्रभवः न शब्दतन्मात्रसमुत्पन्नः। ननु तन्मात्रस्य सूक्ष्मदेहवर्तित्वेन उत्तरत्रापि संभवः सम्भाव्यते। तदयुक्तम्। तस्य सूक्ष्मदेहवर्त्याकाशजनकतया इन्द्रियाधारमात्रतया च[५] सिद्धत्वात्। तस्मात् तन्मात्रोपरिसिद्ध-तत्त्वानां सांख्या एव आत्मानः प्रवर्तकाः प्रमुखाः येषां पाञ्चरात्रादीनां ते सांख्यात्मानः तेषां सांख्यात्मनामपि शब्दः बैन्दव एवेष्टः। अपि शब्दात् प्रयोज्यकर्तघ्णां सिद्धविकल्पज्ञानत्वात् अनन्तादेरपि तत्सिद्ध्यर्थं स तन्मात्रबुद्धेस्तत्र प्रगमासम्भवात्। न ततः शब्दसिद्धिरिति तदर्थं बिन्दुसिद्धिरिति गम्यते।

—•—

(व्याख्या) प्रसङ्गात् वर्णात्मकशब्दानामवान्तरभेदानाह–

(वृत्तिः) शब्दवृत्तीः प्रदर्शयति–

शब्दाश्चतुर्विधास्तेऽपि वैखर्यादिविभेदतः।

(व्याख्या) तेऽपि शब्दाः पूर्वोक्ता वर्णात्मकाः शब्दाः वैखर्यादिवृत्तिभेदतः चतुर्विधाः चतुःप्रकाराः।

तानेव वर्णचातुर्विध्यप्रयोजकान् वैखर्यादिविभेदान् उद्दिशति–

वैखरी मध्यमाख्या च पश्यन्ती सूक्ष्मसंज्ञका।

—•—

(व्याख्या) वैखर्याख्या मध्यमाख्या पश्यन्तीति संज्ञावती सूक्ष्मेति संज्ञावती चेत्यर्थः। वैखर्यादीनां स्थूलसूक्ष्मतारतम्यक्रमेणोद्देशक्रमो द्रष्टव्यः।

(वृत्तिः) विकल्पज्ञानहेतुत्वेनोक्तास्तेऽपि शब्दा वैखर्यादिविभागतः चतुर्विधाः चतुष्प्रकाराः श्लोकार्धेन नाम्ना कीर्तिताः।

(व्याख्या) तत्र प्रथमोद्दिष्टाया वैखर्या लक्षणमाह–

(वृत्तिः) स्थूलारुन्धतीन्यायेन वैखरीं लक्षयति–

---

१. तन्मात्रस्य शब्दतन्मात्रस्य] मु,क२;तन्मात्रस्य-क१
२. वर्णात्मकः शब्दः] क१,क२;वर्णात्मकशब्दः-मु
३. सांख्यात्मनाम्] मु,क२;संख्यात्मनाम्-क१
४. प्रकारान्तरस्यासंभवात्] मु,क२;प्रकारान्तरासंभवात्-क१
५. इन्द्रियाधारमात्रतया च] ज१,ज२; च-ज३

वैखरी श्रोत्रविषया स्थूलवर्णविग्रहा।
स्थानेषु विधृते वायौ प्रयोक्तुरुपकारिणी।

(व्याख्या) स्थानेषु उरःप्रभृतिषु वायौ प्राणे विधृते सति स्थूलवर्णपरिग्रहा स्थूला अभिव्यक्ता वर्णा[१] यस्याः सा तथोक्ता। अत एव श्रोत्रविषया। वीचीतरङ्गन्यायेन श्रोत्रपथं व्याप्नुवाना श्रोत्रग्राह्या। प्रयोक्तुः पुरुषस्य उद्देश्यार्थविशेषप्रतीतिजनिका वैखरीति संबन्धः। अत्र प्राणवृत्त्यभिव्यक्तस्थूलवर्ण-परिग्रहकत्वमेकं लक्षणम्। श्रोत्रग्राह्यत्वे सति प्रयोक्तुरुपकारकत्वम् अपरं लक्षणम्। प्रथमलक्षणे वर्णपरिग्रहत्वं मध्यमायां अस्तीत्यत उक्तं प्राणवृत्त्यभिव्यक्तेति। तावत्युक्ते ध्वन्यात्मक-शब्देष्वतिव्याप्तिः[२] अत उक्तं स्थूलवर्णपरिग्रहेति। द्वितीयलक्षणे श्रोत्रग्राह्यत्वं ध्वनावतिव्याप्तम्। अत उक्तं प्रयोक्तुरुद्देश्यार्थवाचकत्वरूपोपकारकत्वमिति। तावत्युक्ते मध्यमायामतिव्याप्तिः। अत उक्तं श्रोत्रग्राह्यत्वे सतीति।

(वृत्तिः) वैखरी स्थूलनादापरनाम्नी प्रायः प्राणवृत्तिनिबन्धना सती स्थानेषु हृदयादिषु वायावभियुते[३] स्थूलवर्णपरिग्रहा श्रोत्रविषया सती श्रोतुः श्रोत्रेन्द्रियजस्वातिविकल्पभूमिकबोधे हेतुतया प्रयोक्तुर्वक्तुरुपकारिणी।

—•—

(व्याख्या) वैखरीहेतुभूताया मध्यमाया लक्षणमाह –

(वृत्तिः) मध्यमामाह –

बुद्ध्या वर्णानुसन्धानपूर्वमर्थस्य वाचिका।
प्राणवृत्तिमतिक्रान्ता वागेषा मध्यमाह्वया।

(व्याख्या) बुद्ध्या करणभूतया वर्णानुसन्धानपूर्वं वर्णविशेषक्रमानुभवपूर्वकं[४] यथा भवति तथा। अर्थस्याभिधेयस्य वाचिका। प्राणवृत्तिं प्राणव्यापारमतिक्रान्ता तदगोचरीभूता उदानवृत्तेरेव तत्राभिव्यञ्जकत्वस्वीकारात्। एषा वाक् मध्यमाह्वया मध्यमेति संज्ञावती भवतीत्यर्थः। अर्थस्य वाचिकेत्युक्ते निर्विशेषार्थवाचिकायां पश्यन्त्यामतिव्याप्तिः। अत उक्तं बुद्ध्या वर्णानुसन्धानपूर्वमिति। एवमपि वैखर्यामतिव्याप्तिः। अत उक्तं प्राणवृत्तिमतिक्रान्तेति। तावत्युक्ते पश्यन्त्यामतिव्याप्तिः। अत उक्तं बुद्ध्येत्यादि।

(वृत्तिः) प्राणवृत्तिमतिक्रान्ता प्राणवृत्तिनिबन्धनविरहोदानवृत्त्युपहिता। बुद्ध्या वर्णानुसन्धानपूर्वं वर्णानुपातनपुरस्सर[५] यथा भवति तथा श्रोतुमनुपगम्या[६] अर्थस्य वाचिका।

---

१. स्थूला अभिव्यक्ता वर्णाः] मु,क२;स्थूलाभिव्यक्तवर्णा-क१
२. ध्वन्यात्मकशब्देष्वतिव्याप्तिः] मु,क२; .... त्मकशब्देष्वतिव्याप्तिः-क१
३. वायावभिधृते] ज२,ज३; वायावभियुते-ज१
४. वर्णानुसन्धानपूर्वं वर्णविशेषक्रमानुभवपूर्वकं] मु,क२;वर्णविशेषक्रमानुभवपूर्वकं- क१
५. वर्णानुपातनपुरस्सरं] ज३; वर्णानुपातनपुरस्सरः -ज१; वर्णानुपादानपुरःसरं-ज२
६. श्रोतुमनुपगम्या] ज१; श्रोत्रमनुगम्या-ज२;श्रोत्रमनुपमगम्यार्थस्य-ज३

गवाद्यर्थ- विषयविकल्परूपिणी[1] सती वक्तुः प्रतिवक्तुश्च[2] स्वविकल्पाविविक्तज्ञानव्यञ्जिका। सैषा वाक् मध्यमाह्वया मध्यमानाम्नी।

—•—

(व्याख्या) मध्यमाहेतुभूतां पश्यन्तीं लक्षयति-

(वृत्तिः) पश्यन्तीमाह-

वर्णरूपानुसन्धानविरहान्तःसमुज्ज्वला ।
मायूराण्डरसो यद्वत् निर्विशेषार्थधारिका।
पश्यन्ती वागियं ज्ञेया तृतीया शिवशासने।

(व्याख्या) वर्णविशेषानुसन्धानरहिता अन्तर्हृदये समुज्ज्वला प्रकाशमाना। अत एव मायूरं मयूरसंबन्धि तच्च तदण्डं च तस्य रसः। यथा मायूराण्डरसः परस्परव्यतिषङ्गात् अनभिव्यक्तनीलपीतहरितादिवर्णः तद्वत् निर्विशेषार्थधारिका। अर्थसामान्यसंबन्धिनी। इयं वाक् शिवशासने शिवशास्त्रे पश्यन्ती नाम तृतीया वृत्तिः। उद्देशक्रमापेक्षया तृतीयेत्यर्थः। अत्र निर्विशेषार्थधारिकेत्येकं लक्षणम्। अन्तःसमुज्ज्वलेत्युक्ते सूक्ष्मायामतिव्याप्तिः अत उक्तं वर्णविशेषानुसन्धानविरहेति। ननु तथापि सूक्ष्मायां वर्णानुसन्धानविरहत्वादतिव्याप्तिस्तदवस्थेति चेन्न। मायूराण्डरसेति दृष्टान्तबलेन सामान्यवर्णनुसन्धानसत्वस्यापि विवक्षितत्वान्नातिव्याप्तिः[3]।

(वृत्तिः) वर्णरूपानुसंन्धानविरहा। वर्णानां रूपा विभागरूपिणी। अन्तः समुज्ज्वला अन्तः संजल्परूपिणी। यद्वत् यथा मायूराण्डरसः नीलपीतादिपक्षतुण्डादिनिर्विशेषलक्षणार्थधारकः तद्वत् तथा निर्विकल्पज्ञानाभिव्यञ्जिका भूत्वा तदविविक्ता खुरकंबलादिलक्षणनिर्विशेषार्थधारिका निर्विकल्पा सत्यपि सविकल्पोद्यागरूपिणी। अपरबिन्द्वपरनाम्नी शिवशासने सेयं तृतीया वाक् पश्यन्ती पश्यन्तीनाम्नीति ज्ञेया।

—•—

(व्याख्या) अथ सूक्ष्ममायालक्षणमाह-

(वृत्तिः) सूक्ष्मां तदुत्पत्तिक्रमं चाह -

सूक्ष्मा चिदेकशरणा निवृत्ताशेषशक्तिका।

(व्याख्या) चिदेकशरणा चिन्मात्रवेद्या निर्विकल्पैकगोचरेत्यर्थः। इन्द्रियाग्राह्येति यावत्। निवृत्ताशेषशक्तिका असमर्था अर्थप्रकाशनासमर्था सूक्ष्मेत्यन्वयः। अत्र निवृत्ताशेषशक्तिकेत्युक्ते ध्वनावतिव्याप्तिः। अतश्चिदेकशरणेति। तावत्युक्ते पश्यन्त्यामतिव्याप्तिः। अतो निवृत्ताशेष-शक्तिकेति। पश्यन्त्यां तु[4] अर्थसामान्यप्रकाशनशक्तेः सत्वात् नातिव्याप्तिः। तदुक्तं-

---

१. गवाद्यर्थविषया विकल्परूपिणी] ज२,ज३; गवाद्यर्थविषयविकल्परूपिणी -ज१

२. प्रतिपत्तुश्च] ज२,ज३;प्रतिवक्तुश्च-ज१

३. अत उक्तं वर्णविशेषानुसन्धानविरहेति।...सामान्यवर्णनुसन्धानसत्वस्यापि विवक्षितत्वान्नातिव्याप्तिः। इत्ययं भागः 'मु' 'क२' कोशयोर्वर्तते, परं श्क१श कोशे न दृश्यते।

४. पश्यन्त्यां तु] मु,क२;पश्यन्त्यास्तु-क१

तत्र सा वैखरी श्रोत्रग्राह्या याऽर्थस्य वाचिका।
स्थानेषु विधुते वायौ कृतवर्णपरिग्रहा।
प्रयोक्तघ्णामियं प्रायः प्राणवृत्तिनिवन्धना।
केवलं बुद्ध्युपादाना क्रमाद्वर्णानुपातिनी[१]।
अतः संकल्परूपात्तु[२] न श्रोत्रमुपसर्पति।
प्राणवृत्तिमतिक्रम्य वर्तते मध्यमाह्वया।
अविभागेन वर्णानां सर्वतः संभृतक्रमा[३]।
स्वयंप्रकाशा पश्यन्ती मायूराण्डरसोपमा।
स्वरूपज्योतिरेवान्तःसूक्ष्मा वागनपायिनी।

अनपायिनी इतरवाग्वृत्त्यपेक्षया बहुकालावस्थायिनीत्यर्थः। वाग्वृत्तिचातुर्विध्ये श्रुतिरपि द्रष्टव्या।

(वृत्तिः) या निवृत्ताशेषशक्तिका उपसंहृतसमस्तस्ववृत्तिकान्तरध्वनिरूपा निर्विकल्प-स्वरूपिणी चिदेकशरणा चिदेव चिच्छक्तिरेवैकं शरणमालम्बनं यस्याः सा तथोक्ता सेयं नादापरनाम्नी सूक्ष्मा सूक्ष्मनाम्नीति ज्ञेया।

—•—

(व्याख्या) वैखर्याद्यवस्थानां पूर्वपूर्वापेक्षयोत्तरोत्तरावस्था सूक्ष्मत्वनियामकं तासां कार्यकारणभावमाह–

वैखर्याः कारणं मध्या पश्यन्ती मध्यमां प्रति।
पश्यन्त्याः कारणं सूक्ष्मा निर्विकल्पस्वरूपिणी।

(व्याख्या) मध्या वृत्तिः वैखर्यावृत्तेः कारणं पश्यन्ती मध्यमावृत्तिं प्रति कारणमित्यनुषङ्गः। निर्विकल्पस्वरूपिणी चिदेकशरणेत्यर्थः। सूक्ष्मावृत्तिः पश्यन्त्याः कारणम्। ननु पूर्वं वैखर्यादिभेदानामुपादानत्वेन बिन्दुसिद्धिरुक्ता। सम्प्रति तदुपादानत्वेन मध्या वृत्तिः कथ्यते इति पूर्वोत्तरविरोध इति चेन्न। तत्पूर्वपूर्वप्रवृत्तिं प्रत्युत्तरोत्तरवृत्तिरूपबिन्दोरुपादानत्वेनाविरोधात्।

(वृत्तिः) चन्द्राग्निरविसंयुक्ता आद्या कुण्डलिनी तु या।

हृत्प्रदेशे तु सा ज्ञेया ह्यङ्कुराकारवत् स्थिता।।
मातृकादौ स्थिता या तु सर्पवत् बुद्धकुण्डला।
करिणीव करं यद्वत् संवेष्ट्योरसि संस्थिता। इति।।

त्रिशतिसर्वज्ञानोत्तरेति श्रुतेः। महामाया यथार्थपदार्थोपादानापेक्षया उपसंहृतकार्यरूपा दीक्षायां शोध्यशिवतत्त्वसंज्ञिता। सृष्टौ त्वक्षुब्धभागमपेक्ष्य तथा कृतनाम्नी स्वतो भुवनधृत्यक्षम-शान्त्यतीतकलाध्वत्वेन दीक्षयाम् अशोध्या[४] पुनः स्वक्षुब्धभागमपेक्ष्य[५] शान्तिमस्तकस्थ-

१. बुद्ध्युपादाना क्रमाद्वर्णानुपातिनी] मुद्रितरत्नत्रयग्रन्थस्थः पाठः;बुद्ध्युपादानक्रमवर्णानुपातिनी–क१,क२,मु
२. अन्तः संजल्परूपा तु] मुद्रितरत्नत्रयग्रन्थस्थः पाठः अतः संकल्परूपात्तु–क१,क२,मु
३. संहृतिक्रमात्] मुद्रितरत्नत्रयग्रन्थस्थः पाठः संभृतक्रमा–क१,क२,मु
४. अशोध्या] ज१; शोध्या–ज२,ज३
५. स्वक्षुब्धभागमपेक्ष्य] ज१,ज३; क्षुब्धभागमपेक्ष्य–ज२

शान्त्यतीतभुवनात्मशिवतत्त्वत्वेन दीक्षायां शोध्या स्थिता। तथा शब्दपदार्थोपादानापेक्षया उपसंहृतस्वकार्यरूपा वाक् शक्त्यादिसंज्ञिता सृष्टौ त्वक्षुब्धभागमपेक्ष्य तथा कृतनाम्नी स्वतो नादधृत्यक्षमशान्त्यतीतकला भूत्वा प्रतिपुरुषमभिन्नापि द्वादशान्तादधोमुखित्वेन ध्येया। तथापि साक्षात् स्वकार्यः प्रतिपुरुषं भिन्नो नादस्तु नाद इति स्वसंज्ञितस्वविस्फुलिङ्गशिखा-रूपस्वलीनसूक्ष्मावस्थप्रणवपञ्चमशान्त्यतीतकलः[१]। स्थूलाकारोकारमकारप्रणवशिरोभूषण-बिन्दुलक्षणनिवृत्तिप्रतिष्ठा विद्याशान्तिकलाशक्तीनां स्वलीनतया सूक्ष्मावस्थारूपचतुष्कल-बिन्दुशब्दशब्दितचतुश्शक्तिसमष्टिमयशक्तिपङ्कजे प्रतिपुरुषं भिन्ने हृदि तदीदृशनिवृत्त्यादिसूक्ष्म-पञ्चकलः शक्तिव्यक्त्यात्मा[२] स्थितः। नाभेरधस्तु परिणामक्रमेण[३] हकारात्मा प्रसादसंज्ञितः स्थितः। ततः सा महामाया शिवनामनादस्वकार्यात्मना हृदि ध्येया स्थिता। साधारणान्येव शिवतत्त्वानि शुद्धस्रोतसां साधारणासाधारणतदुभयलक्षणभुवनसूक्ष्मस्थूलशरीरत्रिधर्मैकस्वरूपत्वात्। पृथगेकैकं यथोचितम्। मन्त्रादीनां स्वोपाध्युपहितसर्वज्ञतादिगुणाविष्कारकासाधारणशुद्धत्रिंशत्कलात्मसूक्ष्मदेह-

साधारणासाधारणस्थूलदेहसाधारणभुवनात्मकानि स्युः। तदुक्तं गुरुभिः सिद्धान्तार्थसमुच्चये। शुद्धध्वा त्वेकरूप एवेति। मतङ्गवृत्तौ च - वर्णभुवनैः सहास्य कार्यकरणादेरपि[४] तेन तत्त्वधर्मेण विशुद्धविवेकात्मना अद्वितत्वादेकैव शुद्धविद्याकारण[५] सिध्यतीत्युक्तम्। सकलानां तु नादबिन्द्वादिद्वारा मायीयसूक्ष्मदेहाङ्गभूतानीति साधारणशिवसंज्ञितस्त्वभुवनात्मिकैव[६] महामाया सशक्तिमेषा शिवमेष बिन्दुमित्युक्तसूक्ष्मदेहशुद्धौ स्वाक्षुब्धभागस्वात्मनि[७] विलीना भाव्या च। ततः प्रागपि सूक्ष्मदेहानुबन्धात् बिन्दोः प्रथमप्रसरस्वरूपनादानुबद्धः[८]। तदनु शुद्धतत्त्वैर्नादादिद्वारा-धिष्ठितसूक्ष्मदेहानुबद्धः[९] सूक्ष्मदेहप्रगमावधि सूक्ष्मदेहान्तमभिव्यक्तदृक्क्रियामात्रः पुरुषः तत्र हृत्पङ्कजे भ्रमरवल्लीनो भवति। तदुक्तं-शक्तिचतुष्टयपङ्कजमध्ये पुरुषोऽलिरिव लीनः। इति।

शरीरं त्रिविधं प्रोक्तं स्थूलं लिङ्गं परं स्मृतम्। इति।
स्थूलं भूतशरीरं च सूक्ष्मं पुर्यष्टकं भवेत्।
परं बिन्दुसमुत्पन्नं त्रिविधं समुदाहृतम्। इति च।
मतङ्गे च - शिवाद्यवनिपर्यन्तं योऽयमध्वाऽतिविस्तरः।
स सर्वश्च चितो ज्ञेयो नाशिवत्वाद्विमुच्यते।। इति।

---

१. स्वसंज्ञितस्वविस्फुलिङ्गशिखारूपस्वलीनसूक्ष्मावस्थप्रणवपञ्चमशान्त्यतीतकलः] ज१,ज३; संज्ञितः स्वविस्फुलिङ्गशिखारूपस्वलीनसूक्ष्मावस्थप्रणवपञ्चमशान्त्यतीतकलः-ज२
२. तदीदृशनिवृत्त्यादिसूक्ष्मपञ्चकलः शक्तिव्यक्त्यात्मा] ज२,ज३; तदीदृशनिवृत्त्यादिसूक्ष्म-पञ्चकलशक्तिव्यक्त्यात्मा-ज१
३. नाभेरधस्तु परिणामक्रमेण] ज३;नाभेरधस्त्वपरिणामक्रमेण-ज१,ज२
४. कार्यकरणादेरपि] ज१,ज३; कार्यकारणादेरपि-ज२
५. शुद्धविद्याकारणं] ज२,ज३;शुद्धविद्याकारं-ज१
६. साधारणशिवसंज्ञितस्वभुवनात्मिकैव] ज१,ज३; साधारणशिवसंज्ञितभुवनात्मिकेव-ज२
७. स्वाक्षुब्धभागस्त्वात्मनि] ज२; स्वाक्षुब्धभागस्वात्मनि-ज१,ज३
८. प्रथमप्रसरस्वरूपनादानुबद्धः] ज१;प्रथमप्रसरस्वरूपनादानुबन्धः-ज२,ज३
९. शुद्धतत्त्वैर्नादादिद्वाराधिष्ठितसूक्ष्मदेहानुबद्धः] ज१,ज२; शुद्धतत्त्वैर्नादादिद्वाराधिष्ठितसूक्ष्मदेहानुबन्धः-ज३

किञ्च अपानवृत्त्युपबृंहितो यः क्षीणो[१] दक्षिणप्राणहंसो नादो नाभेरधस्तादाधारशक्तौ कुण्डलिन्यां लयं याति। प्राणवृत्त्युपबृंहिततिर्यगूर्ध्वक्षीणवाममध्यः प्राणहंसो नादो ऽ थवा प्रासादकलात्मा वा नासाग्रब्रह्मरन्ध्राभ्यां पृथगारभ्य द्वादशान्तादधोवर्तिन्यां कुण्डलिन्यां लयं याति[२]। चतुष्कलप्रणवावतीर्णस्वासनत्रिकलप्रणवव्याप्तपद्मलक्षणस्वकन्दनालग्रन्थिपद्मदलकर्णिकाल-क्षणक्षित्यादिसदाशिवान्ततत्त्वगर्भशिवासनीकृताधिदैविकांशस्वासनीकृताध्यात्मिकांशकर्णिका-सुषिरस्थचतुष्कलबिन्दुकलामयसूक्ष्मदेहभागत्वात् तदुपर्याधिदैविकाध्यात्मिकांशाभ्यां स्थूल-सूक्ष्मात्मशिवदेहस्य देहसिद्ध्यर्थम्[३] इन्धिकादिशक्त्यंशव्यापिन्यन्तस्थूलदेहरूपशिवां-शव्यापिन्यादिसमनान्तसूक्ष्मदेहरूपसदुन्मनामात्रपरदेहरूपप्रणवपञ्चमकलागर्भशान्त्यादिकलायां नादशिखायां[४] निष्कलमहामायामात्रलक्षणसूक्ष्मदेहे योजितात्मा विशेषनिर्वाणदीक्षानुक्रमेण नादकलानुविधायिभिः स्वारूढाभिः शिवकलाभिः शिवो ऽ हंभावनासमुत्थशिवकलासदृशीभिः स्वशिवकलाभिः[५] शिवीकरणपूर्वं शिवान्तर्यजनाय प्रणवशिखाध्वनिकलितः पुनः स्थापनीयः दीक्षितः शिवसमपरशिवत्वाभिव्यक्तेः भवितव्यपरमात्मतापूर्वशिवो[६] यद्यप्यधुना[७] वक्ष्यमाण-भूतादितदेतन्नादाद्युपाधिना किल भूतात्मान्तरात्मेत्यादिसंज्ञितः सुपरिज्ञेयो ऽ नेकधैको ऽ पि स्फटिकवत् भासते। तदुक्तं सर्वज्ञानोत्तरे –

भूतात्मा भूतसंयोगात् तत्त्वात्मा तत्त्वसंस्थितः।
मन्त्रात्मा मन्त्रमयो ज्ञेयो ऽ न्तरात्मा गिरान्वितः।।
भोक्ता तु सुखदुखानां प्रकृतिस्थो गुणान्वितः।
जीवस्तु जीवनं तेषाम् एभिर्मुक्तः परस्तु सः।। इति।

स तु पुनः सहभूतो ऽ प्यहंकारस्य[८] प्राणपद इव नादपदे प्रगमासम्भवात्। केवलया स्वक्रिया-शक्त्या प्राणगमागमेन सह हंस हंसेति सूक्ष्मान्तःसंकल्पात्मना[९] हंसवर्णसंज्ञितं नादं समुच्चारयति। तं विविक्तः सन् यो वेत्ति स परमुक्तो[१०] भवति। समुत्पत्तिक्रमार्थः सुकर इति न लिख्यते।

—•—

१. अपानवृत्त्युपबृंहितो यः क्षीणो] ज१,ज३;अपानप्राणप्रत्युपबृंहिततिर्यगूर्ध्वक्षीणवाममध्य यः क्षीणो-ज२
२. प्राणवृत्त्युपबृंहिततिर्यगूर्ध्वक्षीणवाममध्यः ... कुण्डलिन्यां लयं याति] ज१,ज३; ज२ कोशे वाक्यमिदं नास्ति।
३. स्थूलसूक्ष्मात्मशिवदेहस्य देहसिद्ध्यर्थम्] ज१; स्थूलसूक्ष्मात्मशिवदेहस्वदेहसिद्ध्यर्थम्-ज२,ज३
४. इन्धिकादिशक्त्यंशव्यापिन्यन्तस्थूलदेहरूपशिवांश ... प्रणवपञ्चमकलागर्भशान्त्यादिकलायां नाद-शिखायां] ज१,ज२; इन्धिकादिशक्त्यंशव्यापिन्यन्तस्थूलदेहरूपशिवांश ... प्रणवपञ्चमकलागर्भ-नादशिखायां -ज३
५. स्वशिवकलाभिः] ज१,ज२; ज३ कोशे नास्ति।
६. भवितव्यपरमात्मतापूर्वशिवो] ज१,ज२; भवितव्यपरमात्मपूर्वशिवो-ज३
७. यद्यप्यधुना] ज१,ज३; यद्यप्यशनात्मा-ज२
८. अप्यहंकारस्य] ज२,ज३;अप्यहंकारोऽस्य -ज१
९. सूक्ष्मान्तःसंजल्पात्मना] ज२,ज३;सूक्ष्मान्तःसंकल्पात्मना-ज१
१०. परमुक्तो] ज१,ज३; परे मुक्तो-ज२

(व्याख्या) एवं चतसृणां वृत्तीनां लक्षणं तदनु प्रसक्तं च समाप्याधुना प्रमाणमाह–

(वृत्तिः) व्यवस्थितिं दर्शयति–

एताश्च वृत्तयोऽणूनां चतस्त्रः प्रत्ययात्मिकाः।

(व्याख्या) एताः पूर्वोक्ता वैखर्याद्याश्चतस्रो वृत्तयः अणूनां वक्ष्यमाणलक्षणानां प्रत्ययात्मिकाः प्रतीयन्ते इति प्रत्ययाः वैखार्यादिवृत्तयस्ता एवात्मानः स्वरूपाणि यासां ताः तथोक्ताः। एवं च[1] चातुर्विध्ये प्रत्यक्षं प्रमाणमुक्तं भवति।

(वृत्तिः) अत्र प्रक्रमे वृत्तिशब्देन कार्यमुच्यते। अणूनामात्मनां प्रत्ययः ज्ञानमात्मा स्वरूपं साक्षात् स्वकार्यद्वारा वा स्वाविकल्पाविकल्पौ विविक्तं स्वव्यङ्ग्यत्वेन[2] यासां तास्तथोक्ताः।

—•—

(व्याख्या) तर्हि सर्वासां श्रोत्रग्राह्यता स्यादित्यत आह–

अन्तरेव स्थितास्तिस्त्रो बहिरन्या व्यवस्थिता।

(व्याख्या) तिस्रो वृत्तयः सूक्ष्मापश्यन्तीमध्यमाख्या अन्तरेव देहमध्य एव स्थिताः। अन्या वैखरी वृत्तिस्तु बहिः[3] व्यवस्थितेत्यन्वयः। एवं चान्तरं बाह्यं च प्रत्यक्षं चतसृषु वृत्तिषु प्रमाणं द्रष्टव्यम्। तिसघ्णाम् आन्तरत्वे वैखार्या बहिष्ट्वे च श्रुतिरपि द्रष्टव्या। यद्वा तासां स्वरूपमाह– एताश्चेति। प्रत्ययात्मिका इति। घटादिवन्नाप्रकाशजडाः विद्युदादिवत्[4] प्रकाशात्मिका इत्यर्थः।

(वृत्तिः) तासां मध्ये तिस्रः मध्यमादय उच्चार्यमाणा अन्तरेव स्थिताः। अन्या वैखरी बहिर्व्यवस्थिता। वर्णात्मकस्योच्चरितप्रध्वंसित्वात्। क्षीणसमय इत्यर्थः।

—•—

(व्याख्या) न केवलं विद्वद्गम्य एवायं वर्णभेदः किन्तु पामरतिर्यगादिसाधारणप्रतीतिविषय इत्याह–

(वृत्तिः) ताः सर्वे समुच्चरन्तीत्याह –

आगोपालाङ्गना बाला म्लेच्छाः प्राकृतभाषिणः।
अन्तर्जलगताः सत्त्वा नित्यं जल्पन्ति ता गिरः।

(व्याख्या) गोपालाश्च अङ्गनाश्च बालाश्च तानभिव्याप्य प्राकृतभाषिणो अपभ्रंशभाषिणः म्लेच्छाश्च अन्तर्गतजलगताः जलमनुष्यादयः सत्वाः जन्तवः ताः पूर्वोक्ताः वैखरीप्रमुखा[5] गिरः जल्पन्ति उच्चारयन्ति। एवं च सर्वप्रतीतिसिद्धवर्णोपादानत्वेन बिन्दुसिद्धिरिति भावः।

---

१. एवं च] मु;एवं-क१,क२
२. विविक्तं स्वव्यङ्ग्यत्वेन] ज१,ज२; विविक्ता स्वव्यङ्ग्यत्वेन -ज३
३. देहाद्बहिः] मु,क२;बहिः-क१
४. विद्युदादिवत्] मु;विद्यादिवत्-क१,क२
५. जन्तवस्ताः पूर्वोक्ताः वैखरीप्रमुखा] क१;जन्तवस्ताः पूर्वोक्तवैखरीप्रमुखा-मु;जल्पगता इति पाठे देहान्तर्वचनानि प्राप्ताः सत्त्वाः जन्तवः ताः पूर्वोक्ता वैखरीप्रमुखा-क२

(वृत्तिः) प्रसिद्धा गोपालादयश्च। गां सदाशिवोक्तिं शास्त्ररूपां पालयन्तीति गोपालाः। अनन्तादयः अङ्गनाः सप्तकोटि संख्याता विद्याः बाला मण्डल्यादयो परमन्त्रेशाः म्लेच्छाः साञ्जना गहनेशादयो भुवनेशाः। प्राकृतभाषिणः गुणतत्त्वस्था योगिनो बुद्धितत्त्वस्था देवयोनयश्चान्तर्गताः ब्रह्माण्डान्तस्थाः ब्रह्मादयः जलगताः जलाद्यावरणस्थाः[१] पञ्चाष्टकरुद्राः सत्त्वाः तत्तद्भुवननिवासिनः तेऽपि तदन्यशुद्धाशुद्धभुवननिवासिनः सर्व एवात्मनश्च ता वाचः नित्यं सदा ब्रूवन्ति उच्चरन्ति। अर्थद्वयोक्तिः सूत्रस्य सूचनारूपत्वान्न विरुध्यते। न चाशुद्धस्य शुद्ध इव शुद्धस्याप्यशुद्धे ऽ ध्वनि अप्रगमश्चेत्याशंकनीयम्। ईश्वरेण व्यभिचारात्। तस्य हि यथा प्रतिपुरुषं भोगमोक्षलक्षणकार्यान्यथानुपपत्त्यात्र प्रगमः सिद्धस्तथाऽस्यापीत्यविरोधः।

—•—

(व्याख्या) आसां वृत्तीनां प्रसङ्गात् बन्धहेतुत्वमप्याह–

(वृत्तिः) अन्तरङ्गास्ता इत्याह–

आभ्यो न परमो बन्ध आभ्यो मुक्तिस्तु नापरा।

(व्याख्या) आभ्यः वैखर्यादिभ्यः बन्धाभ्यः परम उत्कृष्टो बन्धो न एता एव अत्यन्तबन्धिका इत्यर्थः। सुख्यहं दुःख्यहमिति बुद्धिजनकत्वादिति भावः। आभ्यः शब्दवृत्तिभ्यः मुक्तिरप्यरा न किन्तु इयमेव परेत्यर्थः[२]

(वृत्तिः) आभ्यश्चतस्रः परम उत्तरत्र शेषभूतो न बन्धः। आभ्यो मुक्तिस्तु परमा नापरा परमा कुतः।

—•—

(व्याख्या) ननु मलादिभ्यो मुक्तिरेव परमा मुक्तिर्न शब्दवृत्तिभ्य इत्यत आह–

तन्निवृत्त्यविनाभूतो दृक्क्रियावारको यतः।

(व्याख्या) ज्ञानक्रियाच्छादको मलः तन्निवृत्त्यविनाभूतः यतः कारणात् तासां वैखर्यादिवृत्तीनां या निवृत्तयः ताभिः अविनाभूतः स्वाभावद्वारा व्याप्तः अतः कारणात् बन्धमोक्षौ शब्दवृत्तिसद-सद्भावावेवेत्यर्थः।

(वृत्तिः) यतः यन्निवृत्त्यविनाभूता मायादिबन्धाः स दृक्क्रियावारको मलः। तन्निवृत्त्यविनाभूतः। तासां वाचां निवृत्त्या मुक्त्या विना शून्येन भूतः जातः विज्ञानप्रलयाकलेषु च वागनुत्तीर्णत्वेन भविष्यद्वाग्बन्धयोग्यत्वात्। यत्र मलस्तत्र वाच इति व्याप्तेः। न हि यत्र वाचस्तत्र मल इति शुद्धाध्वनिवासिभिर्व्यभिचारात् मलाद्विमुक्तस्य वाङ्मुक्त्यन्तरसंभवात्।

—•—

१. जलाद्यावरणस्थाः] ज१; जलोपलक्षितजलाद्यावरणस्थाः–ज२,ज३

२. आभ्यः वैखर्यादिभ्यः बन्धाभ्यः परम उत्कृष्टो बन्धो न एता एव अत्यन्तबन्धिका इत्यर्थः। सुख्यहं दुःख्यहमिति बुद्धिजनकत्वादिति भावः। आभ्यः शब्दवृत्तिभ्यः मुक्तिरप्यरा न किन्तु इयमेव परेत्यर्थः] क२; किन्तु इयमेव परेत्यर्थः–क१,मु

(व्याख्या) वृत्तिरूपाणां बन्धहेतुत्वव्याप्तिमुखेनाह–

(वृत्तिः) न हि मलान्मुक्तिः परा मुक्तिः विवेक्तुं ता अशक्या इत्याह –

वियुक्तान्[1] मन्वते तेभ्यः पुद्गलाः स्वान्न कुत्रचित्।
सुख्यहं दुःख्यहं चेति मतिर्या शब्दताडिता।

(व्याख्या) यस्मात् कारणात् सुख्यहं दुख्यहं चेति प्रकारिका बुद्धिः शब्दताडितैव। तदुक्तमभियुक्तैः–

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते। इति।

अतः पुद्गलाः पशवः स्वानात्मनः तेभ्यः शब्देभ्यः वियुक्तान् वियोगं प्राप्तान् कुत्रचित् कदाचिदपि न मन्वते। सर्वोऽपि प्रत्ययः शब्दानुविद्ध एवेत्ययमेव बन्धहेतुरिति भावः।

(वृत्तिः) पुद्गलाः पुरुषाः दुःख्यहं सुख्यहं चेति शब्दताडिता शब्दोल्लिखिता या मतिः ज्ञप्तिः तां स्वां स्वकीयां मतिं चिच्छक्त्यर्थक्रियां तेभ्यः शब्देभ्यः विविक्तां विभिन्नां कुत्रचित् न मन्वते न विचिन्त्य जानन्ति। तैः सहान्तरङ्गसान्निध्यात् तद्रूपेण भाति[2] इत्याशयः। ये विविक्तां विदन्ति परमुक्तिभाजस्ते महामायापुरुषविवेकस्य दीक्षया विच्छिन्नमलानामेव सिद्धेः प्रकृतिपुरुषविवेकेन तदूर्ध्वभुवनस्थितिः। तदनुरूपसंस्कारसहकृतमायापुरुषविवेकेन[3] विज्ञानकैवल्यं दीक्षासहकृतमलपुरुषविवेकेन शुद्धाध्वनि स्थितिः। दीक्षासहकृतमहामायापुरुषविवेकेन परा मुक्तिः शिवसाम्यरूपा सम्भवति।

—•—

(व्याख्या) ननु अस्मदादिप्रत्यक्षता न स्यादित्यत आह–

(वृत्तिः) कोकिलवायसादिशब्दितशब्दतारतम्यमिव शुद्धशुद्धाशुद्धाशुद्धाध्वत्रयनिवासिनां शब्दतारतम्यमाह –

सूक्ष्माः शुद्धाध्वनि गिरः स्थूला मिश्राध्वनि स्विताः।
अशुद्धाध्वनि ता वाचः स्थिताः स्थूलतराः सदा।।

(व्याख्या) शुद्धाध्वनि या गिरः सूक्ष्माः स्थिताः ता एव वाचः मिश्राध्वनि स्थूलाः ता एव चाशुद्धाध्वनि प्राकृतकार्येषु स्थूलतराः अत्यन्तं स्थूलाः सत्यः सदा उपलभ्यन्ते। सूक्ष्मो बैन्दव शब्दः ध्वन्याद्युपाधिवशात् मायेयेषु स्थूल इव प्राकृतेषु स्थूलतर इव च भासते इति न शब्दभेदः। अप्रत्यक्षत्वे च विषयायोग्यत्वस्य विषयासन्निकर्षस्य च तन्त्रत्वेन प्रकृते तदभावादिति भावः।

---

१. वियुक्तान्] मु,क२ विविक्तान्–क१; विविक्तां–सर्वेषु 'ज' कोशेषु दृश्यते। (ज्ञानप्रकाशाचार्यव्याख्याधृतः पाठः)

२. तद्रूपेऽवभाति] ज२,ज३;तद्रूपेण भाति–ज१

३. तदूर्ध्वभुवनस्थितिः। तदनुरूपसंस्कारसहकृतमायापुरुषविवेकेन] ज१,ज३; वाक्यमिदं 'ज२' कोशे नास्ति।

(वृत्तिः) श्लोकार्थः सुकरः। स्वभुवनशक्तिस्वभुवनव्यक्त्यात्मना सादाशिवभुवनादूर्ध्वं भुवनपरिणामात्मिका भूत्वा तद्भुवनशक्तिस्वात्मनाऽधोऽधोव्याप्यतत्त्वादिशुद्धशुद्धाशुद्धाशुद्धाध्वधारिका अन्या वृत्तिपरिणत्योरत्यन्तभेदाभावात्। शान्त्यादिभुवनात्मा तु परिणाम इत्युक्तवृत्तिपदोपलक्षितपरिणतयः सन्तीति। ताश्च तथार्थरूपाः कलाः।

—•—

(व्याख्या) वैखर्यादिवृत्तिविशिष्टशब्दोपादानत्वेन बिन्दुं प्रसाध्याधुना कलादिवस्तूपादानत्वेन बिन्दुं साधयति–

(वृत्तिः) यथा पुरोक्ताः सूक्ष्मादयः शब्दरूपाः कलाः तदुभयात्मा बिन्दुरित्युक्त्वोपोद्बलयति–

अन्याश्च वृत्तयो बिन्दोः निवृत्त्यादिकलात्मिकाः।

(व्याख्या) सन्तीति शेषः। तदुपादानत्वेनापि बिन्दुसिद्धिरिति भावः।

ता एवोद्दिशति–

निवृत्तिश्च प्रतिष्ठा च विद्याशान्ती तथैव च।
शान्त्यतीता च पञ्चैते[१] शुद्धमार्गे पुरात्मिकाः।

निवृत्त्यादिकलात्मिकाः[२] पञ्चैते पदार्थाः शुद्धाध्वनि पुरात्मिका[३] अपि भुवनस्वरूपा अपि[४] अत एव एतासां पुरात्मिकत्वम्[५]। तत्तत्पदप्रवृत्तिनिमित्तं[६] चोक्तं मृगेन्द्रे यथा– निवर्तयति भूतानि यया साऽस्य निवर्तिका[७]।

निवृत्तिरिति तत्स्थानं तत्रेशोऽपि निवृत्तिमान्।
निवृत्तस्य गतिः भूयो यया प्रच्यावलक्षणा।
निषिध्यते प्रतिष्ठा सा स्थानं तद्वांश्च तत्पतिः।
त्यक्त्वाऽपि गम्यविषयं[८] यया[९] ज्ञानं ददात्यणोः।
सा विद्या संस्थानमप्यस्य विद्येशश्च तदीश्वरः।
सर्वदुःखप्रशमनं यया[१०] ऽस्य कुरुते हरः।
सा शान्तिस्तत्पदं चेति तत्कुर्वन् सोऽपि शक्तिमान्। इति।

---

१. पञ्चैते] उमापतिशिवव्याख्यानधृतः पाठः; पञ्चैताः–ज्ञानप्रकाशाचार्यव्याख्यानधृतः पाठः
२. निवृत्त्यादिकलात्मिकाः] क१,क२;निवृत्त्यादिकलात्मकाः–मु
३. पुरात्मिकाः] क२;निवृत्त्यात्मका–क१;प्रत्ययात्मकाः पुरात्मका–मु
४. भुवनस्वरूपा अपि] क२;भुवनस्वरूपा–क१;भुवनरूपा अपि–मु
५. अत एव एतासां पुरात्मिकत्वम्] क१; एतासां पुरात्मिकत्वम् दृक२;श्मुश कोशे न विद्यते।
६. तत्तत्पदप्रवृत्तिनिमित्तं] मु,क२ तत्तत्पदवृत्तिनिमित्तं–क१
७. निवर्तिका] मु,क२; निवृत्तिका–क१
८. त्यक्त्वाऽपि गम्यविषयं] क१,क२;त्यक्त्वाप्तगम्यविषयं–मु
९. यया] मु,क२;यथा–क१
१०. यया] मु,क२;यथा–क१

यया इत्यादि। आप्तविषयं शब्दज्ञानं गम्यविषयमनुमानिकं च त्यक्त्वा अर्थात् साक्षात्काररूपं ज्ञानं यया करोति सा विद्येत्यर्थः। एवं शुद्धाध्वनि भुवनात्मकानां तत्त्वाधारभूतानां कलाना-मध्वान्तरयोः तत्त्वाधारात्मकमेव भुवनात्मकत्वमित्याह–

मिश्राशुद्धाध्वनोरेताः तत्त्वाद्याधारिकाः स्थिताः।

(व्याख्या) एता निवृत्त्याद्याः कलाः मिश्राध्वनि अशुद्धाध्वनि च। तत्त्वभुवनादीनाम्[1] आधारभूता एव स्थिता न भुवनात्मकतयेत्यर्थः। यद्यपि भुवनरूपाणां तत्त्वाधाराणां च कलानां वस्तुतो भेदोऽस्त्येव तथापि संज्ञैक्यात् तदेकत्वोक्तिः।

ननु वैखर्यादिवृत्त्युपादानत्वेन बिन्दुसाधनापेक्षया कलादिवृत्त्युपादानत्वेन तत्साधने को विशेष इत्यत आह–

वस्तुरूपाः कला ज्ञेयाः शब्दरूपाः पुरोदिताः।

इदानीम् उक्ता निवृत्त्यादिकलाः[2] वस्तुरूपा अर्थात्मिकाः पुरा किञ्च शब्दानुसंविद्धा इत्यादिना उक्ताः शब्दरूपाः वर्णात्मकशब्दरूपत्वेन ज्ञेयाः। तथा च पूर्वं शब्दप्रपञ्चोपादानत्वेन बिन्दुसाधनम्। इदानीमर्थप्रपञ्चोपादानत्वेन बिन्दुसाधनमिति नाविशेष इति भावः।

नन्वर्थोपादानत्वेन बिन्द्वन्तरं सिध्येत्। एकस्योभयोपादानत्वे उभयात्मत्वप्रसङ्गेन विरोधादित्यत आह–

शब्दवस्तूभयात्मासौ बिन्दुर्नान्यतरात्मकः।

असावेक एव बिन्दुः शब्दार्थोभयात्मकः उभयोपादानत्वात् नान्यतरात्मको धर्म्यन्तरकल्पनापेक्षया आप्ते[3] धर्मिणि धर्मकल्पनाया लघुत्वात्। विचित्रकार्यनिर्वाहकत्वेन श्रुत्यागमैकसिद्धाया महामायाया उभयोपादानत्वेनोभयात्मकत्वमविरुद्धम्। शब्दार्थयोरविनाभूतत्वात् तदुभयात्मकमेकमिति भावः।

(वृत्तिः) सुगमम्। मृगेन्द्ररत्नत्रययोः भुवनाध्वाधारकद्विप्रकारकलानां[4] शान्त्यादिशब्देन पठननिबन्धनं[5] पठितं ततोऽवधार्यमिति नात्र लिख्यते।

—•—

(व्याख्या) इदानीं तत्त्वोपादानत्वेनापि बिन्दुं साधयन् तत्त्वानामवान्तरभेदं तत्रस्थ भुवनस्वरूपनिर्माणप्रयोजनं चाह–

(वृत्तिः) पुनस्तत्त्वात्मकार्याणि चतुष्प्रकाराणि सन्तीत्याह –

---

१. तत्त्वभुवनादीनाम्] मु;तत्र भुवनादीनाम्-क१,क२
२. निवृत्त्यादिकलाः] मु,क२;निवृत्त्यादिकाः-क१
३. कघ्प्ते] मु,क२;आप्ते-क१
४. भुवनाध्वाधारकद्विप्रकारकलानां] ज२;भुवनात्माध्वाधारकद्विप्रकारकल्पानां-ज१,ज३
५. शान्त्यादिशब्देन पठननिबन्धनं] ज१;शान्त्यादिशब्दपठननिबन्धनं-ज२,ज३

वृत्तिस्तत्त्वात्मिका चास्य चतुर्धा संव्यवस्थिता।
शिवतत्त्वं सदेशाख्यम् ऐशं विद्याह्वयं तथा।
शुद्धान्येतानि तत्त्वानि रुद्राणूनां महात्मनाम्।
विचित्रपुरमालाभिः खचितानि महान्ति च।
दिव्यस्त्रीभिः महाश्चर्यैः भोगैः दुःखविवर्जितैः।
तनुभोगेन्द्रियाद्यैश्च खचितान्युन्नतानि च।

(**व्याख्या**) अस्य विन्दोः तत्त्वात्मिका तत्त्वस्वरूप वृत्तिश्चतुर्धा प्रकारचतुष्टयेन सम्यग्व्यवस्थिता असंकीर्णतया व्यवस्थिता। तदेव चातुर्विध्यं दर्शयति- शिवतत्त्वमित्यादि। आद्यं शिवतत्त्वमस्य च शिवाधिष्ठितत्वात् शिवतत्त्वव्यपदेशः। द्वितीयं सदेशाख्यं सदाशिवतत्वं सदाशिवाधिष्ठितत्वात् सदाशिवतत्त्वव्यपदेशः। तृतीयम् ऐशमीश्वरतत्त्वम् ईश्वराधिष्ठितत्वात् ईश्वरतत्त्वव्यपदेश्यम्। चतुर्थं विद्याह्वयं वेदनहेतुत्वात् विद्याख्यतत्त्वमित्यर्थः। एतेषां च पूर्वपूर्वस्योत्तरोत्तरतत्त्वं प्रत्युपादानत्वं क्वचित् श्रूयते। तत्तु पूर्वपूर्वतत्त्वात्मना परिणतबिन्दोरेव उत्तरोत्तरतत्त्वोपादानकत्वाभिप्रायकमिति न विरोधः। नन्वत्र शुद्धतत्त्वानि पञ्च विधानि श्रूयन्ते। यथा तत्त्वप्रकाशे-

शुद्धानि पञ्चतत्त्वानि आद्यं तेषु स्मरान्ति शिवतत्त्वम्।
शक्तिसदाशिवतत्त्वे ईश्वरविद्याख्यतत्त्वे च। इति।

क्वचित्तु शुद्धतत्त्वानि लयभोगाधिकाररूपेण त्रीणीत्युक्तम्। तत् कथं चतुष्ट्यमिति चेन्न। यदा शिवो ज्ञानमात्रयुक्तो तदा तदधिष्ठेयं तत्त्वं शिवतत्त्वं यदा क्रियामात्रयुक्तः तदा शक्तिपदव्यपदेश्यशिवाधिष्ठेयत्वात् शक्तितत्त्वमिति शक्तितत्त्वस्य शिवतत्त्वाद्बहिर्भावमभिप्रेत्य पञ्चविधत्वम्। इह तु शिवशक्तितत्त्वयोः शिवाधिष्ठितत्वाविशेषेण चातुर्विध्यमुक्तम्। त्रित्वोक्तिस्तु[1] विद्यातत्त्वेश्वरतत्त्वयोः शिवप्रेर्याधिष्ठितत्वेनैक्यमभिप्रेत्येति न चातुर्विध्यानुपपत्तिः। तदुक्तं रत्नत्रये-

पञ्चमी तु परा[2] कला।
शिवतत्त्वाह्वयं तत्र पुराणि दश पञ्च च। इति।

क्वचित्तु सर्वेषामपि शिवतत्त्वानां[3] शिवद्वारकमेव तत्तद्व्यपदेश्यत्वमुक्तम्। तथा रत्नत्रये-

तयोः प्रसरतोः साम्ये तत्त्वात्मा स्यात् सदाशिवः।
ईशोऽधिकः क्रियाशक्त्योः विद्याज्ञानातिरिक्तयोः। इति।

तत्वप्रकाशेऽपि-

ज्ञानक्रियाख्यशक्त्योरपकर्षोत्कर्षयोरभावेन यः।
प्रसरस्तं प्राहुः सदाशिवतत्त्वाख्यं बुधास्तत्त्वम्।

---

१. त्रित्वोक्तिस्तु] मु,क२;त्रितत्त्वोक्तिस्तु-क१
२. परा] मु,क२,मुद्रितरत्नत्रयग्रथेऽपि च;शिवा-क१
३. शिवतत्त्वानां] क१;तत्त्वानां-मु,क२

न्यग्भवति यत्र शक्तिर्ज्ञानाख्योद्रिक्ततां क्रिया भजते।
ईश्वरतत्त्वं तदिह प्रोक्तं सर्वार्थकर्तृ सदा।
न्यग्भवति कर्तृशक्तिर्ज्ञानाख्योद्रेकमश्नुते य पट।
तत्तत्त्वं विद्याख्यं प्रकाशकं ज्ञानरूपत्वात्। इति।

एतानि शुद्धानि तत्त्वानि महात्मनामभिव्यक्तचित्क्रियाशक्तीनां रुद्राणूनां रुद्राणुप्रभृतीनां भुवनाधिपतीनां विचित्राणि च तानि पुराणि च विचित्रपुराणि भुवनानीति यावत्। तेषां मालाभिः पङ्क्तिभिः खचितानि अनुबद्धानि महान्ति च विशालानि च।

(वृत्तिः) स्वान्तर्भूतशक्तितत्त्वं[1] शिवतत्त्वमत्र सदाशिवभुवनोर्ध्ववर्ति निवृत्त्यादि-भुवनात्मकलापञ्चकसमष्टिरूपमेव नान्यत्। एतानि चत्वारि शुद्धानि तत्त्वानि रुद्रवदणुरात्मा शिवाद्भिन्नो येषां ते रुद्राणवः। तेषां अनन्तादिरुद्राणूनां विचित्रपुरमालाभिः नानाकारशान्त्यतीतादि-भुवनपङ्क्तिभिः परस्परघटनाभिः खचितानि घनीकृतानि। तदुन्नतमहत्तरभुवनरूपतया महान्ति चोन्नतानि च। तत्र स्थिततयाऽनन्तरं तनवः शरीराणि च भुज्यन्त इति भोगाः स्त्र्यादयश्च इन्द्रियाणि येषां कालादीनाम् आद्यानि तानि इन्द्रियाद्यानि च तथेति तैस्तनुभोगेन्द्रियाद्यैः दिव्यस्त्रीभिः सुखहेतुभूताभिः दुःखविवर्जितैः दुःखानुरक्तरहितैः। अत एव महाश्चर्यैर्महदतिशयैर्भोगैः सुखमात्रानुरक्तचिदभिव्यक्तिभिश्च खचितानि घटितानि च। अनन्तादयो न वास्तवशरीरिणः सर्वज्ञत्वात् शिववदनन्तादयो न सर्वज्ञाः देहित्वाद्देवदत्तवद्वेति केनचिद्धेतुः प्रयुक्तः स इत्थमागमबाधितः- शंखोऽशुचिः प्राण्यङ्गत्वात् नरशिरःकपालवदिति कालात्ययापदिष्टः स्यात्। पुनः श्रीकण्ठादिभिर्योगिभिरप्यनैकान्तिकश्च स्यात्। शुद्धयोनिमयत्वात्। नासर्वज्ञत्वव्याप्तः सदेह[2] इत्यतद्रूपत्वात् न सिद्धः स्यात्।

भोगाधिकारयोः[3] शक्तिरभिव्यक्तेह दीक्षया।
येषां तेषां तु भोगार्थं शिवेन परिकल्पितम्।।
तत्त्वं सादाशिवं तद्वत् शिवतत्त्वं च निर्मितम्।
भोगतत्त्वे स्थितिर्यस्माद् वस्तुतस्तु द्वयोस्तयोः।।
व्यक्ताधिकारशक्तीनां भोगार्थं तत्त्वमैश्वरम्।
तत्त्वं विद्याह्वयं किन्तु पुंसां स्थूलाधिकारिणाम्।।
विद्यानां वेदने हेतुर्विद्येति परिपठ्यते।

(व्याख्या) तानि पुराणि शिवतत्त्वे पञ्चदश। तदुक्तम्-

निवृत्तिश्च प्रतिष्ठा च विद्याशान्तिश्च नाभसी[4]।
इन्धिका दीपिका चैव रोचिका मोचिका तथा।

---

१. स्वान्तर्भूतशक्तितत्त्वं] ज२,ज३;स्वान्तर्भूतशक्तित्वं-ज१
२. सन्देह-ज१; सदेह-ज२,ज३
३. *भोगाधिकारयोः . . . नैष्ठिकस्य पराप्राप्तिः पर्यन्तं मूलग्रन्थस्य वृत्तेश्च भागो 'ज२' कोशे न विद्यते।
४. इतः परं, पुराणि बैन्दवानीह पञ्च प्रोक्तान्यतः परम्। इत्ययमर्धश्लोकः 'मु' कोशे वर्तते।

ऊर्ध्वका[१] चेति नादोत्थभुवनानि ततः परम्।
व्यापिनी व्योमरूपा च अनन्ता च ततः परम्।
अनाथा च ततः[२] प्रोक्ताऽनाश्रिता पञ्चमी तथा[३]। इति।

विद्यादिसदाशिवान्तेषु पुराण्यष्टादश। तदुक्तम्–

वामा ज्येष्ठा तथा रौद्री काली विकरिणी तथा।
बलविकरी चैव बलप्रमथनीत्यपि।
सर्वभूतदमन्येवं मनोन्मन्यपरा भवेत्।
पुराणि नव विद्यायाम् अनन्तसूक्ष्मसंज्ञितः।
शिवोत्तमैकनेत्रौ च एकरुद्रस्त्रिमूर्तिकः।
श्रीकण्ठश्च शिखण्डी चेत्येवमीशपुराष्टकम्।
सादाख्यभुवनं तस्मिन् पुराण्यष्टादशैव तु। इति।

किञ्च दिव्यस्त्रीभिरुत्तमाङ्गनाभिः सहितानीति शेषः। महाश्चर्यैरत्यन्तचमत्कारिभिः दुःखविवर्जितैः दुःखात्यन्ताभाववद्भिः भोगैः सुखानुभवैः युक्तानीति शेषः। तनुभोगेन्द्रियाद्यैः तनवः शरीराणि। भुज्यन्त इति भोगाश्चन्दनादिविषयाः। इन्द्रियादीनि चक्षुरादीनि। आद्यशब्देनान्यान्यपि भोगसाधनान्युच्यन्ते। तैः खचितानि सम्बद्धानि उन्नतानि उच्छ्रितानि श्रेष्ठानि[४] वा एतानि तत्त्वानि निर्मितानीति शेषः। एतत्तत्त्वप्रशंसा च दीक्षाविशेषफलार्थवादवत् स्वार्थे प्रमाणमित्युपगन्तव्यम्।

उक्तानां तत्त्वानाम् अधिकारिविशेषमधिकृत्य प्रयोजनमाह– भोगाधिकारयोरिति। येषां पशूनां भोगश्चाधिकारश्च भोगाधिकारौ एतयोः विषययोः शक्तिः दीक्षया दीक्षाख्यया शक्त्या अभिव्यक्ता तेषामणूनां भोगार्थं शिवेन सदाशिवं तत्त्वं निर्मितम्। तद्वत् सदाशिवतत्त्ववत् भोगार्थं शिवतत्त्वं निर्मितम्। तत्र हेतुमाह– भोगतत्त्व इति। यस्मात् कारणात् द्वयोः शिवतत्त्वसदाशिवतत्त्वयोः वस्तुतः परमार्थतः भोगतत्त्वे भोगस्वभावे स्थितिरित्यर्थः ईश्वरविद्यातत्त्वयोः अधिकारिभेदेन प्रयोजनमाह– व्यक्ताधिकारेति। ऐश्वरमीश्वराख्यं तत्त्वं दीक्षया व्यक्ताधिकारशक्तीनां व्यक्ताः अधिकारशक्तयो येषां ते तथोक्ताः तेषां भोगार्थं निर्मितमिति संबन्धः। विद्याह्वयं तथा। किन्तु विशेषोऽस्ति। स्थूलाधिकारिणां पुंसां भोगार्थं परिकल्पितमिति सम्बन्धः। जडात्मकबिन्दुवृत्तिरूपतत्त्वस्य कथं विद्याशब्दवाच्यत्वमिति आशंक्य "लाङ्गलं जीवनम्" इतिवत् विद्याशब्दप्रयोग इत्याह– विद्यानामिति। सर्वविद्यानां वेदने ज्ञाने हेतुः। बिन्दुवृत्तिविशेषः शास्त्रे पठ्यते। विद्यातत्त्वमिति पठ्यत इत्यर्थः।

---

१. ऊर्ध्वका] क१;ऊर्ध्वगा–मु,क२
२. ततः] क१;तथा–मु,क२
३. इतः परं "भुवनानि च शाक्तानि पञ्चैव कथितानि हि।" इत्येकं श्लोकार्धं 'मु' कोशे दृश्यते।
४. सम्बद्धानि उन्नतानि उच्छ्रितानि श्रेष्ठानि] क२;संबन्धानि यानि तानि उच्छ्रितानि–क१;सम्बद्धानि उन्नतानि श्रेष्ठानि–मु

(वृत्तिः) इह मायामण्डले उपलक्षणतया मायोदरे मायोपरि वा दीक्षाया साधिकरण-निरधिकरणशिवकरणीयभूतया येषां परिपक्वमलानां शुद्धाध्वनि भुवनेश्वरत्वेनेशानादिशिवमूर्तयः पठ्यन्त इति भोगाधिकारयोः भोगअधिकारनामशिवयोः समा शक्तिः अभिव्यक्ता समर्थीकृता। द्वयोर्भोगाधिकारलक्षणव्यापारयोः[1] समा शक्तिरव्यभिव्यक्ता तेषां भोगार्थं तदवलम्बनचिदभिव्यक्त्यर्थं सदाशिवतत्त्वं शिवेन परिकल्पितं निर्माय नियमितम्। तद्वत्तथा तदर्थमेव शिवतत्त्वं च निर्मितम् नियम्य कृतम्। शिवतत्त्वस्यापि पृथङ्नियमनभिदा किमर्थं न कृतेत्यत आह- यस्मात् कारणात् समनयदृशा शितत्त्वस्य लयतत्त्वोक्तित्वेऽपि तन्त्रान्तरे शान्त्यादिशक्तिकलाचतुष्टयस्य भोगस्थानतया श्रुतेः। शिवतत्त्वसंज्ञितशान्त्यतीतभुवनस्यापि शान्तिमस्तकनिविष्टत्वश्रुतेरत्र सदाशिवतत्त्वस्य भोगतत्त्वान्तर्भूतिकोक्तित्वात्। ईशानतीत्यशान्तान्तं तत्त्वं सदाशिवं स्मृतमिति मृगेन्द्रोक्तित्वादपि वस्तुतः स्वभावतः तयोः शिवसदाशिवतत्त्वयोः द्वयोर्भोगतत्त्वे स्थितिः। भोगतत्त्वात्म-स्वसमष्टिस्वरूपेऽवस्थानं यद्वा भोगतत्त्वे वाचके वाच्यलक्षणस्थितिरिति[2] वाऽर्थः समर्थनीयः। अथवा भोगतत्त्वे भोगतत्त्वसंज्ञिताधिष्ठातरि शिवे त्वधिष्ठेयलक्षणा स्थितिरिति वाऽक्षरार्थः। ततः तत्त्वद्वयं तदर्थत्वेन सिद्धमिति भावः। व्यक्ताधिकारशक्तीनां व्यक्ताधिकारावस्थशिवसमशक्तीनां यद्वा ऽधिकारकरणक्षमस्वसमर्थितशक्तीनां भोगार्थमैश्वरं तत्त्वं नियम्य निर्मितम्। न तावन्मात्रं किन्तु अपि तु पुंसां दीक्षितात्मनां स्थूलाधिकारिणां स्थूलप्रकारेण व्यक्ताधिकारावस्थशिवसमशक्तीनां भोगार्थं विद्याह्वयं तत्त्वं नियम्य निर्मितम्। ननु शिवस्य स्वतः सम्पूर्णसर्वकर्तृशक्तिस्तेषां कर्तृशक्तिः क्रमतः किञ्चिन्न्यूनभावं भजतीति कथं शिवसमशक्तित्वं? तदयुक्तम्। अशेषकार्याविष्कर्तुः अधिकारव्यञ्जितशिवस्य[3] भोगसंज्ञितशिवकृत्यलक्षणकार्यप्रसवाभिमुखीकरणक्षम-कर्तृशक्त्यसम्भवात्। भोगस्य बिन्दुपालकस्य पुनरधिकारावस्थान्तरिताधिकार-शिवात्मस्वात्मनामीशानादिभुवनोपाधिमतः अधस्तनकार्यप्रसवाभिमुखीकरणतदाविर्भावनं द्विकृत्यक्षमकर्तृशक्तेः[4] तस्य भोगस्य लयशिवस्योदासीनतवृत्तिमच्छक्तिर्नहीति च सिद्धं सम्पूर्णकर्तृशक्तित्वम्[5]। ततोऽसम्पूर्णकर्तृशक्तियुक्ततदविशिष्टशिवे योजितास्तत्सदृशव्यक्ति-मदसम्पूर्णकर्तृशक्तिमन्त इति न किञ्चिदसमञ्जसम्। नन्विदं शिवं प्रत्युपचारबीजं, सत्यम्। उपचारबीजं प्रकल्पितपञ्चवक्त्रत्रिपञ्चदृङ्मयतनुशिवध्यानात् ध्यातघ्णां तन्मयतनुर्वास्तवेति तद्वदत्रापीति सर्वमनवद्यम्। ततः परमुक्तानां शिवेन सहाविभिन्नाधिकारित्वश्रुतेः त्रियवस्थस्त्रियवस्थातीतचतुश्शिवसमशक्तिः समर्थितेति च गम्यते। तदुक्तं चिन्त्यविश्वसादाख्ये-

सकले निष्कले चैव सर्वत्रैव समानता।
सायुज्यमिति तत् प्रोक्तं सारूप्यं मूर्तितुल्यता। इति।

---

१. द्वयोर्भोगाधिकारलक्षणव्यापारयोः] ज१; यद्वा भोगाधिकारलक्षणव्यापारयोः-ज३
२. वाच्यलक्षणस्थितिरिति] ज१; वा लक्षणस्थितिरिति -ज३
३. अधिकारव्यञ्जितशिवस्य] ज३;अधिकारसंज्ञितशिवस्य-ज१
४. अधस्तनकार्य ... तदाविर्भावनं द्विकृत्यक्षमकर्तृशक्तेः] ज३; अधस्तनकार्य ... तदाविर्भावन-दद्विकृत्यक्षमकर्तृशक्तेः-ज१
५. सिद्धं सम्पूर्णकर्तृशक्तित्वम्] ज३;सिद्धमसम्पूर्णकर्तृशक्तित्वम्-ज१

शिवसदाशिवेश्वरतत्त्वानां शिवादिस्वसंबन्धितया सुकरतया समर्थनीयसमासत्वात् विद्याशब्दव्युत्पत्तिं विनिवेदयति – विद्यानां मन्त्राणां वेदने विषयदर्शने तदिदं तत्त्वं तत्त्वभुवन-द्विधर्मैकरूपं कार्यकरणादिजननद्वारा हेतुः कारणं। ततो विद्यतेऽनयार्थजातमिति करणव्युत्पत्त्या विद्येति परिपठ्यते। अनेन शब्दमात्रं हि देवतेति पठन्तः प्रतिक्षिप्ताः तथात्वे फलमपि शब्दमात्रं स्यात्। तदुक्तं पराख्ये –

शब्दमात्रस्थिते मन्त्रे शब्दमात्रफलं तदा।
न चार्थरहितः शब्दः पदवाक्यगतक्रमः।।
वाच्यं च वाचकाद्भिन्नं देवदत्तादिशब्दवत्। इति।।

उपलक्षणं चैतत्। दीक्षितानामपीति यत आचार्याधिकरणेन शिवेन दीक्षालक्षणस्व-शक्त्याविच्छिन्नमलादिपाशद्वारा शुद्धीकृतानां तदा तच्छिवप्रकाशितविवेकलक्षणतत्त्वधर्ममात्रादि-प्रकाशकशुद्धविद्यायुक्तानां मायामण्डलमध्यस्थसकलानां प्रारब्धभोगनिमित्तावशिष्ट-पशुत्वशिवत्वयोर्विवेकाग्निः[1] प्रवर्तते। तदुक्तं मतङ्गे –

यदा च निपतेत्तेजस्तच्छिवत्वपशुत्वयोः।
तदा सीमान्तरं कर्तुमुत्सहेत् साधकं प्रति। इति।।

इत्थमिदं तत्र मायीयविद्यापटले सविस्तरं तत एवावधार्यम्।

—•—

(व्याख्या) ननूक्तानि तत्त्वानि किं त्रिविधपशुभोग्यानि नेत्याह–

(वृत्तिः) अशुद्धयस्य शुद्धे प्रगमो नेत्याह –

नैतत् पश्वात्मनां तत्त्वं शुद्धवर्त्मव्यवस्थितम्।
दुःखसम्पूर्णताहेतोः तस्मात्तत्त्वनिबन्धनम्।

(व्याख्या) एतत् विश्वं समस्तं शुद्धवर्त्म शुद्धाध्वा पश्वात्मनां दीक्षया अनभिव्यक्तभोगाधिकारशक्तीनां न व्यवस्थितं भोगार्थं न कल्पितमित्यर्थः। तत्र हेतुमाह–दुःखसम्पूर्णताहेतोः दीक्षितभिन्नानां पशूनां दुःखपूर्णतालक्षणाद्धेतोः[2] कर्मसाम्यसञ्चित-कर्मक्षययोरभावेन दुःखहेतुपरिपूर्णत्वादिति भावः। तस्मात् शुद्धाध्वनोऽन्यदशुद्धाध्वनि तत्त्वं निबन्धनं नितरां निबन्धनम्।

(वृत्तिः) पश्वात्मनां दीक्षानभिव्यक्तभोगाधिकारशक्तीनां भोगार्थं निर्मितमेतद् दृश्यमानं[3] विश्वं विचित्ररूपं जगत् न शुद्धवर्त्मव्यवस्थितं शुद्धाध्वनि स्थितमिति न निश्चितम्।

---

१. प्रारब्धभोगनिमित्तम् अवशिष्टपशुत्वाशिवत्वयोर्विवेकाग्निः] ज३; प्रारब्धभोगनिमित्तावशिष्टपशुत्व-शिवत्वयोर्विवेकाग्निः–ज१

२. दुःखसम्पूर्णताहेतोः दीक्षितभिन्नानां पशूनां दुःखपूर्णतालक्षणाद्धेतोः] मु; दुःखसम्पूर्णताहेतोः–क१; दुःखसम्पूर्णताहेतोः दीक्षाभिन्नानां पशूनां दुःखपूर्णतालक्षणाद्धेतोः–क२

३. निर्मितमेतद् दृश्यमानं] ज३;निर्मि . . . . तदृश्यमानं–ज१

दुःखसम्पूर्णताहेतोः दुःखसम्पूर्णतालक्षणहेतोः। ननु कस्यासम्मतमिदं दुःखरूपेण वा तत्र स्थीयताम्। तदयुक्तं तस्माद्दुःखसम्पूर्णतालक्षणविश्वस्य[1] व्यवस्थितेः।

—•—

(व्याख्या) तत्र दृष्टान्तमाह –

यथा माया ततश्चौतत् शुद्धवर्त्मनिबन्धनम्।

(व्याख्या) यथा मायेति। शुद्धाध्वनिर्माणं[2] सफलमित्याह– ततश्चौतदिति। यतः कारणात् दीक्षया अभिव्यक्तभोगाधिकारशक्तीनाम् अणूनां दुःखमये अशुद्धाध्वनि भोगोऽनुपपन्नः ततः कारणादेव एतस्य शुद्धाध्वनः निबन्धनं निर्माणम्।

(वृत्तिः) यथा मायातत्त्वं स्वकार्यान्निबन्धनं नितरां बन्धनं तथैतत् भवता पश्चात्मविश्वप्रगमप्रघटिततयोच्यमानं शुद्धवर्त्म च निबन्धनं नितरां बन्धनं स्यात्। केनोक्तं न निबन्धनमिति।

—•—

नैष बन्धो विशुद्धाध्वा भोक्तुरिच्छानुसारतः।
भोग्यत्वादीदृशं यद्यत् दृष्टं तत्तन्न बन्धनम्।
यथा शिवस्य भोगाख्यं तस्मात्तत्त्वं निबन्धनम्।

(व्याख्या) विशुद्धाध्वेति पक्षः बन्धो नेति साध्यम्। मायावत् दुःखहेतुबन्धो नेत्यर्थः। यथा श्रुते–किञ्च रुद्राणवो येन बध्यन्ते आभ्यो न परमो बन्धः। इत्यादिपूर्वोक्तग्रन्थविरोधापत्तेः। तत्र हेतुः भोक्तुरिच्छानुसारतः भोग्यत्वादिति। तत्र व्याप्तिप्रदर्शनपूर्वकं दृष्टान्तम्[3] आह– यद्यदिति। यद्यदीदृशं भोक्तुरिच्छानुसारेण भोग्यं दृष्टं तत्तन्न बन्धनम्। पूर्वोक्तसाध्यवदित्यर्थः। तत्र भोगाख्यं तत्त्वं सदाशिवस्येच्छानुसारेण भोग्यत्वात् यथा तस्य न बन्धनं तद्वत् इत्यर्थः। दृष्टमित्यनेन व्याप्तेरुभयवादिसंप्रतिपन्नत्वं सूचितम्। हेतौ भोग्यत्वादित्युक्ते अशुद्धाध्वनि व्यभिचारः। अत उक्तम् इच्छानुसारत इति। तावत्युक्तेऽपीश्वरेच्छानुसारेण भोग्ये तत्रैव व्यभिचारः। अत उक्तं भोक्तुरिति। तत्तद्भोक्तुरिच्छानुसारेणेत्यर्थः।

(वृत्तिः) एष विशुद्धाध्वा न बन्धः भोक्तुरिद्धच्छानुसारतो भोग्यत्वात् यद्यदीदृशं दृष्टं तत्तन्न बन्धनम्। यथा शिवस्य भोगाख्यं तत्त्वं[4] तस्मादिच्छानुवर्तित्वात् निबन्धनं नेति पूर्वेणानुषङ्गः।

—•—

(व्याख्या) ननु भोक्तुरिच्छानुसारेण भोग्यत्वं कलञ्जभक्षणादावनैकान्तिकमित्यतो हेत्वन्तरमाह–

---

१. दुःखसम्पूर्णताक्षणहेतोः। ननु कस्यासम्मतमिदं दुःखरूपेण वा तत्र स्थीयताम्। तदयुक्तं तस्माद्दुःखसम्पूर्णतालक्षणविश्वस्य] ज१; दुःखसम्पूर्णतालक्षणविश्वस्य–ज३
२. यथा मायेति। शुद्धाध्वनिर्माणं] मु;शुद्धाध्वनिर्माणं–क१; शुद्धाशुद्धाध्वनिर्माणं–क२
३. व्याप्तिप्रदर्शनपूर्वकं दृष्टान्तम्] मु,क२;व्याप्तिदर्शनपूर्वकदृष्टान्तम्–क१
४. भोगाख्यं तत्त्वं] ज३;भोगाव्यक्तत्वं–ज१

किञ्च कर्मान्वयाभावात् शुद्धाध्वा नो निबन्धकः।

(व्याख्या) शुद्धाध्वा पक्षः निबन्धको नो इति साध्यम्। नो नेत्यर्थः। कर्मान्वयाभावादिति हेतुः। कर्माजन्यत्वादित्यर्थः। पूर्वोक्त एव दृष्टान्तोऽनुषङ्गनीयः। व्यतिरेकेणाशुद्धाध्वा वा।

(वृत्तिः) किञ्च इतोऽपि शुद्धाध्वा शुद्धवर्त्म नो निबन्धकः न निबन्धनम्। कर्मान्वयाभावात्। कर्मजन्यत्वासम्भवात्।

—•—

(व्याख्या) ननु शुद्धाध्वनः कर्मजन्यत्वाभावे तद्वर्तिनां[1] भोगो निर्हेतुकः स्यात् तथा च हेत्वसिद्धिरित्यत आह–

(वृत्तिः) अनेन चेत्याह–

यत्र कर्मान्वयाभावात् शुद्धवर्त्मनि च द्विजाः।
भोगोऽत्रेच्छानुसारित्वात् कर्म नेच्छानुसारतः।।

(व्याख्या) यत्र शुद्धवर्त्मनि कर्मान्वयाभावात् कर्मजन्यत्वाभावं प्राप्यापि ल्यब्लोपे पञ्चमी। भोगः अत्र शुद्धाध्वनि इच्छानुसारित्वात् जायत इति शेषः। ततश्च भोगो न निर्हेतुकः न वा हेत्वसिद्धिरिति भावः। ननु तत्रापि भोगस्य कर्महेतुता किं न स्यादित्यत आह–कर्म नेच्छानुसारत इति। कर्म इच्छानुसारेण[2] न भोजयति किन्तु बलादिति भावः।

(वृत्तिः) किञ्च इतोऽपि शुद्धाध्वा शुद्धवर्त्म नो निबन्धकः न निबन्धनम्। कर्मान्वयाभावात्। कर्मजन्यत्वासम्भवात्। हे द्विजाः यत्र शुद्धाध्वन्युक्तः कर्मान्वयाभावश्च कुत इति नाशंकनीयम्। अत्र शुद्धाध्वनि वर्तिनि भोगे इच्छानुसारित्वात् इच्छानुवर्तनात्। इच्छानुसारित्वात्तदभावः कथमिति च नाशंकनीयम्। कर्म कर्मजन्यभोगः नेच्छानुसारतः। भुक्तं दृश्यत इति शेषः।

—•—

(व्याख्या) कुत इति तत्राह[3]–

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।।

(व्याख्या) अभुक्तं भोगमजनयत् कल्पकोटीनां शतैरपि कर्म न क्षीयते वेदबोधिता-नाशकानाश्यकर्मणो भोगैकनाश्यत्वात् शुद्धाध्ववर्तिनां बलात् भोजने मायावत्[4] वन्धत्वप्रसङ्गत्वादिति भावः।

---

१. तद्वर्तिनां] मु,क२;तद्व्यक्तीनां–क१

२. यत्र शुद्धवर्त्मनि कर्मान्वयाभावात् कर्मजन्यत्वाभावं प्राप्यापि ल्यब्लोपे पञ्चमी। भोगः अत्र शुद्धाध्वनि इच्छानुसारित्वात् जायत इति शेषः। ततश्च भोगो न निर्हेतुकः न वा हेत्वसिद्धिरिति भावः। ननु तत्रापि भोगस्य कर्महेतुता किं न स्यादित्यत आह–कर्म नेच्छानुसारत इति। कर्म इच्छानुसारेण] मु,क२;कर्म नेच्छानुसारेण–क१

३. कुत इति तत्राह] मु;तत्राह–क१,क२

४. मायावत्] मु,क२; मा... –क१

(**वृत्तिः**) नन्विच्छानुसारतः क्वचिदत्र मनोऽभिलषितदिव्यस्त्र्यादिकर्मजभोगलाभ-दर्शनात्। तत्र तद्रूपः स केवलं भुज्यतां नातद्रूपः तदयुक्तम्। अभुक्तं कर्म कल्पकोटिशतैरपि न क्षीयते। न नश्यते। ततः शुद्धवर्त्मवर्तिनो महाप्रलये मोक्षं प्रविशन्तो न प्रविशन्तीति भावः।

—•—

(व्याख्या) ननु शुद्धाध्ववर्तिनां विचित्रकर्माभावे विचित्रभोगो न स्यात् कारण-वैचित्र्याधीनत्वात् कार्यवैचित्र्यस्य। न चेश्वरेच्छावैचित्र्यात् तदुपपत्तिः। तथात्वे तस्य वैषम्यापत्तेरित्यभिप्रायेण पृच्छन्ति–

(वृत्तिः) भावः। ऋषयः कथमत्र कर्मायत्तं दृश्यमानं सर्वं तदनायत्तं तत्रेत्याशंकयन्ति – ऋषयः–

कथं कर्मान्वयाभावः शुद्धवर्त्मनि वर्तिनाम्।
शुद्धाध्वनि महाभोगः कर्म नास्तीति चोदितम्।
कथं तद्वर्तिनां भोगो विचित्रस्तद्वदेश्वर।

(**व्याख्या**) हे ईश्वर! शुद्धाध्ववर्तिनां महाभोगोऽस्ति कर्म च नास्तीत्युदितम्। तदनुपपन्नम्। शुद्धवर्त्मनि वर्तिनां कर्मान्वयाभावः कथं? भोगहेतोः कर्मणोऽभावे भोगस्यैवानुदयप्रसङ्गादित्यर्थः। ननूक्तमिच्छावशादेव शुद्धवर्त्मनि भोग इत्यत आह– कथं तद्वर्तिनामिति। शुद्धाध्ववर्तिनां विचित्रो भोगः विचित्रं कर्म विना कथं भवेत् तद्वदेत्यन्वयः।

(**वृत्तिः**) हे ईश्वर शुद्धाध्वनि महाभोगोऽस्ति तत्कारणतया दृश्यमानं कर्म नास्तीति चोदितं प्रशंसितम्। शुद्धवर्त्मवर्तिनां कथं कर्मान्वयाभावः। अस्तु तथा वा तद्वर्तिनां विचित्रो भोगः कथं तत्तदिदं वद कथयस्व।

—•—

(व्याख्या) कर्मवैचित्र्यमन्तरेणापि कार्यवैचित्र्यमन्यथोपपन्नमिति परिहरति–

ईश्वरः–

न कर्म भोगवैचित्र्ये कारणं शुद्धवर्त्मनि।
मलस्य परिपाको यो विचित्रः सोऽत्र कारणम्।

(**व्याख्या**) शुद्धवर्त्मनि भोगवैचित्र्यतारतम्ये कर्म न कारणम्। किन्तु मलस्य वासनारूपस्य विचित्रो यः परिपाकः स अत्र भोगवैचित्र्ये कारणमित्यन्वयः। न च भोक्तुरिच्छावैचित्र्यमेव भोगवैचित्र्ये कारणमिति वक्तुं शक्यम्। इच्छायां वस्तुसौन्दर्यलभ्यत्वेनात्युत्तमे भोग्ये सर्वेषामिच्छया ऐकरूप्यसंभवेन भोगवैचित्र्यानुपपत्तेः। मलपरिपाकस्य तु विषयसौन्दर्यानधीनत्वात् तत् वैचित्र्यमेव तत्र कारणमिति।

न च भोक्तुरिच्छया अहेतुत्वे भोक्तुरिच्छानुसारत इति पूर्वग्रन्थविरोधः। शुद्धवर्त्मनि भोगसामान्ये इच्छया हेतुत्वेऽपि तद्वैचित्र्ये मलपरिपाकवैचित्र्यं विशेष-सामग्रीत्यविरोधः।

(**वृत्तिः**) शुद्धवर्त्मनि भोगवैचित्र्ये कर्म न कारणम्। किन्त्वत्र मलस्य विचित्रो यः परिपाकः

स कारणम्। ननु प्रत्यात्मनियतपरिणतमलशक्तीनां शुद्धविद्याधोदीक्षाकृततुल्यात्यन्तविच्छित्तेः कथं तत्पाकमान्द्यवैचित्र्यमवेक्ष्य तदुत्तीर्णविचित्रशुद्धविद्यादिपदयोजना सत्यम्। चक्षुस्सम्बन्धिनि गोलकबृन्दे चक्षुस्संबन्धिस्वपाकमान्द्यवैचित्रवशविच्छेद्यमानपटलैः समाहिताः। पाकमान्द्यतारतम्यानुरूपिण्यः विचित्रकार्यं कुर्वन्त्यः वासनाः सन्ति यथा तथा विद्याविद्येश्वरादित्वेन भवितव्यात्मसंबन्धिन्यां महामायायां विद्याविद्येश्वरादित्वेन भवितव्यात्मसंबन्धिस्वपाकमान्द्यवैचित्र्यवशविच्छेद्यमानप्रत्यात्मनियतमलशक्तिभिः समाहिताः पाकमान्द्यतारतम्यरूपिण्यः विचित्रकार्यं कुर्वन्त्यः अधिकारमलात्मना समुत्तीर्यमाना[1] वासनाः सन्तीति न काचित् क्षतिः। तदुक्तं चिन्त्यविश्वसादाख्ये–

नैष्ठिकस्य पराप्राप्तिः[2] भौतिकस्य विशेषतः।
मलवासनया तस्य विद्येश्वरपदस्थितिः।।
वासनापरिपाकेन दीक्षया परमाप्नुयात्। इति।

ननु रत्नत्रयादौ शुद्धाध्वनि ईश्वरसेवात्मकं कर्म चास्तीति श्रूयते। सत्यम्। विदेहविज्ञानकेवलानां दीक्षानन्तरं शुद्धाध्वगतेः प्राक्[3] न शुद्धकर्मानुष्ठानम्[4] इति तदनुष्ठातघ्णां भौतिकदीक्षाभाजामपि मलपाकवैचित्र्यमनपेक्ष्य न भोगदातृ तदिति न सार्वत्रिकमित्यप्रधानमित्यविरोधः।

—•—

(व्याख्या) उक्तमेव मलपरिपाकवैचित्र्यस्य हेतुत्वं विविच्य दर्शयति–

(वृत्तिः) तदनुरूपगतिं दर्शयति–

यस्य प्रकृष्टस्तत्पाको भोगतत्त्वे स भोगभुक्।
इतरस्त्वीशविद्याख्यतत्त्वयोः भोगभाग् भवेत्।

(व्याख्या) यस्याणोः प्रकृष्ट अतिशयितस्तत्परिपाकः मलपरिपाकः स अणुः भोगतत्त्वे सदाशिवतत्त्वे भोगभुक्। एतच्च शिवतत्त्वस्यापि उपलक्षणम्। 'भोगतत्त्वे स्थितिः यस्मात् वस्तुतस्तत्त्वयोर्द्वयोः' इत्युक्तत्वात्। इतरः अप्रकृष्टमलपरिपाकः तु तथा न भवतीत्यर्थः। ईशविद्याख्यतत्त्वयोः ईशतत्त्वे विद्यातत्त्वे च भोगभाक् भोगयुक्तो भवेदित्यर्थः। तेषु तत्त्वेषु परिपाकवैचित्र्येणावान्तरभोगवैचित्र्यमपि सूचितमिति द्रष्टव्यम्। शुद्धवर्त्मनि कर्मानपक्षेत्वमुपपादितमुपसंहरति–

किं कर्मणात्र विप्रेन्द्रा यत्रेच्छाभोग इष्यते।

(व्याख्या) हे विप्रेन्द्राः ! यत्र शुद्धवर्त्मनि इच्छाधीनो भोग इष्यते तत्र कर्मणा किं प्रयोजनम्?

---

१. समुत्थीयमाना] ज३;समुत्तीर्यमाना–ज१
२. *इतः परं मूलग्रन्थः वृत्तिश्च 'ज२' कोशे आरभेते।
३. विदेहविज्ञानकेवलानां दीक्षानन्तरं शुद्धाध्वगतेः प्राक्] ज१,ज३; विदेहवत् ज्ञान ....–ज२
४. न शुद्धकर्मानुष्ठानम्] ज३; शुद्धकर्मानुष्ठानम् –ज१,ज२

कार्यसामान्ये इच्छायाः[1] विशेषे मलपरिपाकविशेषस्य च कारणत्वेनान्यथा सिद्धेरुक्तत्वादिति भावः।

(वृत्तिः) सूत्रार्थः सुकरः।

—•—

(व्याख्या) ननु भोगवैचित्र्ये मलपरिपाकवैचित्र्यं हेतुरित्युक्तं तदयुक्तम्। मलपरिपाकस्यापि भोगं विनाऽसंभवात्। तथा चान्योन्याश्रयः। तत्परिहाराय भोगवैचित्र्ये कर्मवैचित्र्यमेव हेतुरिति स्वीकार्यमित्याशंकन्ते–

(वृत्तिः) ऋषयः यद्येवमस्तु विज्ञानाकलेषु न भावनीयः परिपाक इत्याशंकयन्ति–

भवेदेवं मलस्यास्य परिपाको भवेत् स्वतः।
भोगेन तु विपाकोऽस्य भोगो नाकर्मणा स च।।

(व्याख्या) अस्य मलस्य परिपाकः स्वत एव भवेदेव[2] भवदुक्तं सर्वं[3] संगतमिति सोपहासमभिधानम्। अस्य मलस्य विपाकः विचित्रः पाकः भोगेन साध्य[4] इति शेषः। स च भोगो नाकर्मणा कर्मव्यतिरिक्तेन मलपरिपाकेन साधयितुं न शक्यः। भोगपरिपाकयोः परस्परजन्यत्वेनान्योन्याश्रयस्य दुर्वारत्वादिति भावः।

(वृत्तिः) अस्य मलस्य परिपाकः स्वतः कारणान्तरनिरपेक्षया भवेत्। यदि स्यात् तदैवम् उक्तप्रकारेण कारणं भवेत्। न च स्वतः सम्भवतीति वाच्यम्। नामिश्रं परिणमत इति न्यायेन भोगेनास्य मलस्य विपाकः स भोगश्च नाकर्मणा कर्मणा विना न जन्यते। तत्तत्र नास्ति हीति भावः।

—•—

(व्याख्या) मलपरिपाके भोगो न हेतुः येनान्योन्याश्रयः स्यात् किन्तु कर्मक्षय एव हेतुरित्यभिप्रायेण परिहरति–

ईश्वरः–

विज्ञानयोगसंन्यासैः भोगाद्वा कर्मणः क्षये।
तत्कर्मायत्तदेहादेः क्षयात्तद्भोक्तृताक्षयः।
मलोऽपि पक्व एषोऽस्मात् सहकारिवशाद् द्विजाः।

(व्याख्या) विज्ञानश्च योगश्च संन्यासश्च विज्ञानयोगसंन्यासाः। विज्ञानं विशिष्टमीश्वरविषयं ज्ञानं तच्च श्रवणादिजन्यम्। योगश्चित्तवृत्तिनिरोधः निदिध्यासनमिति यावत्। संन्यासः विधिवत् सर्वसङ्गपरित्यागः। तैः सञ्चितस्य कर्मणः क्षये[5] भोगाच्च प्रारब्धक्षये वाशब्दश्चार्थे अर्थादागामिनां

१. कार्यसामान्ये इच्छायाः] मु;कार्यसामान्येच्छायां–क१; कार्यसामान्ये इच्छायां–क२
२. भवेदेव] क२;भवेदेवं–क१; भवेद्यदि भवेदेव–मु
३. भवदुक्तं सर्वं] मु,क२;तदुक्तं स–क१
४. भोगेन साध्यः] मु,क२;भोगो साध्यः–क१
५. क्षये] मु;क्षयः–क१,क२

च[१] असंबन्धे च तत्कर्मायत्तदेहादेः प्रारब्धकर्मायत्तदेहादेः क्षयात्[२] तद्भोक्तृताक्षयः कलादिसंबन्धक्षय इति यावत्। हे द्विजाः! अस्मादेव कर्मक्षयादिलक्षणसहकारिवशात् मलोऽपि पक्वो भवति न भोगादिति नान्योन्याश्रयः। एवं च परिपाकत्वावच्छिन्नं कार्यं प्रत्यनुगतः कर्मक्षय एव हेतुः नाननुगता भोगादय इति भावः।

(वृत्तिः) हे द्विजाः। मायापुरुषविवेकरूपादिलक्षणविज्ञानयोगसन्यासैः कर्मक्षयफल-जननोपक्षीणैः। भोगाद्वा तादृशात् कर्मणः क्षये तत्कर्मायत्तदेहादेः क्षयात् तद्भोक्तृताक्षयः तदायत्तभोगनाशो भवति। वस्त्रगतदोषे प्राग्विमिश्रितस्वनिवृत्त्यनुपदात्। पूर्वं स्वनिहितवासन-भस्मगोमयप्रलयलक्षणात् सहकारिवशात् स दोषः पक्वो यथा भवति तथा मलेऽपि प्राग्विमिश्रितस्वनिवृत्त्यनुपदात् पूर्वं स्वफलदेहभागद्वारा[३] स्वनिहितवासनकर्मप्रलयलक्षणादस्मात् सहकारिवशात् स एष मलोऽपि पक्वो भवति। तदिदं किरणवृत्तौ सविस्तरं। तदुक्तं च तदन्यत्र-

कलाद्या या तनुः सूक्ष्मा मलपाकविधायिनी।
स्ववासनां मले कृत्वा प्रयाति प्रलयं तथा।
यथा वस्त्रमले नैजगोमयादि व्ययस्ततः। इति।

—•—

(व्याख्या) ननु भोगजन्यकर्मक्षयो मलपरिपाके हेतुः[४] परिपाको भोगहेतुः भोगश्च कर्मक्षये हेतुरिति चक्रकापत्तिरित्याशंक्याह-

(वृत्तिः) समत्वे शिवः किं कुर्यादित्यत आह -

परिपाकः समस्तेषां सर्वेषामपि शंकरः।

(व्याख्या) सर्वेषां विज्ञानसंन्यासादिप्रयुक्तं कर्मक्षयवतां मलपाकः समानः। अयं भावः। मलपरिपाकत्वावच्छिन्नसामान्यकार्ये कर्मक्षयत्वावच्छिन्नं सामान्यं[५] न तु कर्मक्षयत्वावच्छिन्नं कारणविशेषः[६] येन चक्रकापत्तिरिति। किञ्च भोगसाध्यकर्मक्षयत्वेन हेतुत्वेऽपि न चक्रकप्रसङ्गः। कर्मक्षयसाधनीभूतस्य भोगस्याशुद्धाध्ववर्तिभोगरूपत्वात् मलपरिपाकसाध्यभोगस्य शुद्धाध्ववर्ति-भोगत्वेन परस्परविलक्षणत्वात्। ननु कर्म वैचित्र्यस्य हेतुत्वानङ्गीकारे विचित्रपदयोजनं किं प्रयुक्तमित्यत आह- शंकरः इति।

(वृत्तिः) सर्वेषां तेषां विज्ञानकेवलेषु शुद्धवर्त्मगमनयोग्यानां परिपाकः समः। अपि शब्दः गिरिमपि शिरसा भिन्द्यात् इतिवत् सम्भावनार्थः।

—•—

---

१. च] मु,क२;तु-क१
२. प्रारब्धकर्मायत्तदेहादेः क्षयात्] मु;प्रारब्धकर्मारब्धदेहादिक्षयात्-क१,क२
३. स्वफलदेहभागद्वारा] ज३;स्वफलं देहभागद्वारा-ज१,ज२
४. मलपरिपाके हेतुः] मु,क२;मलपरिपाकहेतुः-क१
५. सामान्यं] क१,क२; सामान्यकारणं-मु
६. कर्मक्षयत्वावच्छिन्नं कारणविशेषः] मु;कर्मक्षयत्वावच्छिन्नकारणविशेषः-क१,क२

(व्याख्या) ननु विचित्रभुवनाधिपत्यनियोजनस्य विचित्रकारणान्तरनिरपेक्षत्वे शिवस्य नैर्घृण्यं स्यादित्यत आह–

स्वेच्छयैवाधिकारेषु विचित्रेषु नियोजयेत्।
स्वेच्छैव कारणं तत्र वैचित्र्ये कर्म न द्विजाः।।

(व्याख्या) शंकरः शिवः तान् स्वेच्छयैव विचित्रेषु अधिकारेषु नियोजयेत्। तत्र हेतुमाह तत्रेति।तत्र वैचित्र्ये विचित्रभुवनाधिपत्यनियोजनरूपे एवकारव्यावर्त्यम्[१] आह– कर्म नेति।

(वृत्तिः) शंकरः स्वेच्छयैव स्वकीयनियमलक्षणेच्छाशक्त्यैव विचित्रेष्वधिकारेषु भोगविषयेषु नियोजयेत्। हे द्विजाः। तत्र वैचित्र्ये स्वेच्छैव कारणं न कर्म शम्भोः कदाचन।

—•—

नैवेह शम्भोर्नैर्घृण्यं भवतीह कदाचन।

(व्याख्या) इह विचित्रभुवनाधिपत्यनियोजनविषये शम्भोः नैर्घृण्यं न भवति।

(वृत्तिः) इह भोगवैचित्र्ये पुनरिह योजनाविषये नैर्घृण्यं निर्गतकरुणत्वं न भवति।

—•—

(वृत्तिः) कुत इत्यत आह –

दुःखेषु हि नियुञ्जानो निर्घृणो नापरत्र च।

(व्याख्या) कुत इत्यत आह– दुःखेष्विति। लोके दुःखेषु नियुञ्जानः प्रेरयन्नेव निर्घृणो भवति। अपरत्र तु सुखेषु तु नियुञ्जानः निर्घृणो न भवति।

(वृत्तिः) दुःखेषु निमित्तान्तरमन्तरेण नियुञ्जानः प्रेरयन्निर्घृण इत्युच्यते। न तथा अपरत्र सुखे[२] नियुञ्जानः।

—•—

शुद्धाध्वनि[३] सुखात्मैव भोग एवं स च स्मृतः[४]।।

(व्याख्या) सुखेषु नियुञ्जान इति यदुक्तं तदनुपपन्नम्। भोगस्य सुखदुःखानुभवरूपत्वादित्यत आह– शुद्धाध्वनीति। शुद्धाध्वनि भोगः सुखात्मैव न दुःखानुभवरूपः स चाधिकारनियोगोऽप्येवं स्मृतः। सुखात्मैव स्मृत इत्यर्थः।

(वृत्तिः) शुद्धाध्वनि एवमुक्तप्रकारेण समुच्छ्रितः समुन्नतीकृतो भोगः सुखात्मैव[५] न तस्य दुःखलक्षणत्वं सम्पाद्यम्।

—•—

१. एवकारव्यावर्त्यम्] मु;एवकारव्यावृत्तिम्–क१,क२
२. प्रेरयन्निर्घृण इत्युच्यते। न तथा अपरत्र सुखे] ज१,ज३; वाक्यमिदं श्ज२श कोशे नास्ति।
३. शुद्धाध्वनि] मु, ज१;शुद्धेऽध्वनि- क१,क२ ज२,ज३
४. स च स्मृतः] मु, क१,क२;समुच्छ्रितः–ज२,ज३;समुद्धृतः–ज१
५. भोगः सुखात्मैव] ज१,ज३; भोगात्मैव–ज२

(व्याख्या) ननु शुद्धाध्ववर्तिनां अनावृतज्ञानवत्वेन तत्पदस्वीकारपरित्यागयोः स्वातन्त्र्यं किं न स्यादित्यत आह–

(वृत्तिः) उपसंहरति –

इच्छाविलङ्घ्यमहिमा[1] महेशस्य महात्मनः।

(व्याख्या) इच्छा संकल्पः अविलङ्घ्यमहिमा। अनुल्लङ्घ्यप्रभावः। तथा च तेषां स्वातन्त्र्यायोगादिति भावः। अत्र श्रुतिरस्ति।

(वृत्तिः) महात्मनो महेशस्य इच्छा अविलङ्घ्यमहिमा अनतिलङ्घ्यप्रभावा।

—•—

(व्याख्या) ननु पूर्वोक्तनैर्घृण्याभावेऽपि स्वेच्छया नियुञ्जानस्य शिवस्य वैषम्यं स्यादित्यत आह–

कर्मादिनैरपेक्ष्येण मलपाकानुसारतः।
अनुगृह्णाति विज्ञानकेवलानपरानपि।।

(व्याख्या) कर्म आदिः यस्य तत् कर्मादि। आदिपदेनानुग्राह्यगतयाचनादिकं गृह्यते। तन्नैरपेक्ष्येण तदपेक्षां विनेत्यर्थः। मलपाकानुसारतः मलपरिपाकतारतम्यानुगुण्येन विज्ञानकेवलानुगृह्णातीत्यर्थः। ननु परिपाके कर्मक्षय एव हेतुरित्युक्तम्। तस्य चाभावरूपत्वेन वैचित्र्यासंभवात् तत्कार्ये मलपरिपाके कथं वैचित्र्यमिति चेन्न। स्वरूपकृतविशेषाभावेऽपि कर्मक्षयस्य प्रतियोगिकृतविशेषसंभवात् गन्धसामान्यगन्धप्रागभावादाविव प्रतियोगिकृतविशेषमादाय विचित्रकार्यनिर्वाहात्। ननु यत्र कर्म नास्ति तत्र तस्यानुग्रहे[2] परिपाक एव हेतुरस्तु। यत्र कर्मास्ति तत्र कर्मैव हेतुरित्यननुगमः स्यादित्यत आह – अपरानिति। प्रलयाकलान् सकलानपि मलपाकमपेक्ष्यैवानुगृह्णातीति। नाननुगम इति भावः।

(वृत्तिः) ततः स कर्मादि-नैरपेक्ष्येण मलपाकानुसारतः मलपाकवैचित्र्यानुवर्तमानात् विज्ञानकेवलानपरान् सकलप्रलयकेवलानपि अनुगृह्णाति। भुक्तिमुक्तिव्यक्तीर्विदधाति।

—•—

(व्याख्या) ननु शुद्धाध्वनि कर्माभावेऽपि परिपाकवैचित्र्येण भोगवैचित्र्यमस्त्विति यदुक्तं तदयुक्तम्। भोगे रागादीनां हेतुत्वावधारणात् शुद्धाध्वनि रागाभावात् भोगस्यैवासंभवादित्याशंकन्ते–

(वृत्तिः) एतदभ्युपगम्य ऋषयः शंकयन्ति –

ऋषयः –

अध्वाऽयं भोग्य उद्दिष्टो भोगो रागादिभिः स्थितः।
अत्र तेषामभावेन कथं भोगो महेश्वर।

---

१. इच्छाविलङ्घ्यमहिमा] ज२,ज३;इच्छानुल्लङ्घ्यमहिमा-ज१

२. तस्यानुग्रहे] मु,क२ कर्तव्यानुग्रहे-क१

(व्याख्या) हे महेश्वर ! अयं शुद्धाध्वा भोग्य उद्दिष्टः भोग्यपदार्थव्याप्त उद्दिष्टः भोगश्च रागादिभिः स्थितः रागादिभिः जन्यो व्यवस्थितः। आदिपदेन कलादयो गृह्यन्ते। अत्र शुद्धाध्वनि तेषां रागादीनाम् अभावेन भोगः कथं स्यात् कारणाभावे कार्यानुदयादिति भावः।

(वृत्तिः) अयं शुद्धाध्वा भोग्य उद्दिष्टस्तद्विषयभोगश्चिद्व्यक्तिः। कलोद्वलितचौतन्यो विद्या[1]-दर्शितगोचरः। रागेण रञ्जितश्चेत्यादि श्रुतेः रागादिभिः स्थितिः। रागादिभिर्व्यङ्ग्य इति निश्चितः। हे महेश्वर अत्र शुद्धवर्त्मनि तेषां रागादीनाम् अभावेन कथं केन प्रकारेण भोगश्चिदभिव्यक्तिर्भवति।

—•—

(व्याख्या) अत्रापि रागाद्यङ्गीकारेण उत्तरमाह-

ईश्वरः-

अत्रापि कालमुख्यानि सन्ति तत्त्वान्यथो यथा।
किन्तु तान्यत्र शुद्धानि बैन्दवानि द्विजोत्तमाः।

(व्याख्या) अथो यथा शुद्धाध्वनीव अत्रापि शुद्धाध्वन्यपि कालमुख्यानि तत्त्वानि सन्त्येव अतो न भोगानुपपत्तिरिति भावः। तर्हि तद्वदेव बन्धनानि किं न स्युरित्यत आह- किन्त्विति। तुशब्दः शंकानिवृत्त्यर्थः। शुद्धानीति। तानि कालादीनि[2] शुद्धत्वात् न बन्धनानीत्यर्थः। तत्र हेतुमाह- बैन्दवानीति। मायिकानामेव बन्धकत्वात् तद्वत् बैन्दवानां न बन्धकत्वं यथा शिवतत्त्वादीनामिति भावः।

(वृत्तिः) अत्रापि शुद्धवर्त्मन्यपि कालस्यापि भोगावच्छेदकत्वेन हेतुत्वात्। यदाहुः -

चिरेण बत लब्धासि न जाने करवाणि किम्।
प्रविशामि किमङ्गेषु पिबामि निगिरामिति।।

कालो मुख्यः प्रमुखो येषां कलादीनां तानि कालमुख्यानि तत्त्वानि तथा सन्ति। यथा स्वस्वकार्यान्यथानुपपत्त्याऽधो मायामण्डले सिद्धानि सन्ति। किन्तु सन्त्यप्यत्र शुद्धवर्त्मनि तानि बैन्दवानि शुद्धानि।

—•—

(व्याख्या) ननु मास्तु बन्धकत्वं कालादीनां[3] तथापि सकलाकलविभागो न स्यादित्याशङ्कन्ते-

(वृत्तिः) ऋषयः कलादियोगात्तद्वश्यत्वमस्तीति चोदयन्ति -

ऋषयः-

---

१. मलपाकानुसारतः। मलपाकवैचित्र्यानुवर्तमानात् विज्ञानकेवलानपरान् ... अयं शुद्धाध्वा भोग्य उद्दिष्टस्तद्विषयभोगश्चिद्व्यक्तिः। कलोद्वलितचौतन्यो विद्या] ज१, ज३; इमानि वाक्यानि 'ज२' कोशे न सन्ति।

२. कालादीनि] मु;कलादीनि-क१, क२

३. कालादीनां] मु;कलादीनां-क१, क२

कलादितत्त्वसंयोगात् सकलत्वमणोः स्थितम्।
तेषामत्रापि सद्भावे सकला अकला अपि।।

(व्याख्या) अशुद्धाध्ववर्तिनः अणोः जीवस्य कलादीनां तत्त्वानां संयोगादेव सकलत्वं व्यवस्थितम्। अन्वर्थसंज्ञत्वादिति भावः। ततः किमित्यत आह- तेषां कलादीनाम् अत्रापि शुद्धाध्वन्यपि सद्भावे अकला अपि विज्ञानाकला अपि सकलाः स्युः। एवं च सकलाकलभेदो न स्यादित्यर्थः।

(वृत्तिः) कलादितत्त्वसंयोगात् कलादितत्त्वभोजकभोक्तृत्वबुद्ध्यादिभोजकभोक्तृत्वभोग्य-भोक्तृत्वाद्विलक्षणस्वरूपसम्बन्धादणोरशुद्धवर्त्मवर्तिनः सकलत्वं कलावश्यत्वं स्थितम्। सिद्धम्। अत्रापि तेषां कलादीनां सद्भावेऽस्तित्वे विज्ञानादिभिरकला अपि दीक्षापूर्वं तद्बैन्दवकलायोगात् सकलाः कलावश्या[1] भवन्ति।

—•—

(व्याख्या) तेषां कलादिपारतन्त्र्यसद्भावासद्भावाभ्यां सकलाकलभेद उपपद्यते इत्याह- ईश्वरः-

तेषां कलादियोगेऽपि पारतन्त्र्यं कृतं न तैः।
विज्ञानकेवलास्तस्मात् सकला अकला अपि।।

(व्याख्या) तेषां विज्ञानकेवलादीनां कलादिसंयोगेऽपि तैः कलादिभिः पारतन्त्र्यं न कृतं बन्धो न संपादित इत्यर्थः। तस्मात् कारणात् सकला अपि कलादिसहिता अपि अकला एव भवन्ति। पारतन्त्र्यप्रयोजकीभूतकलादिसंबन्धाभावादिति भावः।

(वृत्तिः) तेषां शुद्धवर्त्मवर्तिनां कलादियोगेऽपि न तैः पारतन्त्र्यं वश्यत्वं कृतम्। मायीय-कलाकलितमायागर्भाधिकारिभिः अनैकान्तिकत्वादिति भावः। तदुक्तं-

कलायोगेऽपि नो वश्याः कलानां पशुसंघवत्। इति।

विज्ञानकेवलाः परिपक्वे मले शिवकृतदीक्षातः स्थूलसूक्ष्मशिवत्वाभिव्यक्त्यपर-शिवसंज्ञाभ्यां पिहितकैवल्यलक्षणपशुत्वविज्ञानकेवलसंज्ञाः सकला अपि[2] शुद्धकलाकलिता अपि तस्मात् तत्कृतपारतन्त्र्याभावात् अकला न कलावश्याः।

—•—

(व्याख्या) इदानीं वृत्तानुवादपूर्वकं वर्तिष्यमाणमुपक्षिपति-

(वृत्तिः) परीक्षितपदार्थोपसंहाराय परीक्षितव्यपदार्थोपक्रमाय च श्लोकः -

---

१. कलादितत्त्वसंयोगात् कलादितत्त्वभोजकभोक्तृत्वबुद्ध्यादिभोजकभोक्तृत्वभोग्य- भोक्तृत्वाद्विलक्षण-स्वरूपसम्बन्धादणोरशुद्धवर्त्मवर्तिनः ... कलावश्या] ज१, ज२; तेषां शुद्धवर्त्मवर्तिनां कलादियोगेऽपि वश्या -ज३

२. सकला अपि] ज१,ज३; 'ज२' कोशे नास्ति।

एवं बिन्दुः समासेन व्याख्यातो वृत्तिभिः सह।
मायाख्यमपि[1] विप्रेन्द्राः शृणुध्वं युक्तिभिः सह।

(व्याख्या) हे विप्रेन्द्राः! एवं पूर्वोक्तप्रकारेण बिन्दुः कुण्डलिनीपदार्थः वृत्तिभिः सह व्याख्यातः विशेषेण आख्यातः प्रतिपादितः। तदनु अनन्तरं मायाख्यं पदार्थमपि युक्तिभिः सह वक्ष्यमाणं शृणुध्वम् आत्मनेपदं छान्दसं द्रष्टव्यम्।

।। इति पौष्करव्याख्याने बिन्दुपटलः संपूर्णः।।

(वृत्तिः) स्पष्टः श्लोकार्थः।

।। इति पौष्करज्ञानपादवृत्तौ द्वितीयः पटलः।।

—•—

१. मायाख्यमपि] क१,क२; मायां तदनु-मु

PAUṢKARĀGAMA JÑĀNAPĀDA

Vol. 1

Editor

T. Ganesan

राष्ट्रीय पाण्डुलिपि मिशन

॥ विज्ञानमुपास्व ॥

National Mission for Manuscripts